Samskrit for Specific Purpose Series - 3

गीतायाः भाषा

संस्कृतं पठ्यताम्

द्वितीयः भागः

Learn Samskrit

THE LANGUAGE OF GITA

Part -2

संस्कृतसंवर्धनप्रतिष्ठानम्

Samskrit for Specific Purpose Series - 3

गीतायाः भाषा

संस्कृतं पठ्यताम्

द्वितीयः भागः

Learn Samskrit

THE LANGUAGE OF GITA

PART - II

ONGC-CSR Supported Project of

Samskrit Promotion Foundation

संस्कृतसंवर्धनप्रतिष्ठानम्

देहली

प्रकाशनम्
संस्कृतसंवर्धनप्रतिष्ठानम्
११२०४/५, वेदभवनम्, गौशालामार्गः
देहली - ११०००६

© प्रकाशकस्य एव

प्रथममुद्रणम् - २०१७
द्वितीयमुद्रणम् - २०२१

मुद्रणम्
प्रिन्टैक इन्टरनेशनल
ए-६/डी, झिलमिल इंडस्ट्रियल एरिया,
दिल्ली - ११००९५

परामर्शसमितिः

डॉ. चान्दकिरणसलूजा
चमूकृष्णशास्त्री (पद्मश्रीः)
डॉ. विश्वासः

लेखकाः

आचार्य अनूप शर्मा
अश्विनी राजेश लङ्के
सौ. श्रद्धा उपाध्ये
श्रीदेव झा

ISBN -978-81-944709-5-3

Learn Samskrit - THE LANGUAGE OF GITA (PART - II)
Second level text book to learn Samskrit through Gita.

Publisher - Samskrit Promotion Foundation
11204/5, Vedabhavanam, Gaushala Marg, Delhi-110006
Email: info@samskritpromotion.in
Pages - 6+162
Second Print - 2021
Printed at : Printech International
A-6/D, Jhilmil Industrial Area, Delhi-110095

Preface

The richness and vibrance of the Samskrit language is a fact acknowledged by scholars and intellectuals across the world. Over millennia, Samskrit has been the principal vehicle of the knowledge traditions and practices of Bharat, or India. This continuum of the language not only helped create innumerable branches of knowledge, but also resulted in an unmatched corpus of classical texts in every conceivable domain of human endeavor, thus laying the very foundations for the development and spectacular rise of the Bharatiya civilization.

However, in recent centuries, Samskrit became tagged as just a 'religious language', an impression that remains in the minds of many people throughout the world even to this day. This situation is due to several reasons: (१) while our day-to-day affairs were in our individual 'mother tongue', Samskrit remained restricted to the conduct of our religious ceremonies and programs; (२) over the last two centuries or so, there were concerted efforts to alienate Samskrit from our mainstream education; and (३) for a long time, there has been a deliberate campaign of disinformation regarding Samskrit, either because of ignorance or because of ulterior motives.

The truth is simple: Samskrit is the unparalled medium, the original language that has articulated all knowledge and wisdom in our region since eternity. The language of science and medicine has been Samskrit. The language of literature has been Samskrit. The language of philosophy and religion has been Samskrit. The language of the arts and music has been Samskrit. It is no wonder that mankind's first astronomical observations were recorded in Samskrit. Again, Samskrit is the only language that truly reveals the secrets of Yoga or Ayurveda.

Yet, we are confronted today with a peculiar situation. While there are countless works in Samskrit on a wide range of subjects, innumerable original works still remain unpublished. To make matters worse, even the published Samskrit literature is seen and studied only through the lens of religion. In order to bridge the disconnect between Samskrit and modern times, the need of the hour is the editing and publishing of ancient Samskrit texts, knowledge retrieval and dissemination, and research and re-interpretation. All this in Samskrit itself --- not in translation, as the essence can easily be lost. The challenges for Bharat are major, but shouldering the responsibilites would not only be life-fulfilling, but also offer our younger generation bright career opportunities and a great future in Samskrit studies.

Today, adult beginners of Samskrit are learning the language for specific purposes: e.g., to access the original texts on Yoga, Ayurveda, Vedanta, as well as the eternal repositories of wisdom such as the Arthashastra, the Vedas, the Upanishads, the Bhagavad-Gita. The vocabulary, verbal repertoire, syntax, semantics, etc., of every discipline differ from one to the other.

With such specific requirements, many modern-day learners find that the conventional language-centered approach is a roundabout route to accessing their information needs. This new Samskrit for Specific Purpose (SSP) series is uniquely tailored for them, offering a more focused methodology. Unlike the traditionally available Samskrit learning materials or courses, this SSP series is uniquely designed to facilitate the study of the target language through the target subject, and the study of the target subject through the target language.

The SSP series can be useful for all irrespective of age groups and occupations for both self-learning and classroom teaching. The SSP series course books herald a new era in Samskrit learning/education, and are supplemented with audio, video and e-learning modules. The approach of 'Samskrit through Samskrit' is extremely crucial. You can, and will, easily learn Samskrit directly, without the crutch of, say, English. Thus, in the broader context, Samskrit through Samskrit (STS) and Samskrit for Specific Purpose (SSP) will together provide a highly effective learning platform for even first-time learners.

In conclusion, a brief word of advice: although learners may feel, at the outset, that their intention to learn Samskrit is only to read and understand the target subject, they must keep in mind that sound/speech (listening and speaking) is the primary medium of a language. The practice of listening and speaking should precede the practice of the reading and writing.

The SSP series is designed to introduce Samskrit through simple conversations, to make learning both interesting and meaningful, followed with graded lessons. The series will not only make learners function adequately in Samskrit, but will also enable them eventually to read, comprehend and undertake studies in Samskrit in their specific interest area at a higher level.

SPF acknowledges and thanks Dr. H R Vishwasa, Mangalore for his guidance and advice in preparation of books of Bhagavad Gita Series.

अनुक्रमणिका

क्र०	पाठनाम	पाठ्यबिन्दवः	पृष्ठसंख्या
१.	ज्ञानात् ऋते मुक्तिः नास्ति	उपपदविभक्तयः	१
२.	चन्द्रमाः अस्तम् एति	हलन्तपुंलिङ्गशब्दाः	६
३.	हिमालयात् सरित् प्रवहति	हलन्तस्त्रीलिङ्गशब्दाः	१६
४.	तपसः बलम्	हलन्तनपुंसकलिङ्गशब्दाः	२२
५.	व्यूहनिर्माणम्	णत्वम्	२९
६.	कं घातयति ?	णिजन्तम्	३६
७.	अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि	णिजन्तम् २	४३
८.	कुमन्त्रणायाः दुष्फलम्	विशेषण-विशेष्यभावः	५२
९.	द्वौ भूतसर्गौ लोकेऽस्मिन्	संख्यासु लिङ्गभेदः	५९
१०.	भगवद्भक्तेः महिमा	पूरणप्रत्ययान्ताः	७०
११.	नहुषस्य पतनम्	सर्वनामशब्दाः (पुंलिङ्गम्, नपुंसकलिङ्गम्)	७८
१२.	सभायाम् असौ द्रौपदी	सर्वनामशब्दप्रयोगः (स्त्रीलिङ्गम्)	८५
१३.	जीवनयापनस्य केचन उपायाः	चित्-चन-प्रयोगः	८९
१४.	कः श्रेष्ठः स्यात् ?	परस्मैपदिधातूनां विधिलिङ्लकारः	९४
१५.	श्रीकृष्णः एव त्रायेत !	आत्मनेपदिधातूनां विधिलिङ्लकारः	१०४
१६.	युधिष्ठिरस्य अपशकुनानां दर्शनम्	लृङ्लकारः	१०९
१७.	विलपन् नरभक्षी राक्षसः...	शतृप्रत्ययान्तानां प्रयोगः	११७
१८.	शान्त्यै क्रियमाणाः प्रयासाः	शानच्-प्रत्ययान्तानां प्रयोगः	१२६
१९.	कर्णस्य महती दानदित्सा	सन्नन्ताः	१३३
२०.	धर्मग्रन्थेषु गीता विशिष्टतमा	तरप्-तमप्-इष्ठन्-ईयसुन्-प्रत्ययाः	१४२
	उत्तराणि		१५२

सङ्केताक्षरसूची

प्र.पु.	प्रथमपुरुषः	च.वि.	चतुर्थीविभक्तिः
म.पु.	मध्यमपुरुषः	पं.वि.	पञ्चमीविभक्तिः
उ.पु.	उत्तमपुरुषः	ष.वि.	षष्ठीविभक्तिः
ए.व.	एकवचनम्	स.वि.	सप्तमीविभक्तिः
द्विव.	द्विवचनम्	सम्बो.	सम्बोधनम्
ब.व.	बहुवचनम्	पा.सू.	पाणिनीयं सूत्रम्
पुं.	पुंलिङ्गः	लट्	लट्लकारः
स्त्री.	स्त्रीलिङ्गः	लोट्	लोट्लकारः
नपुं.	नपुंसकलिङ्गः	लङ्	लङ्लकारः
प्र.वि.	प्रथमाविभक्तिः	वि.लिङ्	विधिलिङ्लकारः
द्वि.वि.	द्वितीयाविभक्तिः	(लिङ्)	विधिलिङ्लकारः
तृ.वि.	तृतीयाविभक्तिः		

(श्रीमद्भग.१.१)	श्रीमद्भगवद्गीतायाः प्रथमाध्यायस्य प्रथमः श्लोकः।
(१.१)	अत्र प्रथमा संख्या अध्यायं सूचयति एवं द्वितीया संख्या श्लोकसंख्यां सूचयति।
आ + गम्	धातोः प्राक् अनेन प्रकारेण यानि अक्षराणि दृश्यन्ते तेषां नाम उपसर्गः इति अस्ति।
उपसर्गाः	**प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उद्, अभि, प्रति, परि, उप इति। (२१)**

ज्ञानात् ऋते मुक्तिः नास्ति

उपपदविभक्तयः

१

एतां कथां सम्यक् पठत अवगच्छत च -



एकदा धृतराष्ट्रः सञ्जयम् उक्तवान् - 'हे सञ्जय ! भवान् चतुर्णां युगानां मनुष्याणाम् आयुषः प्रमाणस्य विषये विस्तरेण कथयतु ।' सञ्जयः अकथयत् - 'हे भरतश्रेष्ठ ! 'सत्ययुगं त्रेतायुगं द्वापरयुगं कलियुगं च' इति लोके चत्वारि युगानि भवन्ति । एतेषु **सर्वस्मात् पूर्वं** सत्ययुगं भवति । एतस्य युगस्य कृतयुगं सुवर्णयुगम् इत्यादीनि अपराणि नामानि अपि सन्ति । **सत्यं विना** एतस्य युगस्य कल्पना न आसीत् । सत्ययुगे मनुष्याः महाबलिनः, महान्तः, सत्त्वगुणसम्पन्नाः, बुद्धिमन्तः, धनवन्तः प्रियदर्शनाः च भवन्ति स्म । मनुष्याणां शतं सहस्रं च सन्ततयः भवन्ति स्म । ज्ञानम् एव अस्य युगस्य आधारः आसीत् । अतः उक्तम् - '**ज्ञानात् ऋते** मुक्तिः नास्ति' इति । सत्ययुगे मनुष्याणाम् आयुषः मानं चतुःसहस्रं वर्षाणि आसीत् ।

सत्ययुगस्य अनन्तरं त्रेतायुगं भवति । एतस्मिन् युगे यदा ऋषिमुनयः समस्तप्राणिनः च **असुरेभ्यः भीताः पीडिताः** च अभवन् तदा भगवान् विष्णुः स्वस्य **अनुचरैः सह** श्रीरामरूपेण पृथिव्याम् अवातरत् । त्रेतायुगे समस्तभूमण्डलस्य क्षत्रियाः अत्यन्तम् उत्साहिनः, महान्तः मनस्विनः, धर्मात्मानः, सत्यवादिनः, प्रियदर्शनाः, सुन्दरशरीरधारिणः, महापराक्रमिणः धनुर्धराः, वरयोग्याः, युद्धे अजेयाः शूरशिरोमणयः मानवरक्षकाः च भवन्ति स्म । त्रेतायुगे मनुष्याणाम् आयुः त्रिसहस्रं वर्षाणि आसीत् ।

सत्यत्रेतायुगाभ्यां परं द्वापरयुगम् आगच्छति । अस्मिन् युगे **श्रीरामेण सदृशः** अवतारपुरुषः श्रीकृष्णः अस्ति । एषः **बाल्यकालाद् आरभ्य** अधर्मविषये निरन्तरं विरुद्धकर्मशीलो भूत्वा विश्वे धर्मस्य स्थापनाम् अकरोत् । द्वापरयुगे उत्पन्नाः जनाः सर्वदा परमोत्साहिनः पराक्रमिणः परस्परं विजिगिषवः भवन्ति स्म । द्वापरयुगस्य आयुषः मानं द्विसहस्रं वर्षाणि आसीत् ।

सर्वेषां **युगानाम् अन्ते** कलियुगम् आयाति । 'हे भरतनन्दन ! **धिक् इदं कलियुगम्** । कलियुगे प्राप्तजन्मानः जनाः प्रायेण अल्प-ओजस्विनः, क्रोधिनः, लोभिनः असत्यवादिनः च भवन्ति । कलियुगप्राणिषु ईर्ष्या-मान-क्रोध-माया-दोषदृष्टि-राग-लोभादयः दोषाः तिष्ठन्ति । इदं कलियुगं बहून् सन्तापान् क्लेशान् पापानि दुर्व्यसनानि च आदाय प्रवर्तते । अस्मिन् कलियुगे आयुषः प्रमाणस्य काचिद् अपि मर्यादा न अस्ति । अत्र गर्भशिशवः अपि म्रियन्ते अथ च नवजातशिशवः अपि मृत्युम् आप्नुवन्ति ।'

❖ पदम् आश्रित्य या विभक्तिः भवति, सा **'उपपदविभक्तिः'** इति उच्यते ।

प्रथमपुस्तके वयं **सह / विना / पुरतः** इत्यादीनां पदानां प्रयोगं ज्ञातवन्तः । तेषां प्रयोगे का विभक्तिः भवति इत्यपि ज्ञातवन्तः । अधुना अस्मिन् पाठे अन्येषां केषाञ्चित् पदानां प्रयोगं जानीमः ।

१. **'धिक्'** - इति अव्ययस्य योगे द्वितीयाविभक्तिः भवति । यथा - **धिक् इदं कलियुगम् ।**

धिक् क्लेशान् । **धिक् पापम् ।**

२. **'अलम्'** - इत्यस्य वारणार्थकस्य अव्ययस्य योगे तृतीयाविभक्तिः भवति । यथा - **अलं विवादेन ।**

अलं कोलाहलेन । **अलं विषादेन ।**

ध्यातव्यम् - 'अलम्' इत्यस्य अव्ययस्य प्रयोगः पर्याप्तम् इत्यर्थे अपि भवति । तस्मिन् अर्थे यदा प्रयोगः क्रियते तदा तु चतुर्थीविभक्तिः भवति । यथा - हरिः **दैत्येभ्यः अलम् ।**

कृष्णः **कंसाय अलम् ।** भीमः **दुर्योधनाय अलम् ।**

३. तुल्यार्थकस्य **'सदृश'** इति शब्दस्य योगे तृतीयाविभक्तिः भवति । यथा - **विदुरेण सदृशः** ज्ञानी कः ?

कर्णेन सदृशः दानवीरः कः ? **युधिष्ठिरेण सदृशः** धर्मात्मा कः ?

ध्यातव्यम् - सदृशशब्दस्य योगे षष्ठीविभक्तिः अपि भवति । यथा - **अर्जुनस्य सदृशः** धनुर्धरः नास्ति ।

गङ्गायाः सदृशी पवित्रा नदी अन्या नास्ति ।

४. **'ऋते'** इति अव्ययस्य योगे पञ्चमीविभक्तिः भवति । **'विना'** इत्यस्य यः अर्थः सः एव अर्थः **'ऋते'** इति अव्ययस्य अपि । यथा - **श्रीकृष्णात् ऋते** कः रक्षकः ?

ज्ञानात् ऋते मुक्तिः नास्ति । **सत्यात् ऋते** विजयः नास्ति ।

ध्यातव्यम् - 'ऋते' अपि **त्वां** न भविष्यन्ति सर्वे । (११.३२) इति गीतायां प्रयोगः अस्ति । अत्र तु द्वितीयाविभक्तिः दृश्यते । परन्तु एषः आर्षः प्रयोगः अस्ति । अस्माभिः तु पञ्चमीविभक्तिः एव प्रयोक्तव्या ।

५. **'विना'** इति अव्ययस्य योगे द्वितीया-तृतीया-पञ्चमी-विभक्तयः भवन्ति । यथा -

कृष्णं विना वृन्दावनं शून्यम् अस्ति । **कृष्णेन विना** वृन्दावनं शून्यम् अस्ति ।

कृष्णात् विना वृन्दावनं शून्यम् अस्ति ।

६. **'पूर्वम्', 'परम्'** इति पदद्वयस्य योगे पञ्चमीविभक्तिः भवति । यथा - **युद्धात् परं** शान्तिः भवति ।

उपदेशात् पूर्वम् अर्जुनः मोहग्रस्तः आसीत् । **युद्धात् पूर्वं** सन्धिप्रयासः अभवत् ।

युद्धात् पूर्वं धृतराष्ट्रः सञ्जयं पृच्छति । **परिश्रमात् परं** सफलता लभ्यते ।

भगवद्गीतायां **विश्वरूपदर्शनयोगात् परं** भक्तियोगः अस्ति ।

अभ्यासः

१. यथोदाहरणं कोष्ठके दत्तानां पदानां साहाय्येन रिक्तस्थानानि पूरयत -

(धिक् / सह / विना / ऋते / पूर्वम् / परम् / सदृशः)

यथा - कृष्णः उक्तवान् - अलं चिन्तया।

१. अर्जुनः कृष्णेन ---------------- युद्धं जेतुं न शक्नोति।

२. कृष्णेन ----------------------- गुणवान् जगति कोऽपि नास्ति।

३. कृष्णस्य उपदेशात् ------------------- अर्जुनः निर्मोहः जातः।

४. कृष्णात् ------------ न मुक्तिः।

५. कृष्णेन ------------- अर्जुनः युद्धक्षेत्रं गच्छति।

६. स्वरूपपरिवर्तनात् ------------ घटोत्कचस्य शरीरं सामान्यं भवति स्म।

७. --------------- एतं दुष्टम्।

२. यथोदाहरणम् 'ऋते' इति पदस्य प्रयोगं कृत्वा वाक्यानि पूरयत -

यथा - क्रोधात् ऋते सम्मोहः न भवति।

१. अन्नात् ------- भूतानि न भवन्ति।

२. पर्जन्यात् ------- अन्नसम्भवः न भवति।

३. यज्ञात् ------- पर्जन्यः न भवति।

४. सङ्गात् ------- कामः न जायते।

५. कामात् ------- क्रोधः न जायते।

६. सम्मोहात् ------- स्मृतिविभ्रमः न भवति।

७. स्मृतिभ्रंशाद् ------- बुद्धिनाशः न भवति।

८. बुद्धिनाशात् ------- प्रणाशः (विनाशः) न भवति।

९. विद्यायाः ------- विनयः न भवति।

१०. विनयात् ------- पात्रता न आयाति।

११. पात्रत्वात् ------- जनः धनं न प्राप्नोति।

१२. धनात् ------- धर्मः न भवति।

१३. धर्मात् ------- सुखं न भवति।

३. यथोदाहरणं कोष्ठकस्थैः विष्णोः अवतारनामभिः कः अवतारः कस्मात् पूर्वः / परः इति लिखत -

[मत्स्यावतारः, कूर्मावतारः, वराहावतारः, नृसिंहावतारः, वामनावतारः, परशुरामावतारः, रामावतारः, कृष्णावतारः, बुद्धावतारः, कल्कि-अवतारः]

यथा - मत्स्यावतारः कूर्मावतारात् पूर्वः। | **कूर्मावतारः मत्स्यावतारात् परः।**

१. --- । --- ।

२. --- । --- ।

३. --- । --- ।

४. --- । --- ।

५. -- । -- ।

६. -- । -- ।

७. -- । -- ।

८. -- । -- ।

४. यथोदाहरणं निम्नलिखितपदैः सह '*धिक्*' इति पदं प्रयुज्य वाक्यानि लिखत -

यथा - पापी - धिक् पापिनम् । १. अहङ्कारी = ------------------------------ ।

२. मूर्खः = ---------------------------------- । ३. नास्तिकः = ------------------------------ ।

४. आत्महन्ता = --------------------------- । ५. देशद्रोही = ------------------------------- ।

५. यथोदाहरणं '*सदृशः*' इति पदस्य प्रयोगेण वाक्यानि रचयत -

गीता ⟷ उपदेशः

१.	हरिश्चन्द्रः	सत्यवादी	६.	विष्णुः	देवः
२.	अश्वत्थः	वृक्षः	७.	दधीचिः	दाता
३.	महाभारतम्	ग्रन्थः	८.	जपयज्ञः	यज्ञः
४.	विदुरः	नीतिज्ञः	९.	कृष्णः	उपदेशकः
५.	भीष्मः	दृढप्रतिज्ञः	१०.	शुकदेवः	वीतरागी

यथा - गीतया सदृशः उपदेशः नास्ति ।

१. -- ।

२. -- ।

३. -- ।

४. -- ।

५. -- ।

६. -- ।

७. -- ।

८. -- ।

९. -- ।

१०. -- ।

६. यथोदाहरणं कोष्ठके दत्तैः पदैः सह '*अलम्*' इति पदं संयोज्य वाक्यानि रचयत -

[कार्पण्यम्, व्यथा, द्वेषः, शोकः, मात्सर्यम्, पुत्रमोहः, लोभः, क्रोधः, परधर्मः, रागः, विमूढभावः]

यथा - अलं कार्पण्येन ।

१. ---------------------------- । २. ---------------------------- ।

३. ------------------------------ ।	४. ------------------------------ ।
५. ------------------------------ ।	६. ------------------------------ ।
७. ------------------------------ ।	८. ------------------------------ ।
९. ------------------------------ ।	१०. ------------------------------ ।

७. **एतान् गीताश्लोकान् सम्यक् पठत उपपदविभक्तेः प्रयोगं परिशीलयत च -**

यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् ।
कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे ॥ (श्रीमद्भग.१.२२)

कथं **भीष्ममहं** सङ्ख्ये **द्रोणं** च मधुसूदन ।
इषुभिः **प्रति** योत्स्यामि पूजार्हावरिसूदन ॥ (श्रीमद्भग.२.४)

अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे **सहैवावनिपालसङ्घैः** ।
भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि **योधमुख्यैः** ॥ (श्रीमद्भग.११.२६)

न हि **ज्ञानेन सदृशं** पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥ (श्रीमद्भग.४.३८)

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां **भोगैश्वर्यगतिं प्रति** ॥ (श्रीमद्भग.२.४३)

आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति **सदृशो मया** ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥ (श्रीमद्भग.१६.१५)

****

चन्द्रमाः अस्तम् एति

उच्चैः पठत अवगच्छत च -

कुन्ती - वत्से ! एषा प्रभातवेला । अस्यां **विवस्वान्** (सूर्यः) रक्तवर्णः सन् उदेति । **चन्द्रमाः** अस्तम् एति ।

द्रौपदी - मातः ! सत्यमेव **पक्षिणः** स्वनीडात् बहिः आगत्य आनन्देन आकाशे डयन्ते । **महात्मानः** च सन्ध्यादिकं कृत्वा **भगवन्तं** स्मरन्ति ।

युधिष्ठिरः - प्रिये ! ते **तत्त्वदर्शिनः**, तत्त्वदर्शिनः तु तत्त्वज्ञानार्थं नेत्रे निमील्य तिष्ठन्ति ।

द्रौपदी - एवम् । पश्यन्तु, **वनचरप्राणिनः** अपि **सुखिनः** भान्ति । अहो ! कियत् सुरम्यं वातावरणं वर्तते ।

कुन्ती - आम्, प्रातः **देहिनः** सहर्षं स्व-स्वकार्येषु व्यापृताः भवन्ति ।

अर्जुनः - मातः ! सत्यम् उक्तम् । किन्तु **शास्त्रविदां** चिन्तनं तु प्रातः आरभ्य जनानां शास्त्रज्ञानं कथं भवितुम् अर्हति इति, अस्मिन् विषये एव भवति ।

भीमः - इयं प्रभातवेला **रोगिणाम्** अपि आरोग्याय भवति ।

नकुलः - सत्यम्, अस्यां **भूभृतः** नूतनां योजनां निर्मान्ति । **ज्ञानिनः** आत्मज्ञानस्य कृते प्रयत्नान् विदधति । अत्र **विदुषां** पाठनम् अपि प्रचलति ।

सहदेवः - यद्यपि एतत् सर्वं सत्यम् एव तथापि **पाप्मभ्यः चौरेभ्यः** च प्रभातवेला न रोचते । यतः ते मायया **अपहृतचेतसः** सन्ति ।

युधिष्ठिरः - एतत् मनुष्यजन्म **कामधुक्** अस्ति । परन्तु **पाप्मानः** इव **आत्मवैरिणः** अस्य जन्मनः नाशं कुर्वन्तः सन्ति ।

कुन्ती - **परमात्मना** एतत् अमूल्यं जीवनम् अस्मभ्यं प्रदत्तम् अस्ति । तेन प्रातः सायम् इत्यनयोः अपि निर्माणं कृतम् । **भगवता** विस्मरणशक्त्याः निर्माणं कृत्वा तु अस्मासु **महान्** उपकारः कृतः ।

द्रौपदी - मातः ! भवत्या शोभनम् उक्तम् । एषा प्रभातवेला अस्मभ्यं नवोत्साहं ददाति । ये छात्राः अस्यां वेलायां पठन्ति, ते **विपश्चितः नीरोगिणः** च भवन्ति ।

अर्जुनः - सुभगे ! त्वया साधु उक्तम् । **सदाचारिणः** अस्याः वेलायाः सदुपयोगं कुर्वन्ति । अपि जानाति भवती, यत् **भगवान्** शिवः अपि प्रातर्वेलायां स्वगणेन सह भ्रमणं करोति । तदानीं ये जनाः कृष्णस्य आराधनायां रताः भवन्ति, ये च सत्कार्ये रताः भवन्ति, तेषां सर्वेषाम् उपरि **भगवान् पिनाकी** प्रसन्नः भूत्वा कृपायाः वर्षणं करोति इति ।

कुन्ती - अस्तु ! वयम् अपि अस्याः प्रभातवेलायाः सदुपयोगं करिष्यामः ।

अस्मिन् पाठे स्थूलाक्षरैः हलन्तपुंलिङ्गशब्दानां रूपाणि दर्शितानि सन्ति ।

अवधेयम्

➢ **हलन्तशब्दानां केषाञ्चन पदानां प्रातिपदिकं वर्णक्रमं च जानीत -**

पदम्	**प्रातिपदिकम्**	**प्रातिपदिकस्य वर्णक्रमः**
देही	देहिन्	द् + ए + ह् + इ + न्
अर्यमा	अर्यमन्	अ + र् + य् + अ + म् + अ + न्
भगवान्	भगवत्	भ् + अ + ग् + अ + व् + अ + त्
पाप्मा	पाप्मन्	प् + आ + प् + म् + अ + न्
भोगी	भोगिन्	भ् + ओ + ग् + इ + न्
विद्वान्	विद्वस्	व् + इ + द् + व् + अ + स्
तत्त्वदर्शी	तत्त्वदर्शिन्	त् + अ + त् + त् + व् + अ + द् + अ + र् + श् + इ + न्
विपश्चित्	विपश्चित्	व् + इ + प् + अ + श् + च् + इ + त्
चन्द्रमाः	चन्द्रमस्	च् + अ + न् + द् + र् + अ + म् + अ + स्
वणिक्	वणिज्	व् + अ + ण् + इ + ज्
कामधुक्	कामदुह्	क् + आ + म् + अ + द् + उ + ह्

➢ **तालिकायां दत्तानां हलन्त-पुंलिङ्ग-शब्दानां रूपाणि जानीत -**

	ज्ञानिन् (नकारान्तः)			**भगवत् (तकारान्तः)**		
विभक्तिः	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्रथमा	ज्ञानी	ज्ञानिनौ	ज्ञानिनः	भगवान्	भगवन्तौ	भगवन्तः
द्वितीया	ज्ञानिनम्	ज्ञानिनौ	ज्ञानिनः	भगवन्तम्	भगवन्तौ	भगवतः
तृतीया	ज्ञानिना	ज्ञानिभ्याम्	ज्ञानिभिः	भगवता	भगवद्भ्याम्	भगवद्भिः
चतुर्थी	ज्ञानिने	ज्ञानिभ्याम्	ज्ञानिभ्यः	भगवते	भगवद्भ्याम्	भगवद्भ्यः
पञ्चमी	ज्ञानिनः	ज्ञानिभ्याम्	ज्ञानिभ्यः	भगवतः	भगवद्भ्याम्	भगवद्भ्यः
षष्ठी	ज्ञानिनः	ज्ञानिनोः	ज्ञानिनाम्	भगवतः	भगवतोः	भगवताम्
सप्तमी	ज्ञानिनि	ज्ञानिनोः	ज्ञानिषु	भगवति	भगवतोः	भगवत्सु
सम्बोधनम्	हे ज्ञानिन् !	हे ज्ञानिनौ !	हे ज्ञानिनः !	हे भगवन् !	हे भगवन्तौ !	हे भगवन्तः !

परमात्मन् (नकारान्तः)				विद्वस् (सकारान्तः)		
प्रथमा	परमात्मा	परमात्मानौ	परमात्मानः	विद्वान्	विद्वांसौ	विद्वांसः
द्वितीया	परमात्मानम्	परमात्मानौ	परमात्मनः	विद्वांसम्	विद्वांसौ	विदुषः
तृतीया	परमात्मना	परमात्मभ्याम्	परमात्मभिः	विदुषा	विद्वद्भ्याम्	विद्वद्भिः
चतुर्थी	परमात्मने	परमात्मभ्याम्	परमात्मभ्यः	विदुषे	विद्वद्भ्याम्	विद्वद्भ्यः
पञ्चमी	परमात्मनः	परमात्मभ्याम्	परमात्मभ्यः	विदुषः	विद्वद्भ्याम्	विद्वद्भ्यः
षष्ठी	परमात्मनः	परमात्मनोः	परमात्मनाम्	विदुषः	विदुषोः	विदुषाम्
सप्तमी	परमात्मनि	परमात्मनोः	परमात्मसु	विदुषि	विदुषोः	विद्वत्सु
सम्बोधनम्	हे परमात्मन् !	हे परमात्मानौ !	हे परमात्मानः !	हे विद्वन् !	हे विद्वांसौ !	हे विद्वांसः !

कामदुह् (हकारान्तः)				भिषज् (जकारान्तः)		
विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	कामधुक्	कामदुहौ	कामदुहः	भिषक्	भिषजौ	भिषजः
द्वितीया	कामदुहम्	कामदुहौ	कामदुहः	भिषजम्	भिषजौ	भिषजः
तृतीया	कामदुहा	कामधुग्भ्याम्	कामधुग्भिः	भिषजा	भिषग्भ्याम्	भिषग्भिः
चतुर्थी	कामदुहे	कामधुग्भ्याम्	कामधुग्भ्यः	भिषजे	भिषग्भ्याम्	भिषग्भ्यः
पञ्चमी	कामदुहः	कामधुग्भ्याम्	कामधुग्भ्यः	भिषजः	भिषग्भ्याम्	भिषग्भ्यः
षष्ठी	कामदुहः	कामदुहोः	कामदुहाम्	भिषजः	भिषजोः	भिषजाम्
सप्तमी	कामदुहि	कामदुहोः	कामधुक्षु	भिषजि	भिषजोः	भिषक्षु
सम्बोधनम्	हे कामधुक् !	हे कामदुहौ !	हे कामदुहः !	हे भिषक् !	हे भिषजौ !	हे भिषजः !

सुहृद् (दकारान्तः)				चन्द्रमस् (सकारान्तः)		
प्रथमा	सुहृत्	सुहृदौ	सुहृदः	चन्द्रमाः	चन्द्रमसौ	चन्द्रमसः
द्वितीया	सुहृदम्	सुहृदौ	सुहृदः	चन्द्रमसम्	चन्द्रमसौ	चन्द्रमसः
तृतीया	सुहृदा	सुहृद्भ्याम्	सुहृद्भिः	चन्द्रमसा	चन्द्रमोभ्याम्	चन्द्रमोभिः
चतुर्थी	सुहृदे	सुहृद्भ्याम्	सुहृद्भ्यः	चन्द्रमसे	चन्द्रमोभ्याम्	चन्द्रमोभ्यः
पञ्चमी	सुहृदः	सुहृद्भ्याम्	सुहृद्भ्यः	चन्द्रमसः	चन्द्रमोभ्याम्	चन्द्रमोभ्यः

षष्ठी	सुहृदः	सुहृदोः	सुहृदाम्	चन्द्रमसः	चन्द्रमसोः	चन्द्रमसाम्
सप्तमी	सुहृदि	सुहृदोः	सुहृत्सु	चन्द्रमसि	चन्द्रमसोः	चन्द्रमस्सु
सम्बोधनम्	हे सुहृद् !	हे सुहृदौ !	हे सुहृदः !	हे चन्द्रमः !	हे चन्द्रमसौ !	हे चन्द्रमसः !

नभःस्पृश् (शकारान्तः)			
विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	नभःस्पृक्	नभःस्पृशौ	नभःस्पृशः
द्वितीया	नभःस्पृशम्	नभःस्पृशौ	नभःस्पृशः
तृतीया	नभःस्पृशा	नभःस्पृग्भ्याम्	नभःस्पृग्भिः
चतुर्थी	नभःस्पृशे	नभःस्पृग्भ्याम्	नभःस्पृग्भ्यः
पञ्चमी	नभःस्पृशः	नभःस्पृग्भ्याम्	नभःस्पृग्भ्यः
षष्ठी	नभःस्पृशः	नभःस्पृशोः	नभःस्पृशाम्
सप्तमी	नभःस्पृशि	नभःस्पृशोः	नभःस्पृक्षु
सम्बोधनम्	हे नभःस्पृक् !	हे नभःस्पृशौ !	हे नभःस्पृशः !

एतानि वाक्यानि उच्चैः पठत जानीत च -

१. **धीमता** पुत्रेण गृहं शोभते।
२. **धीमद्भ्यां** द्वारपालाभ्यां भवनं रक्ष्यते।
३. **धीमद्भिः** छात्रैः परीक्षा उत्तीर्णा।
४. सेवकः **राज्ञे** पुष्पहारं ददाति।
५. मुनिः **राजभ्याम्** आशीर्वादं ददाति।
६. साधुः **राजभ्यः** प्रसादं ददाति।

अभ्यासः

१. अधः निर्दिष्टानां पदानां बहुवचनरूपाणि दृष्ट्वा यथोदाहरणम् अन्तनिर्देशं कुरुत -

	एकवचनम्	बहुवचनम्	अन्तनिर्देशः
यथा -	**प्रोक्तवान्**	**प्रोक्तवन्तः**	**तकारान्तः**
१.	विषीदन्	विषीदन्तः	-------------
२.	कर्मयुक्	कर्मयुजः	-------------
३.	धर्मसम्मूढचेताः	धर्मसम्मूढचेतसः	-------------
४.	देही	देहिनः	-------------
५.	तत्त्वदर्शी	तत्त्वदर्शिनः	-------------

६. मनीषी मनीषिणः -------------

७. श्रीमान् श्रीमन्तः -------------

८. श्रद्धावान् श्रद्धावन्तः -------------

९. कामधुक् कामदुहः -------------

१०. आगमापायी आगमापायिनः -------------

२. अधः पदरञ्जिन्यां केषाञ्चन हलन्तशब्दानां रूपाणि निहितानि सन्ति । तानि अन्विष्य यथोदाहरणं रिक्तस्थानेषु लिखत -

श	भि	स	मा	ज	से	वी	म	न्त्री
री	ष	स	स	न्या	सी	ध	गी	प
री	क्	धु	म	का	ं न	यो	रो	रा
गु	णि	नः	हा	वा	क्ति	प	गी	आ
वि	व	स्वा	न्	भ	का	*	*	त
अ	द्वा	भा	गी	री	चा	थ्या	मी	ता
पा	प्पा	न्	*	नी	धा	दुः	स्वा	यी
यी	मा	त्मा	ज्ञा	सु	खी	क्र	*	रा
श्री	आ	आ	रो	ग्य	का	री	च	जा

यथा - १. शरीरी २. -------------- ३. -------------- ४. --------------

५. -------------- ६. -------------- ७. -------------- ८. --------------

९. -------------- १०. -------------- ११. -------------- १२. --------------

१३. -------------- १४. -------------- १५. -------------- १६. --------------

३. अधः तालिकायां प्रदत्तानां प्रातिपदिकानां निर्दिष्ट-विभक्त्यन्तानि रूपाणि लिखत -

	प्रातिपदिकम्	एकवचनम्	द्विवचनम्	बहुवचनम्
यथा -	आत्मन् (प्रथमा)	आत्मा	आत्मानौ	आत्मानः
१.	सम्बन्धिन् (द्वितीया)			
२.	वैरिन् (तृतीया)			
३.	श्रद्धावत् (चतुर्थी)			
४.	दोषभाज् (पञ्चमी)			
५.	धर्मसम्मूढचेतस् (षष्ठी)			

६.	धीमत् (सप्तमी)			
७.	महापाप्मन् (सम्बोधनम्)			
८.	महत् (तृतीया)			
९.	श्रीमत् (द्वितीया)			
१०.	महीक्षित् (षष्ठी)			
११.	पाप्मन् (प्रथमा)			
१२.	मन्त्रिन् (पञ्चमी)			
१३.	तपस्विन् (षष्ठी)			
१४.	ज्ञानवत् (सप्तमी)			
१५.	कलयत् (सप्तमी)			
१६.	शिखरिन् (षष्ठी)			
१७.	ब्रह्मवित् (सप्तमी)			
१८.	वश्यात्मन् (चतुर्थी)			

४. **तत्तत्संख्याकं गीताश्लोकं परिशील्य रिक्तस्थानेषु सुयोग्यं पदं चित्वा लिखत -**

१. पापम् एव आश्रयेद् अस्मान् हत्वा एतान् ------------------------ । (१.३६)
(अताताियिन्, आततायिनः, अतातायिनौ)

२. स्वजनं हि कथं हत्वा ------------------------ स्याम माधव । (१.३७) (सुखिनः, सुखिनौ, सुखी)

३. त्वम् आदौ इन्द्रियाणि नियम्य एतं ------------------------ प्रजहि । (३.४१)
(पाप्मानं, पाप्मानौ, पाप्मनः)

४. आत्मना ------------------------ उद्धरेत् । (६.५) (आत्मनः, आत्मानौ, आत्मानम्)

५. ------------------------ दीप्तम् अनेकवर्णं त्वां दृष्ट्वा अहं धृतिं न विन्दामि । (११.२४)
(नभस्पृशौ, नभस्पृशम्, नभस्पृशः)

६. तव ------------------------ अज्ञात्वा अहं हे सखा इति कथितवान् । (११.४१)
(महिमानः, महिमानौ, महिमानम्)

७. -------------------, -------------------, ------------------- त्वां द्रष्टुम् इच्छामि । (११.४६) (किरीटिनौ, किरीटिनः, किरीटिनम्), (गदिनौ, गदिनम्, गदिनः), (चक्रिणम् चक्रिणौ, चक्रिणः)

५. अधः तालिकासु विभक्तीनां निर्देशानुसारं यथोदाहरणं रूपाणि लिखत -

'ऋत्विज्' (जकारान्तः)

यथा - प्रथमाविभक्तिः		ऋत्विक्	ऋत्विजौ	ऋत्विजः
१.	चतुर्थीविभक्तिः	ऋत्विजे		
२.	पञ्चमीविभक्तिः		ऋत्विग्भ्याम्	

'भवत्' (तकारान्तः)

३.	तृतीयाविभक्तिः			भवद्भिः
४.	षष्ठीविभक्तिः	भवतः		
५.	सप्तमीविभक्तिः			भवत्सु

'तत्त्वविद्' (दकारान्तः)

६.	प्रथमाविभक्तिः	तत्त्वविद्		
७.	चतुर्थीविभक्तिः			तत्त्वविद्भ्यः
८.	पञ्चमीविभक्तिः		तत्त्वविद्भ्याम्	

'आत्मन्' (नकारान्तः)

९.	द्वितीयाविभक्तिः	आत्मानम्		
१०.	तृतीयाविभक्तिः			आत्मभिः
११.	सम्बोधनम्	हे आत्मन् !		

'योगिन्' (नकारान्तः)

१२.	तृतीयाविभक्तिः	योगिना		
१३.	षष्ठीविभक्तिः	योगिनः		
१४.	सप्तमीविभक्तिः			योगिसु

'विद्वस्' (सकारान्तः)

१५.	चतुर्थीविभक्तिः		विद्वद्भ्याम्	
१६.	षष्ठीविभक्तिः		विदुषोः	
१७.	सम्बोधनम्		हे विद्वांसौ !	

६. कोष्ठके प्रदत्तानां पदानां निर्दिष्टविभक्तेः रूपैः यथोदाहरणं रिक्तस्थानानि पूरयत -

यथा - <u>मरुता</u> सदृशः हनुमान्। **(मरुत् - तृतीया)**

१.	----------- तव शिष्येण व्यूढां एतां चमूं पश्य।	(धीमान् - तृतीया)
२.	---------- कालेन सः योगः नष्टः।	(महान् - तृतीया)
३.	------------- विना समाजे अराजकता प्रसरति।	(महीक्षित् - तृतीया)
४.	---------- अस्माभिः अस्मात् पापात् निवर्तितुं कथं न ज्ञेयम्?	(प्रपश्यन्तः - तृतीया)
५.	---------------- पुस्तकं ददामि।	(विद्यार्थी - चतुर्थी)
६.	------------- पुरस्कारः दीयते।	(ज्ञानी - चतुर्थी)
७.	---------- स्थलं कल्पयतु।	(ज्ञानवान् - चतुर्थी)
८.	------------ शास्त्रचर्चा रोचते।	(सम्बन्धी - चतुर्थी)
९.	------------ पुष्पाणि आनयति।	(योगिनौ - चतुर्थी)
१०.	------------ मुनिभ्यः कृष्णः मोक्षं ददाति।	(तत्त्वविदः - चतुर्थी)
११.	------------ छात्रेभ्यः विद्या दातव्या।	(श्रद्धावन्तः - चतुर्थी)
१२.	---------- पत्राणि प्रेषयन्तु।	(विद्वांसः - चतुर्थी)
१३.	सोमेशः -------------- गुरोः शिक्षां प्राप्तवान्।	(ज्ञानवान् - पञ्चमी)
१४.	राकेशः ------------ प्रेरणां प्राप्नोत्।	(धीमन्तौ - पञ्चमी)
१५.	----------- अपि योगी अधिकः श्रेष्ठः भवति।	(ज्ञानिनः - पञ्चमी)
१६.	----------- अपि योगी अधिकः श्रेष्ठः भवति।	(कर्मिणः - पञ्चमी)

७. यथोदाहरणं कर्तृक्रियापदयोः वचनं परिवर्त्य वाक्यानि लिखत -

	एकवचनप्रयोगः	बहुवचनप्रयोगः
यथा -	<u>योगी</u> शुचौ देशे <u>तिष्ठति</u>।	<u>योगिनः</u> शुचौ देशे <u>तिष्ठन्ति</u>।
१.	-------------------------------------- ।	पाण्डवाः महान्तः धनुर्धराः आसन्।
२.	एषः मम सुहृद् अस्ति।	-------------------------------------- ।
३.	-------------------------------------- ।	पुण्यकृतः धनिकाः भवन्ति।
४.	सः प्रतापवान् अस्ति।	-------------------------------------- ।
५.	-------------------------------------- ।	भवन्तः योगिनः सन्ति।
६.	दुष्कृती मूढः मां न प्रपद्यते।	-------------------------------------- ।
७.	-------------------------------------- ।	अविवेकिनः मां व्यक्तं मन्यन्ते।
८.	सः समदर्शी पण्डितः वर्तते।	-------------------------------------- ।
९.	-------------------------------------- ।	ज्ञानिनः मुक्तये प्रयतन्ते।
१०.	सः संन्यासी योगी च अस्ति।	-------------------------------------- ।

८. **यथोदाहरणं स्थूलाक्षरैः मुद्रितं पदम् आधृत्य कोष्ठके दत्तेन पदेन प्रश्ननिर्माणं कुरुत -**

(कः, के, कम्, केन, कस्य, कस्याः, कस्मिन्,)

यथा - धर्मसंस्थापनार्थाय ईश्वरः आत्मानं **सृजति ।**

धर्मसंस्थापनार्थाय ईश्वरः कं **सृजति ?**

१. **देही** नवद्वारे पुरे सुखम् आस्ते ।

-- ?

२. **विवस्वान्** मनवे प्राह ।

-- ?

३. पण्डिताः **शुनि** अपि समदर्शिनः भवन्ति ।

-- ?

४. **योगिनः** सङ्गं त्यक्त्वा कर्म कुर्वन्ति ।

-- ?

५. **ज्ञानतपसा** पूताः भक्ताः ईश्वरभावम् आगच्छन्ति ।

-- ?

६. जनकादयः **कर्मणा** सिद्धिम् अविन्दन् ।

-- ?

७. **आत्मानं** शस्त्राणि अपि न छिन्दन्ति ।

-- ?

८. यः कर्मफलम् अनाश्रितः कार्यं कर्म करोति सः **संन्यासी** भवति ।

-- ?

९. **एतेभ्यः श्लोकेभ्यः स्थूलाक्षरैः मुद्रितानि हलन्तपुंलिङ्गपदानि चित्वा रिक्तस्थाने लिखत -**

विहाय कामान्यः सर्वान्**पुमां**श्चरति निःस्पृहः ।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥ (श्रीमद्भग.२.७१)

सक्ताः कर्मण्य**विद्वांसो** यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसङ्ग्रहम् ॥ (श्रीमद्भग.३.२५)

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।
स **बुद्धिमान्**मनुष्येषु स युक्तः कृत्स्न**कर्मकृत्** ॥ (श्रीमद्भग.४.१८)

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं **ज्ञानिन**स्तत्त्व**दर्शिनः** ॥ (श्रीमद्भग.४.३४)

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स **संन्यासी** च **योगी** च न निरग्निर्न चाक्रियः ॥ (श्रीमद्भग.६.१)

चतुर्विधा भजन्ते मां जनाः **सुकृतिनो**ऽर्जुनः ।
आर्तो जिज्ञासु**रर्थार्थी ज्ञानी** च भरतर्षभ ॥ (श्रीमद्भग.७.१६)

गति**र्भर्ता** प्रभुः **साक्षी** निवासः शरणं **सुहृत्** ।
प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ॥ (श्रीमद्भग.९.१८)

द्यूतं **छलयतामस्मि तेजस्तेजस्विनाम**हम् ।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं **सत्त्ववताम**हम् ॥ (श्रीमद्भग.१०.३६)

---------------	---------------	---------------	---------------
---------------	---------------	---------------	---------------
---------------	---------------	---------------	---------------
---------------	---------------	---------------	---------------
---------------	---------------		

१०. अधः प्रदत्तेषु वाक्येषु स्थूलाक्षरैः लिखितानि सम्बोधनपदानि रिक्तस्थानेषु लिखत -

१. **हे भगवन् !** अस्मिन् वर्षे अपि प्रावृड्दर्शनं न अभवत् ।
२. **हे अविनाशिन् !** शासनम् अस्मभ्यं धनसाहाय्यं न करिष्यति ।
३. **भोः सुहृद् !** किमर्थम् एवं चिन्तयसि ?
४. **हे परमसुहृद् !** आवां कृषिविपश्चितः समीपं गच्छावः ।
५. **हे राजन् !** यथेच्छसि तथा कुरु ।
६. **हे किरीटिन् !** मां रक्ष ।

------------------------ । ---------------------------- ।
------------------------ । ---------------------------- ।
------------------------ । ---------------------------- ।

११. कोष्ठकात् उचितं विकल्पं चित्वा यथोदाहरणं वाक्यानि पूरयत -

यथा -	**<u>गुणी</u> सद्वाक्यं वदति ।**	**(गुणी / गुणिनौ / गुणिनः)**
१.	------------------- पराक्रमं दर्शयति ।	(वीर्यवान् / वीर्यवन्तम् / वीर्यवन्तः)
२.	------------------- हन्तुं योग्याः न ।	(सम्बन्धिनम् / सम्बन्धिनौ / सम्बन्धिनः)
३.	------------------- देवेन सदृशः भवति ।	(राजा / राज्ञः / राजानः)
४.	------------------- गीतां न पठन्ति ।	(अपहृतचेताः / अपहृतचेतसौ / अपहृतचेतसः)
५.	------------------- पराक्रमी अस्ति ।	(अश्वत्थामा / अश्वत्थामानौ / अश्वत्थाम्नः)
६.	------------------- सर्वत्र पूज्येते ।	(विद्वान् / विद्वांसौ / विदुषः)
७.	------------------- कार्ये निरताः सन्ति ।	(धीमान् / धीमतः / धीमन्तः)
८.	------------------- वैभवशाली अस्ति ।	(सम्राजः / सम्राजौ / सम्राट्)
९.	------------------- नित्यः अस्ति ।	(शरीरिणः / शरीरी / शरीरिणम्)
१०.	------------------- भक्तिं पश्यति ।	(भगवान् / भगवता / भगवन्तः)

३

हिमालयात् सरित् प्रवहति

हलन्तस्त्रीलिङ्गशब्दाः

अधः प्रदत्तानि वाक्यानि उच्चैः पठत अवगच्छत च -

हिमालयात् **सरित्** प्रवहति।

आकाशे **तडित्** अस्ति।

श्रीकृष्णः **स्रजा** शोभते।

उपनिषत्सु ब्रह्मज्ञानं वर्तते।



पूर्वदिशि सूर्यः उदेति।



कृष्णः द्रौपदीं **विपदः** रक्षति।



धृतराष्ट्रः **परिषदम्** आगच्छति।

कृष्णस्य **वाचा** अर्जुनः तुष्यति।



प्रातः सूर्यस्य **भाः** उग्रा न भवति।

भारतस्य **संसद्** राजते।

कुन्ती **आशिषे** भीष्मं नमति।

शिष्यः **समिधः** आनयति।

उपरि प्रयुक्तेषु वाक्येषु हलन्तस्त्रीलिङ्गशब्दानां प्रयोगः कृतः अस्ति।

अवधेयम्

पठत अवगच्छत च -

प्रथमाविभक्तिः				
प्रातिपदिकम्	**अन्तः**	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
वाच् (स्त्री.)	चकारान्तः	वाक्	वाचौ	वाचः
सरित् (स्त्री.)	तकारान्तः	सरित्	सरितौ	सरितः
तडित् (स्त्री.)	तकारान्तः	तडित्	तडितौ	तडितः
विपद् (स्त्री.)	दकारान्तः	विपत्	विपदौ	विपदः
आपद् (स्त्री.)	दकारान्तः	आपत्	आपदौ	आपदः
सम्पद् (स्त्री.)	दकारान्तः	सम्पत्	सम्पदौ	सम्पदः
संसद् (स्त्री.)	दकारान्तः	संसत्	संसदौ	संसदः
गिर् (स्त्री.)	रेफान्तः	गीः	गिरौ	गिरः
भास् (स्त्री.)	सकारान्तः	भाः	भासौ	भासः
दिश् (स्त्री.)	शकारान्तः	दिक्	दिशौ	दिशः
आशिस् (स्त्री.)	सकारान्तः	आशीः	आशिषौ	आशिषः

	सरित् (तकारान्तः)			वाच् (चकारान्तः)		
विभक्तिः	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्रथमा	सरित्	सरितौ	सरितः	वाक्	वाचौ	वाचः
द्वितीया	सरितम्	सरितौ	सरितः	वाचम्	वाचौ	वाचः
तृतीया	सरिता	सरिद्भ्याम्	सरिद्भिः	वाचा	वाग्भ्याम्	वाग्भिः
चतुर्थी	सरिते	सरिद्भ्याम्	सरिद्भ्यः	वाचे	वाग्भ्याम्	वाग्भ्यः
पञ्चमी	सरितः	सरिद्भ्याम्	सरिद्भ्यः	वाचः	वाग्भ्याम्	वाग्भ्यः
षष्ठी	सरितः	सरितोः	सरिताम्	वाचः	वाचोः	वाचाम्
सप्तमी	सरिति	सरितोः	सरित्सु	वाचि	वाचोः	वाक्षु
सम्बोधनम्	हे सरित् !	हे सरितौ !	हे सरितः !	हे वाक् !	हे वाचौ !	हे वाचः !

गिर् (रेफान्तः)				भास् (सकारान्तः)		
प्रथमा	गीः	गिरौ	गिरः	भाः	भासौ	भासः
द्वितीया	गिरम्	गिरौ	गिरः	भासम्	भासौ	भासः
तृतीया	गिरा	गीर्भ्याम्	गीर्भिः	भासा	भार्भ्याम्	भार्भिः
चतुर्थी	गिरे	गीर्भ्याम्	गीर्भ्यः	भासे	भार्भ्याम्	भार्भ्यः
पञ्चमी	गिरः	गीर्भ्याम्	गीर्भ्यः	भासः	भार्भ्याम्	भार्भ्यः
षष्ठी	गिरः	गिरोः	गिराम्	भासः	भासोः	भासाम्
सप्तमी	गिरि	गिरोः	गीर्षु	भासि	भासोः	भाःसु
सम्बोधनम्	हे गीः !	हे गिरौ !	हे गिरः !	हे भाः !	हे भासौ !	हे भासः !
दिश् (शकारान्तः)				सम्पद् (दकारान्तः)		
प्रथमा	दिक्	दिशौ	दिशः	सम्पत्	सम्पदौ	सम्पदः
द्वितीया	दिशम्	दिशौ	दिशः	सम्पदम्	सम्पदौ	सम्पदः
तृतीया	दिशा	दिग्भ्याम्	दिग्भिः	सम्पदा	सम्पद्भ्याम्	सम्पद्भिः
चतुर्थी	दिशे	दिग्भ्याम्	दिग्भ्यः	सम्पदे	सम्पद्भ्याम्	सम्पद्भ्यः
पञ्चमी	दिशः	दिग्भ्याम्	दिग्भ्यः	सम्पदः	सम्पद्भ्याम्	सम्पद्भ्यः
षष्ठी	दिशः	दिशोः	दिशाम्	सम्पदः	सम्पदोः	सम्पदाम्
सप्तमी	दिशि	दिशोः	दिक्षु	सम्पदि	सम्पदोः	सम्पत्सु
सम्बोधनम्	हे दिक् !	हे दिशौ !	हे दिशः !	हे सम्पत् !	हे सम्पदौ !	हे सम्पदः !

अभ्यासः

१. तालिकायां निर्दिष्टां विभक्तिम् अनुसृत्य यथोदाहरणं रूपाणि लिखत -

प्रातिपदिकम्	एकवचनम्	द्विवचनम्	बहुवचनम्
वाच् (प्रथमा)	वाक्	वाचौ	वाचः
सरित् (द्वितीया)			
तडित् (तृतीया)			

विपद् (चतुर्थी)			
स्रज् (पञ्चमी)			
आशिस् (षष्ठी)			
आपद् (सप्तमी)			
दिश् (सम्बोधनम्)			
गिर् (तृतीया)			

२. यथोदाहरणं 'अ'भागे प्रदत्तानि पदानि 'ब'भागे दत्तैः समानार्थकैः पदैः सह मेलयत -

	'अ'	'ब'
यथा -	१. स्रक्	नदी
	२. अद्भ्यः	सभायै
	३. दिक्षु	वाणीम्
	४. सरित्	दिशासु
	५. परिषदे	आशीर्वादस्य
	६. आशिषः	जलेभ्यः
	७. गिरम्	वाण्या
	८. भाः	विपत्तौ
	९. वाचा	प्रकाशः
	१०. विपदि	माला

३. कोष्ठके दत्तेषु शब्देषु उचितविभक्तिं योजयित्वा रिक्तस्थानानि पूरयत -

१. पूर्वपक्षप्रतिपक्षयोः निर्णयार्थं भारते पण्डितानां ---------------- भवन्ति स्म। (परिषत्)

२. यस्य उपरि गुरोः ------------ भवति तस्य सर्वदा विजयः भवति। (आशिष्)

३. ज्ञानम् एव मनुष्याणां वास्तविकी ------------- अस्ति। (सम्पत्)

४. ज्येष्ठानां ----------- श्रुत्वा युवानः धीराः भवन्ति। (वाच्)

५. बदरीनाथक्षेत्रे ----------------- प्रवाहः अधिकः भवति। (सरित्)

६. वर्षाकाले --------------- बालाः भीताः भवन्ति। (तडित्)

७. चतसृषु -------------------- जयघोषः श्रूयते। (दिक्)

८. गन्धर्वलोके -------------------- वसन्ति इति काव्येषु वर्णनम् अस्ति। (अप्सरस्)

९. वर्षानन्तरं तडागाः ------------------- पूरिताः भवन्ति। (अप्)

१०. यदा संशयः भवति तदा ज्येष्ठानां ------------------ प्रमाणं भवति । (वाच्)

११. ----------- वा ---------- वा सज्जनानां स्वभावः न परिवर्तते । (सम्पद्, विपद्)

१२. स्पष्टया ------------- श्रोतारः तुष्टाः भवन्ति । (गिर्)

१३. भारतीयानां ज्ञानस्य ------------------- विश्वे प्रसृताः सन्ति । (भास्)

४. अधः तालिकासु निर्दिष्टविभक्तीनाम् अनुसारं यथोदाहरणं रूपाणि लिखत -

१. आशिस् (सकारान्तः)

प्रथमाविभक्तिः	आशीः	आशिषौ	आशिषः
चतुर्थीविभक्तिः			आशीर्भ्यः
पञ्चमीविभक्तिः	आशिषः		

२. सरित् (तकारान्तः)

तृतीयाविभक्तिः			सरिद्भिः
षष्ठीविभक्तिः	सरितः		
सप्तमीविभक्तिः		सरितोः	

३. गिर् (रेफान्तः)

प्रथमाविभक्तिः	गीः		
चतुर्थीविभक्तिः			गीर्भ्यः
पञ्चमीविभक्तिः		गीर्भ्याम्	

४. दिश् (शकारान्तः)

द्वितीयाविभक्तिः		दिशौ	
तृतीयाविभक्तिः			दिग्भिः
सम्बोधनम्	हे दिक् !		

५. भास् (सकारान्तः)

तृतीयाविभक्तिः	भासा		
षष्ठीविभक्तिः		भासोः	
सप्तमीविभक्तिः			भास्सु

६. भिषज् (जकारान्तः)

चतुर्थीविभक्तिः		भिषग्भ्याम्	
षष्ठीविभक्तिः		भिषजोः	
सम्बोधनम्		हे भिषजौ !	

७. शरद् (दकारान्तः)

द्वितीयाविभक्तिः	शरदम्		
षष्ठीविभक्तिः		शरदोः	
सम्बोधनम्		हे शरदौ !	

८. तडित् (तकारान्तः)

तृतीयाविभक्तिः	तडिता		
पञ्चमीविभक्तिः		तडिद्भ्याम्	
सप्तमी		तडितोः	

९. संसद् (दकारान्तः)

चतुर्थीविभक्तिः		संसद्भ्याम्	
षष्ठीविभक्तिः		संसदोः	
सम्बोधनम्		हे संसदौ !	

५. एतान् श्लोकान् पठत अत्र प्रयुक्तानि हलन्तस्त्रीलिङ्ग-पदानि परिशीलयत च -

यामिमां पुष्पितां **वाचं** प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥ (श्रीमद्भग.२.४२)

मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम् ।
कीर्तिः श्री**र्वाक्च** नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥ (श्रीमद्भग.१०.३४)

गाण्डीवं स्रंसते हस्तात् त्वक्चैव परिदह्यते ।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥ (श्रीमद्भग.१.३०)

दैवी **सम्पद्विमोक्षाय** निबन्धायासुरी मता ।
मा शुचः **सम्पदं** दैवीमभिजातोऽसि पाण्डव ॥ (श्रीमद्भग.१६.५)

****

तपसः बलम्

हलन्तनपुंसकलिङ्गशब्दाः

४

एतां कथां पठत अवगच्छत च -

मृकण्डुऋषेः पुत्रः मार्कण्डेयः । सः **तपसा** भगवन्तौ नरनारायणौ तोषितवान् । मार्कण्डेयस्य कठिनं **तपः** दृष्ट्वा नरनारायणौ आश्रमं प्रति आगतवन्तौ । तपस्विना मार्कण्डेयेन तौ अर्घ्यपाद्यादिना सत्कृतौ । तदा भगवद्भ्याम् उक्तम् - "मार्कण्डेय ! भवतः **तपसा** आवां तुष्टौ स्वः । भवान् वरं याचताम्" इति ।

मार्कण्डेयेन वरः याचितः - "प्रभो ! अहं भवतोः मायां द्रष्टुम् इच्छामि" इति ।

ताभ्याम् उक्तम् - "तथैव भवतु" इत्युक्त्वा तस्य मार्कण्डेयस्य कठिनाय **तपसे** तस्मै आशीर्वादं प्रदत्तवन्तौ । आशीर्वादं प्राप्य मुनेः **मनः** प्रसन्नम् अभवत् । ततः नरनारायणौ अन्तर्हितौ अभवताम् ।

एकदा मार्कण्डेयः **पुष्पभद्रासरसः** अनतिदूरे सायङ्काले सन्ध्यार्थम् उपविष्टः आसीत् । तदा सः दृष्टवान् यत् चतुर्दिग्भ्यः समुद्रः सीमानम् उल्लङ्घ्य भूमिम् आवृणोत् । क्षणाभ्यन्तरे समग्रं **जगत्** जलमयम् अभवत् । मुनिं मार्कण्डेयं विहाय संसारे न कोऽपि अवशिष्टः । सर्वत्र **तमः** व्यापृतम् आसीत् । **तमसः** प्रभावेण सः मुनिः सूर्यचन्द्रमोभ्याम् अपि प्रकाशं न प्राप्तवान् । अतः सः **तमसः** भीतः अभवत् । क्षुधया पिपासया च पीडितः अभवत् । तस्मिन् एव काले सः पृथिव्याः ककुदि उत्तमौजसम् एकं न्यग्रोधवृक्षं दृष्टवान् । तस्य वृक्षस्य एकस्मिन् पर्णपुटके कान्तिमन्तम् एकं बालकम् अपि दृष्टवान् । प्रसन्नेन **चेतसा** मुनिः तस्य समीपं गतवान् । यावत् मुनिः तं बालकं किमपि प्रष्टुम् इष्टवान् तावत् शिशोः श्वसितेन सः तस्य शरीरस्य अन्तः तथा प्राविशत्, यथा कश्चन मशकः इति ।

अहो आश्चर्यम् ! अन्तः प्रविष्टवता तेन दृश्यते यत् तत्र सर्वमपि पूर्ववत् अस्ति । स्वस्य **सद्म** अपि । **सद्मनः** वेदध्वनिः अपि आगच्छन् आसीत् । सः तत्र समग्रं **जगत्** दृष्टवान् । कस्यचित् कालस्य अनन्तरं शिशोः श्वसितेन सः बहिः आगत्य पुनः लयाब्धौ न्यपतत् । तदानीम् उत्तमौजसः वृक्षात् बालकः अन्तर्हितः अभवत्, न्यग्रोधवृक्षः अपि । किञ्चित् क्षणानन्तरं मुनिः आत्मानं पूर्ववत् **पुष्पभद्रासरितः** अनतिदूरे स्थितम् अपश्यत् । प्रलयः समाप्तः । ईदृशी आसीत् भगवतः माया । **तपसः** बलेन मार्कण्डेयस्य इच्छा पूर्णा अभवत् ।

पठत अवगच्छत च -

प्रथमाविभक्तिः				
प्रातिपदिकम्	अन्तः	एकवचनम्	द्विवचनम्	बहुवचनम्
तपस्	सकारान्तः	तपः	तपसी	तपांसि
मनस्	सकारान्तः	मनः	मनसी	मनांसि
यशस्	सकारान्तः	यशः	यशसी	यशांसि
धनुस्	सकारान्त	धनुः	धनुषी	धनूंषि
हविस्	सकारान्तः	हविः	हविषी	हवींषि
चक्षुस्	सकारान्तः	चक्षुः	चक्षुषी	चक्षूंषि
जगत्	तकारान्तः	जगत्	जगती	जगन्ति
महत्	तकारान्तः	महत्	महती	महन्ति
बृहत्	तकारान्तः	बृहत्	बृहती	बृहन्ति
हृद्	दकारान्तः	हृत्	हृदी	हृन्दि
सामन्	नकारान्तः	साम	सामनी	सामानि
नामन्	नकारान्तः	नाम	नामनी	नामानि
कर्मन्	नकारान्तः	कर्म	कर्मणी	कर्माणि
अहन्	नकारान्तः	अहः	अहनी	अहानि

	जगत् (तकारान्तः)			तपस् (सकारान्तः)		
विभक्तिः	एकवचनम्	द्विवचनम्	बहुवच	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	जगत्	जगती	जगन्ति	तपः	तपसी	तपांसि
द्वितीया	जगत्	जगती	जगन्ति	तपः	तपसी	तपांसि
तृतीया	जगता	जगद्भ्याम्	जगद्भिः	तपसा	तपोभ्याम्	तपोभिः
चतुर्थी	जगते	जगद्भ्याम्	जगद्भ्यः	तपसे	तपोभ्याम्	तपोभ्यः
पञ्चमी	जगतः	जगद्भ्याम्	जगद्भ्यः	तपसः	तपोभ्याम्	तपोभ्यः
षष्ठी	जगतः	जगतोः	जगताम्	तपसः	तपसोः	तपसाम्

सप्तमी	जगति	जगतोः	जगत्सु	तपसि	तपसोः	तपःसु
सम्बोधनम्	हे जगत् !	हे जगती !	हे जगन्ति !	हे तपः !	हे तपसी !	हे तपांसि !
नामन् (नकारान्तः)				धनुस् (सकारान्तः)		
प्रथमा	नाम	नामनी/नाम्नी	नामानि	धनुः	धनुषी	धनूंषि
द्वितीया	नाम	नामनी/नाम्नी	नामानि	धनुः	धनुषी	धनूंषि
तृतीया	नाम्ना	नामभ्याम्	नामभिः	धनुषा	धनुर्भ्याम्	धनुर्भिः
चतुर्थी	नाम्ने	नामभ्याम्	नामभ्यः	धनुषे	धनुर्भ्याम्	धनुर्भ्यः
पञ्चमी	नाम्नः	नामभ्याम्	नामभ्यः	धनुषः	धनुर्भ्याम्	धनुर्भ्यः
षष्ठी	नाम्नः	नाम्नोः	नाम्नाम्	धनुषः	धनुषोः	धनुषाम्
सप्तमी	नाम्नि/नामनि	नाम्नोः	नामसु	धनुषि	धनुषोः	धनुःषु /धनुष्षु
सम्बोधनम्	हे नाम/नामन् !	हे नामनी !	हे नामानि !	हे धनुः !	हे धनुषी !	हे धनूंषि !
यशस् (सकारान्तः)				चक्षुस् (सकारान्तः)		
प्रथमा	यशः	यशसी	यशांसि	चक्षुः	चक्षुषी	चक्षूंषि
द्वितीया	यशः	यशसी	यशांसि	चक्षुः	चक्षुषी	चक्षूंषि
तृतीया	यशसा	यशोभ्याम्	यशोभिः	चक्षुषा	चक्षुर्भ्याम्	चक्षुर्भिः
चतुर्थी	यशसे	यशोभ्याम्	यशोभ्यः	चक्षुषे	चक्षुर्भ्याम्	चक्षुर्भ्यः
पञ्चमी	यशसः	यशोभ्याम्	यशोभ्यः	चक्षुषः	चक्षुर्भ्याम्	चक्षुर्भ्यः
षष्ठी	यशसः	यशसोः	यशसाम्	चक्षुषः	चक्षुषोः	चक्षुषाम्
सप्तमी	यशसि	यशसोः	यशस्सु	चक्षुषि	चक्षुषोः	चक्षुःषु
सम्बोधनम्	हे यशः !	हे यशसी !	हे यशांसि !	हे चक्षुः !	हे चक्षुषी !	हे चक्षूंषि !

अभ्यासः

१. यथोदाहरणम् अधः प्रदत्तानां पदानां प्रातिपदिकं विभक्तिं वचनं च लिखत -

			प्रातिपदिकम्	विभक्तिः	वचनम्
यथा -	पयः	-	पयस्	प्रथमाविभक्तिः	एकवचनम्
१.	श्रेयांसि		----------	----------------	-----------
२.	वाससा	-	----------	----------------	-----------

३.	रजसे	-	-----------	-----------------	-----------
४.	तमसः	-	-----------	-----------------	-----------
५.	सद्मानि	-	-----------	-----------------	-----------
६.	वेश्मसु	-	-----------	-----------------	-----------
७.	धाम्नाम्	-	-----------	-----------------	-----------
८.	हृदि	-	-----------	-----------------	-----------
९.	चक्षुषी	-	-----------	-----------------	-----------
१०.	शकृन्ति	-	-----------	-----------------	-----------

२. यथोदाहरणं कोष्ठके दत्तानां हलन्तनपुंसकलिङ्गशब्दानाम् उचितविभक्तिरूपैः रिक्तस्थानानि पूरयत -

यथा - द्वारकायां सुन्दराणि सद्मानि सन्ति । (सद्मन्)

१. हरिणस्य ----------------------- सुन्दरे भवतः । (चक्षुस्)
२. श्रीकृष्णस्य --------------------- अर्थपूर्णानि सन्ति । (वचस्)
३. जगति कृष्णस्य ------------------- कः न जानाति ? (नामन्)
४. ऋत्विजः अग्नौ --------------------- अर्पणं कुर्वन्ति । (हविस्)
५. महाभारतयुद्धम् अष्टादश --------------------- प्रावर्तत । (अहन्)
६. दुर्योधनस्य --------------------- दूषितम् आसीत् । (मनस्)
७. सतां ------------------- निश्छलानि भवन्ति । (चेतस्)
८. महानगरे ------------------- उन्नतानि भवन्ति । (वेश्मन्)
९. शिवस्य --------------------- नाम पिनाकः अस्ति । (धनुस्)
१०. अष्टादशपुराणेषु व्यासस्य मुख्ये द्वे ---------------- स्तः । (वचस्)

३. कोष्ठकस्थानां सङ्ख्यानाम् आधारेण गीताश्लोकान् परिशील्य तेभ्यः श्लोकेभ्यः सुयोग्यं पदं चित्वा रिक्तस्थानेषु लिखत -

१. इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं ------------------- । (२.६०) (मनसि, मनांसि, मनः)
२. त्वं नियतं ------------------- कुरु । यतो हि अकर्मणः अपेक्षया कर्म ज्यायः भवति । (३.८)
(कर्माणि, कर्म, कर्मणी)
३. यः ------------------- ब्रह्मणि आधाय कार्यं करोति सः पापेन न लिप्यते । (५.१०)
(कर्माणि, कर्म, कर्मणी)
४. नरः जीर्णानि ------------------- विहाय नवानि गृह्णाति । (२.२२) (वासः, वाससि, वासांसि)
५. तस्मात् त्वम् उत्तिष्ठ ------------------- लभस्व । (११.३३) (यशः, यशसि, यशांसि)

४. **कोष्ठके दत्तेषु पदेषु उचितां विभक्तिं योजयित्वा रिक्तस्थानानि पूरयत -**

१.	भवतः -------------------- इदं विश्वं तपति।	(तेजः)
२.	-------------------- अपि मां द्रष्टुं न शक्नोति, यथा भवान् दृष्टवान्।	(तपः)
३.	यः मां जानाति सः -------------------- न बध्यते।	(कर्माणि)
४.	सः -------------------- भगवन्तौ नरनारायणौ तोषितवान्।	(तपः)
५.	भवतः -------------------- आवां तुष्टौ स्वः।	(तपः)
६.	प्रसन्नेन -------------------- मुनिना भगवतः आशीः प्राप्ता।	(मनः)
७.	सः -------------------- भीतः अभवत्।	(तमः)
८.	-------------------- वेदध्वनिः अपि आगच्छन् आसीत्।	(सद्म)
९.	अर्जुनः -------------------- शरान् त्यजति।	(धनुः)
१०.	-------------------- विद्युत् पतति।	(वियत्)
११.	मनुष्यः -------------------- पूर्वं फलं न प्राप्नोति।	(कर्म)
१२.	-------------------- अश्रूणि निस्सरन्ति।	(चक्षुषी)
१३.	गहना -------------------- गतिः।	(कर्म)
१४.	जनकादयः -------------------- सिद्धिम् अविन्दन्।	(कर्म)

५. **अधः गीतायाः श्लोकेषु प्रयुक्तानां हलन्त-नपुंसकलिङ्ग-शब्दानां विभक्तिं वचनं च विलिख्य तेषां सप्तमीविभक्त्यन्तानि रूपाणि लिखत -**

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम्।
सेनानीनामहं स्कन्दः **सरसामस्मि** सागरः॥ (१०.२४)

पवनः पवतामस्मि रामः शस्त्रभृतामहम्।
झषाणां मकरश्चास्मि **स्रोतसामस्मि** जाह्नवी॥ (१०.३१)

बृहत्साम तथा **साम्नां** गायत्री **छन्दसामहम्**।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः॥ (१०.३५)

सर्वद्वाराणि संयम्य **मनो** हृदि निरुध्य च।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणम्॥ (८.१२)

ब्रह्मार्पणं **ब्रह्म** हवि**र्ब्रह्मा**ग्नौ **ब्रह्मणा** हुतम्।
ब्रह्मैव तेन गन्तव्यं **ब्रह्मकर्म**समाधिना॥ (४.२४)

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्॥ (१०.४१)

हलन्तशब्दाः	विभक्तिः	वचनम्	सप्तमीविभक्त्यन्तानि रूपाणि
सरस्	षष्ठी	बहुवचनम्	सरसि

६. अधः प्रदत्तानां हलन्तनपुंसकलिङ्गशब्दानां वचनानुसारं सम्बोधनरूपाणि लिखत -

	शब्दः	वचनम्	सम्बोधनम्		शब्दः	वचनम्	सम्बोधनम्
यथा -	तपस्	एकवचनम्	हे तपः !				
१.	यशस्	बहुवचनम्	--------------	२.	धनुस्	बहुवचनम्	--------------
३.	हविस्	एकवचनम्	--------------	४.	चक्षुस्	बहुवचनम्	--------------
५.	जगत्	द्विवचनम्	--------------	६.	महत्	बहुवचनम्	--------------
७.	बृहत्	एकवचनम्	--------------	८.	हृद्	द्विवचनम्	--------------
९.	सामन्	एकवचनम्	--------------	१०.	नामन्	द्विवचनम्	--------------
११.	कर्मन्	एकवचनम्	--------------	१२.	अहन्	द्विवचनम्	--------------

७. कोष्ठके प्रदत्तेषु शब्देषु उचितविभक्तिं योजयित्वा रिक्तस्थानानि पूरयत -

१. सर्वद्वाराणि संयम्य **मनः हृदि** निरुध्य तिष्ठति। (मनस्, हृद्) (श्रीमद्भग.८.१२)

२. यज्ञाय आचरतः -------------- समग्रं प्रविलीयते। (कर्मन्) (श्रीमद्भग. ४.२३)

३. तेजस्विनां ------------- अस्मि। (तेजस्) (श्रीमद्भग.१०.३६)

४. येन अहं --------------- आप्नुयाम्। (श्रेयस्) (श्रीमद्भग.३.२)

५. --------------- स्वर्गलोकम् आप्नुवन्ति। (उत्तमविद्) (श्रीमद्भग.१४.१४)

६. -------------------- वित्तेशः अस्मि । (यक्षरक्षस्) (श्रीमद्भग.१०.२३)

७. ------------------ अहं वरुणः अस्मि । (यादस्) (श्रीमद्भग.१०. २९)

८. गायत्री --------------- अस्मि । (छन्दस्) (श्रीमद्भग.१०.३५)

९. ------------- जाह्नवी अस्मि । (स्रोतस्) (श्रीमद्भग.१०.३१)

१०. ------------------- मत्तः एव भवन्ति । (तपस्) (श्रीमद्भग.१०.५)

अमरकोषः

अमरसिंहेन विरचितः '**अमरकोषः**' संस्कृतकोषग्रन्थेषु सर्वोत्तमः मन्यते । अस्मिन् त्रीणि काण्डानि पञ्चविंशतिः वर्गाः च सन्ति । अत्र एकस्य शब्दस्य अनेकानि पर्यायपदानि लिङ्गानुगुणं दत्तानि सन्ति । कानिचित् पद्यानि अत्र दीयन्ते -

गृहम्

१. गृहं गेहोदवसितं वेश्म सद्म निकेतनम् ।
निशान्त-पस्त्य-सदनं भवनागार-मन्दिरम् ।
गृहाः पुंसि च भूम्न्येव निकाय्य-निलयाऽऽलयाः ॥ (अमरकोषः २.२. ४, ५)

गृहम्, गेहः, उदवसितम्, वेश्म, सद्म, निकेतनम्, निशान्तम्, पस्त्यम्, सदनम्, भवनम्, आगारम्, मन्दिरम्, गृहाः, निकाय्यः, निलयः, आलयः - इति गृहस्य षोडश नामानि ।

कलेवरम्

२. गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ॥
कायो देहः क्लीब-पुंसोः स्त्रियां मूर्तिस्तनुस्तनूः ॥ (अमरकोषः २.६. ७० ,७१)

कलेवरम्, गात्रम्, वपुः, संहननम्, शरीरम्, वर्ष्म, विग्रहः, कायः, देहः / देहम्, मूर्तिः, तनुः, तनूः - इति देहस्य द्वादश नामानि ।

शिरः

३. उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम् ॥ (अमरकोषः २.६.९५)

उत्तमाङ्गम्, शिरः, शीर्षम्, मूर्धा, मस्तकम् / मस्तकः - इति शिरसः पञ्च नामानि ।

****

व्यूहनिर्माणम्

एतां कथाम् उच्चैः पठत -



महाराजः धृतराष्ट्रः महाभारतयुद्धस्य चतुर्थदिनस्य **घटनायाः** **वर्णनं** श्रावयितुं सञ्जयं कथयति। सञ्जयः वदति - हे भारत ! यदा रात्रिः अतीता प्रभातकालः च अभवत् तदा **भरतवंशिनाम्** अग्रभागे स्थितः भीष्मपितामहः **समग्रसेनया** आवृतो भूत्वा शत्रुभिः सह योद्धुं **प्रस्थानम्** अकरोत्। **तस्मिन्** समये भीष्मस्य **मनसि शत्रून्** प्रति **महान्** क्रोधः आसीत्। अनेन सह **द्रोणः** **दुर्योधनः** बाह्लिकः **दुर्मर्षणः** **चित्रसेनः** महाबलशाली जयद्रथः **अन्ये** अपि **राजानः** च विशाल-**वाहिनी**-सहिताः प्रस्थिताः। महारथिभिः **नरपतिभिश्च** आवृतः राजा **दुर्योधनः** **वज्रपाणिः** **इन्द्रः** इव शोभते स्म।

नद्याः **भयानकवेगवत्** **शान्तनुनन्दनेन** **भीष्मेण** सुरक्षिता इयं **कौरवसेना** **रणभूमौ** **अर्जुनम्** उद्दिश्य सहसा प्राचलत्। महात्मा कपिध्वजः **अर्जुनः** दूरात् एव **व्यालनामके** व्यूहे आबद्धाम् अनेकप्रकारेण **दृश्यमानां** **सेनाम्** अपश्यत्। **सेनायाः** व्यूहः महतां **मेघानां** घटा इव भाति स्म। **तदनन्तरं** **नरश्रेष्ठः** **अर्जुनः** समस्त-शत्रुपक्षीय-**युवकानां** वधस्य संकल्पं कृत्वा श्वेताश्वैः युक्तं रथम् आरुह्य **शत्रुसेनया** योद्धुं प्राचलत्।

लोकविख्यातः महारथी किरीटधारी अर्जुनः **अस्त्रशस्त्राणि** स्वीकृत्य यां सेनां नयति स्म, तस्याः सेनायाः प्रत्येकस्यां दिशि चतुस्सहस्रगजाः तत्तत्स्थाने स्थिरीकृताः आसन्, तं व्यूहराजम् अर्जुनं तव सेना अपश्यत्।

सञ्जयः अवदत् - **हे राजन् !** **कुरुश्रेष्ठेन** **धर्मराजयुधिष्ठिरेण** यादृशः व्यूहः **प्रथमदिने** रचितः तादृशः एव व्यूहः अयम् अपि आसीत्। तादृशः व्यूहः **अस्मिन्** भूतले **मनुष्याणां** **सेनायां** न तु पूर्वं कदापि श्रुतः न च **केनापि** दृष्टः आसीत् इति।

अवधेयम्

अस्यां कथायां स्थूलाक्षरैः प्रदर्शितेषु पदेषु 'णकारः' वर्तते । परन्तु अन्येषु अधोरेखाङ्कितेषु पदेषु 'नकारः' वर्तते । यथा -

णकारसहितम्			नकारसहितम्	
व्यूहनिर्माणम्	रणभूमौ		घटनायाः	शत्रून्
वर्णनम्	अनेकप्रकारेण		भरतवंशिनाम्	महान्
द्रोणः	अस्त्रशस्त्राणि		समग्रसेनायाः	दुर्योधनः
दुर्मषणः	धर्मराजयुधिष्ठिरेण		प्रस्थानम्	कौरवसेना
वज्रपाणिः	मनुष्याणाम्		तस्मिन्	अर्जुनः
भीष्मेण			मनसि	

एतादृशः भेदः किमर्थम् इति ज्ञातुं पूर्वम् अस्माभिः अखण्डं पदं किम् ? एवञ्च सखण्डं पदं किम् ? इति ज्ञातव्यम् ।

- अखण्डं पदं नाम समासरहितं पदम् । यथा - **कृष्णेन, ऋषिणा, तिसृणाम्** इत्यादीनि ।
- सखण्डं पदं नाम समासयुक्तं पदम् । यथा - **प्रयोगेण, कार्यक्रमाणाम्, स्वधर्मेण** इत्यादीनि ।

अभ्यासः

१. मञ्जूषायां दत्तेभ्यः पदेभ्यः अखण्डपदानि सखण्डपदानि च पृथक्कृत्वा लिखत -

अरण्यम्, क्षेत्राणि, पाण्डुपुत्राणाम् (१.३), धार्तराष्ट्राणाम् (१.१९), प्रणश्यन्ति (१.४०), मनुष्याणाम् (७.३), शस्त्रपाणयः (१.४६), कुलधर्मेण, कार्पण्यम् (२.७), शीतोष्णम् (६.७), शरीरिणः (२.१८), पुराणानि, शस्त्रेण, ब्रह्मनिर्वाणम् (२.७२), सर्वाणि (४.५), परित्राणाय (४.८), ब्रह्मणा (१७.२३), सर्वकर्माणि (३.२६), प्रणिपातेन (४.३४), निर्दोषाणाम्, प्रणवः (७.८), मरणम्, प्रयाणकाले (७.३०), षण्मासाः (८.२५), उत्तरायणम् (८.२४), पुष्पाणि, ऋषिणा, हरीणाम्, मृगाणाम् (१०.३०), दुष्पूरेण (३.४३), नारीणाम् (१०.३४), पक्षिणाम् (१०.३०)

अखण्डपदानि		सखण्डपदानि	
----------------		----------------	----------------
----------------	----------------	----------------	----------------
----------------	----------------	----------------	----------------
----------------	----------------	----------------	----------------

----------------- ----------------- ----------------- -----------------

----------------- ----------------- ----------------- -----------------

----------------- ----------------- ----------------- -----------------

----------------- ----------------- ----------------- -----------------

अवधेयम्

> ➢ यदा अखण्डपदे नकारात् पूर्वं रकारः (रेफः) भवति तदा नकारस्य स्थाने णकारः (णत्वम्) भवति। यथा - **पर्णम्, जीर्णम्, पूर्णः** इत्यादीनि।
>
> ➢ यदा अखण्डपदे समानपदे वा नकारात् पूर्वं षकारः भवति तदा नकारस्य स्थाने णकारः (णत्वम्) भवति। यथा - **पुष्णाति, तृष्णा, कृष्णः** इत्यादीनि।
>
> ➢ यदा अखण्डपदे नकारात् पूर्वम् ऋकारः भवति तदा नकारस्य स्थाने णकारः (णत्वम्) भवति। यथा - **पितॄणाम्, कर्तॄणाम्, भोक्तॄणाम्** इत्यादीनि।

२. अधो लिखितानां पदानां वर्णान् पृथक् कृत्वा यथोदाहरणं णकारस्य निमित्तं लिखत -

यथा - १. मुष्णाति = म् उ ष् ण् आ त् इ णकारस्य निमित्तं षकारः

२. यातॄणाम् = -------------------------------- --------------------------------

३. अक्ष्णा = -------------------------------- --------------------------------

४. कर्तॄणाम् = -------------------------------- --------------------------------

५. नृणाम् = -------------------------------- --------------------------------

६. सङ्कीर्णः = -------------------------------- --------------------------------

७. शृणोति = -------------------------------- --------------------------------

८. पुष्णामि = -------------------------------- --------------------------------

९. विकीर्णः = -------------------------------- --------------------------------

१०. पूर्णम् = -------------------------------- --------------------------------

अवधेयम्

अखण्डपदे यदि ऋकार-नकारयोः, रेफ-नकारयोः, षकार-नकारयोः वा मध्ये अट्-वर्णाः, कवर्गः, पवर्गः, आङ् (आ-उपसर्गः), नुम् (अनुस्वारः) वा भवन्ति तर्हि नकारस्य स्थाने णकारः (णत्वम्) भवति ।

ऋ / र् / ष्	अट् = (स्वराः + ह्य्व्र्) अ इ उ ए ऐ ओ औ ह् य् व् र्	न् स्थाने ण्
	कवर्गः = क् ख् ग् घ् ङ्	
	पवर्गः = प् फ् ब् भ् म्	

यथा - शरणम् = श् + अ + र् + अ + ण् (न्) + अ + म्
सर्वाणि = स् + अ + र् + व् + आ + ण् (न्) + इ
करणम् = क् + अ + र् + अ + ण् + (न्) + अ + म्
पृणाति = प् + ऋ + ण् (न्) + आ + त् + इ

३. यथोदाहरणं प्रदत्तानां पदानां वर्णान् पृथक् प्रदर्श्य निमित्तणकारयोः मध्यस्थान् वर्णान् लिखत -

			मध्यवर्णः	
यथा - स्त्रीणाम्	=	स्+त्+र्+ई+ण्+आ+म्	ई	
१. क्रियमाणानि	=	------------------------------	(---------------)	(श्रीमद्भग.३.२७)
२. गृह्णाति	=	------------------------------	(---------------)	(श्रीमद्भग.२.२२)
३. विशेषणम्	=	------------------------------	(---------------)	
४. गात्राणि	=	------------------------------	(---------------)	(श्रीमद्भग.१.२९)
५. इक्षूणाम्	=	------------------------------	(---------------)	
६. चक्रेण	=		(---------------)	
७. ध्रुवेण	=	------------------------------	(---------------)	
८. उपकरणम्	=	------------------------------	(---------------)	
९. कारणात्	=		(---------------)	
१०. रुद्राणाम्	=	------------------------------	(---------------)	(श्रीमद्भग.१०.२३)
११. निर्विण्णः	=	------------------------------	(---------------)	(श्रीमद्भग. ६.२३)

४. एतेषु पदेषु णकारस्य निमित्तं किम्, निमित्त-नकारयोः मध्ये के वर्णाः सन्ति इति लिखत -

संख्या	पदम्	णत्वस्य निमित्तम्	निमित्त-नकारयोः मध्ये विद्यमानाः वर्णाः
	यथा - कृष्णः (श्रीमद्भग. ८.२५)	षकारः	-

१.	राजर्षिणा		
२.	कार्यकर्तॄणाम्		
३.	द्रुपदपुत्रेण (श्रीमद्भग. १.३)		
४.	गुणभोक्तॄणाम्		
५.	पक्षिणाम् (श्रीमद्भग. १०.३०)		
६.	सर्वक्षेत्रेण		
७.	अव्यभिचारेण (श्रीमद्भग. १४.२६)		
८.	सन्निकर्षेण		
९.	दुष्पूराणाम्		
१०.	प्रमाणम् (श्रीमद्भग. १६.२४)		
११.	मूढग्राहेण (श्रीमद्भग. १७.१९)		
१२.	आपूर्यमाणम् (श्रीमद्भग. २.७०)		

अवधेयम्

अखण्डपदे यदि ऋकार-नकारयोः, रेफ-नकारयोः, षकार-नकारयोः वा मध्ये अट्-वर्णाः, कवर्गः, पवर्गः, आङ्, नुम् (अडादयः) इत्येतान् वर्णान् विहाय अन्ये वर्णाः भवन्ति तर्हि नकारस्य णकारः न भवति । यथा - **अर्जुनः = अ + र् + ज् + उ + न् + अ + :** (रेफ-नकारयोः मध्ये जकारः अस्ति । अत्र जकारः अडादिभिन्नः वर्णः । अतः नकारस्य णकारः न भवति ।)

५. अधः दत्तेषु पदेषु णकारे निमित्तं किम् ? , निमित्तनकारयोः च मध्ये अडादिभिन्नः वर्णः कः ? इति लिखत -

	पदम्	णत्वस्य निमित्तम्	अडादिभिन्नः वर्णः
यथा -	आदर्शेन	रकारः	शकारः
१.	दुष्टानाम्		
२.	अधिष्ठानम् (श्रीमद्भग. ३.४०)		
३.	किरीटिनाम्		
४.	जनार्दनेन		
५.	व्रतेन		

६.	पराधीनः		
७.	कर्तृत्वेन		
८.	प्रकृतीनाम्		
९.	पार्थानाम्		
१०.	स्पर्शनम् (श्रीमद्भग. १५.९)		
११.	रसनम् (श्रीमद्भग. १५.९)		
१२.	क्रोधेन		

अवधेयम्

'पदान्तस्य' - पदान्ते स्थितस्य नकारस्य णकारः न भवति इत्यर्थः ।   (पा. सू. ८.४.३७)
यथा - कुर्वन् = क् + उ + र् + व् + अ + न् (नकारः अन्ते अस्ति अतः अत्र णकारः न भवति ।)
एतादृशानि अन्यानि अपि पदानि सन्ति । **यथा - जिघ्रन्, उन्मिषन्, गुरून्, भ्रातॄन्, पौत्रान्, प्रकारान्** इत्यादीनि ।

- सखण्डपदेषु यदि निमित्तं पूर्वपदे भवति नकारः च उत्तरपदे भवति तर्हि णत्वं प्रायः न भवति । यथा - **रिपुनाशनः, कुरुनन्दनः, शशिसूर्यनेत्रः** इत्यादीनि पदानि ।
- सखण्डपदेषु यदि निमित्तं नकारः च द्वयमपि उत्तरपदे भवति तर्हि णत्वं भवति । यथा - **गुणभोक्तॄणाम्, यज्ञभोक्तॄणाम्** इत्यादीनि पदानि ।
- यदि पूर्वपदे निमित्तं भवति उत्तरपदे च अयनम् इति शब्दः भवति तर्हि नकारस्य णत्वं भवति । यथा - **रामायणम्, उत्तरायणम्** इत्यादीनि पदानि ।
- उपसर्गसहितेषु पदेषु विभक्तौ विद्यमानस्य नकारस्य स्थाने णकारः भवति । यथा - **प्रभावेण, दौर्भाग्येण, प्रयोगाणाम्, प्रकाराणाम्** इत्यादीनि पदानि ।

६. अधः दत्तस्य शुद्धरूपस्य पुरतः '✓' इति चिह्नम् अशुद्धरूपस्य पुरतः '✗' इति चिह्नं लिखत -

१. कुलधर्मानाम्		८. विचरन्	-------------
२. भीष्मेण	-------------	९. ब्रह्मणि	-------------
३. शस्त्रपाणयः		१०. वैराग्येन	-------------
४. क्रियानाम्	-------------	११. प्रतिकारेन	-------------
५. कार्पण्यदोषः		१२. स्वर्गलोकाणाम्	-------------
६. असुरानाम्	-------------	१३. मृगानाम्	-------------
७. शरीरिणः		१४. पुनर्जन्म	-------------

१५. अरिसूदनः	-------------	१९. स्पर्शणम्	-------------
१६. धर्म्यामृतेण	-------------	२०. इन्द्रियाग्निषु	-------------
१७. त्रिनयनः	-------------	२१. प्रवीणः	-------------
१८. त्वरमाणा	-------------	२२. पक्षिनाम्	-------------

७. गीतातः चिताः सूक्तीः परिशील्य यथोदाहरणं दोषान् परिष्कृत्य पुनः लिखत -

यथा - कुलक्षये प्रनश्यन्ति कुलधर्माः सनातनाः । (श्रीमद्भग. १.४०)

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ।

१. बुद्धिनाशात्प्रनश्यति । (श्रीमद्भग. २.६३)

-- ।

२. लभन्ते ब्रह्मनिर्वानमृषयः क्षीनकल्मषाः । (श्रीमद्भग. ५.२५)

-- ।

३. मनुष्यानां सहस्रेषु कश्चिद्यतति सिद्धये । (श्रीमद्भग. ७.३)

-- ।

४. ओमित्येकाक्षरं ब्रह्म व्याहरण्मामनुस्मरन् । (श्रीमद्भग. ८.१३)

-- ।

५. प्रजनश्चास्मि कन्दर्पः सर्पानामस्मि वासुकिः । (श्रीमद्भग. १०.२८)

-- ।

६. तेनैव रूपेन चतुर्भुजेण सहस्रबाहो भव विश्वमूर्ते । (श्रीमद्भग. ११.४६)

-- ।

स्वाभ्यासः

एतान् श्लोकान् पठत, श्लोकेषु स्थूलाक्षरैः दर्शितानि पदानि परिशीलयत तत्र णत्वनिमित्तं मध्यस्थान् वर्णान् च अवगच्छत -

वासांसि **जीर्णानि** यथा विहाय नवानि **गृह्णाति** नरोऽ**पराणि** ।
तथा **शरीराणि** विहाय **जीर्णान्यन्यानि** संयाति नवानि देही ॥ (श्रीमद्भग. २.२२)

वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चन ॥ (श्रीमद्भग. ७.२६)

अश्वत्थः **सर्ववृक्षाणां देवर्षीणां** च नारदः ।
गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥ (श्रीमद्भग. १०.२६)

****

कं घातयति ?

णिजन्तम् **६**

अधः प्रदत्तानि वाक्यानि पठत -



१. कुरुवृद्धः पितामहः दुर्योधनस्य हर्षं **सञ्जनयन्** शङ्खं ध्मातवान्। (श्रीमद्भग. १.१२)
२. सः घोषः धार्तराष्ट्राणां हृदयानि **व्यदारयत्**। (श्रीमद्भग. १.१९)
३. अच्युत ! मम रथम् उभयोः सेनयोः मध्ये **स्थापय**। (श्रीमद्भग. १.२१)
४. पार्थ ! सः पुरुषः कं **घातयति** ? कं हन्ति ? (श्रीमद्भग. २.२१)
५. आत्मानम् आपः न **क्लेदयन्ति**, मारुतः अपि न **शोषयति**। (श्रीमद्भग. २.२३)
६. ज्ञानी कर्म समाचरन् कर्मसङ्गिनाम् अज्ञानां बुद्धिभेदं न **जनयेत्**। (श्रीमद्भग. ३.२६)
७. आत्मनः ज्ञानेन येषाम् अज्ञानं नाशितं तेषां तत् ज्ञानम् आदित्यवत् परं **प्रकाशयति**। (श्रीमद्भग. ५.१६)
८. योगी कायशिरोग्रीवं समं **धारयन्** स्वं नासिकाग्रं सम्प्रेक्ष्य दिशः च **अनवलोकयन्** आसीत। (श्रीमद्भग. ६.१३)

उपरितनेषु वाक्येषु स्थूलाक्षरैः मुद्रितानि क्रियापदानि प्रेरणार्थकानि सन्ति।

उच्चैः पठत अवगच्छत च -

१.	कृष्णः गोकुलं **गच्छति**।	वसुदेवः कृष्णं गोकुलं **गमयति**।
२.	कृष्णः मथुराम् **आगच्छति**।	अक्रूरः कृष्णं मथुराम् **आगमयति**।
३.	अर्जुनस्य रथः **चलति**।	श्रीकृष्णः अर्जुनस्य रथं **चालयति**।
४.	कंसः **म्रियते**।	श्रीकृष्णः कंसं **मारयति**।
५.	युधिष्ठिरः द्यूतेन **क्रीडति**।	शकुनिः युधिष्ठिरं द्यूतेन **क्रीडयति**।
६.	धृतराष्ट्रः युद्धवार्तां **शृणोति**।	सञ्जयः धृतराष्ट्रं युद्धवार्तां **श्रावयति**।
७.	अर्जुनः धनुर्विद्याम् **अधीते**।	द्रोणः अर्जुनं धनुर्विद्याम् **अध्यापयति**।
८.	लाक्षागृहं **ज्वलति**।	दुर्योधनः लाक्षागृहं **ज्वालयति**।

९. अर्जुनः विश्वरूपं **पश्यति**। श्रीकृष्णः अर्जुनं विश्वरूपं **दर्शयति**।

१०. श्रीकृष्णः भोजनं **करोति**। विदुरः श्रीकृष्णं भोजनं **कारयति**।

अवधेयम्

⅄ अतिथिः फलरसं पिबति। ⅄ नकुलः अतिथिं फलरसं पाययति।

उपरि निर्दिष्टे वाक्यद्वये अपि अतिथेः 'फलरसस्य पानम्' इति समाना क्रिया। प्रथमे वाक्ये अतिथिः स्वयं फलरसं पिबति। द्वितीयवाक्ये अपि अतिथिः फलरसं पिबति, परन्तु नकुलः तं पानार्थं प्रेरयति। प्रथमवाक्ये '**पिबति**' इति क्रियापदम् अस्ति। द्वितीयवाक्ये '**पाययति**' इति। '**पाययति**' इति यत् रूपम् अस्ति तत् '**णिजन्तम्**' '**प्रेरणार्थकम्**' इति वा उच्यते। प्रेरणार्थे धातुना सह '**णिच्**' इति प्रत्ययः युज्यते। अतः तत्पदं '**णिजन्तम्**' '**ण्यन्तम्**' इति वा उच्यते। **पाययति, हासयति, धावयति** इत्यादीनि णिजन्तानि रूपाणि। **पिबति, हसति, धावति, क्रीडति** इत्यादीनि अस्माकं परिचितानि '**अणिजन्तानि**' रूपाणि सन्ति।

अभ्यासः

१. यथोदाहरणम् अधः निर्दिष्टानां धातूनां णिजन्तरूपाणि लिखत -

	धातुः	अणिजन्तम्	णिजन्तम्		धातुः	अणिजन्तम्	णिजन्तम्
यथा - १.	**हस्**	हसति	हासयति	१५.	**मुद्**	मोदते	
२.	**खाद्**	खादति		१६.	**क्रुध्**	क्रुध्यति	
३.	**धाव्**	धावति		१७.	**कुप्**	कुप्यति	
४.	**भ्रम्**	भ्रमति		१८.	**कृष्**	कर्षति	कर्षयति
५.	**गम्**	गच्छति		१९.	**वृध्**	वर्धते	
६.	**क्रीड्**	क्रीडति		२०.	**दृश्**	पश्यति	
७.	**ज्वल्**	ज्वलति		२१.	**वृत्**	वर्तते	
८.	**कृ**	करोति	कारयति	२२.	**नृत्**	नृत्यति	
९.	**धृ**	धरति		२३.	**गै**	गायति	गापयति
१०.	**तॄ**	तरति		२४.	**स्था**	तिष्ठति	
११.	**स्मृ**	स्मरति		२५.	**दा**	ददाति	
१२.	**वृ**	वृणोति	वारयति	२६.	**ज्ञा**	जानाति	

१३.	**शुष्**	शुष्यति	शोषयति	२७.	**या**	याति	
१४.	**तुष्**	तुष्यति		२८.	**स्ना**	स्नाति	

अवधेयम्

केभ्यश्चित् धातुभ्यः स्वार्थे णिच्प्रत्ययः भवति । तत्र णिजन्ते अपि तदेव रूपम् । तन्नाम स्वार्थ-प्रेरणार्थयोः रूपभेदः नास्ति । यथा - **सूच = सूचयति / सूचयति** ।

२. अत्र निर्दिष्टानां धातूनां स्वार्थ-प्रेरणार्थयोः रूपाणि समानानि भवन्ति । यथोदाहरणं तेषां रूपाणि लिखत -

धातुः	स्वार्थणिजन्तम्	प्रेरणार्थकणिजन्तम्
१. **चुर्**	चोरयति	चोरयति
२. **पीड्**		
३. **क्षाल्**		
४. **कथ**		
५. **गण**		
६. **मृज्**	मार्जयति	

यदा धातुभ्यः णिच्-प्रत्ययः भवति तदा प्रक्रिया एवं भवति -

- गम् + णिच् (इ) = गमि गमि + लट्-तिङ्प्रत्ययः = **गमयति**
- पठ् + णिच् (इ) = पाठि पाठि + लट्-तिङ्प्रत्ययः = **पाठयति**
- दृश् + णिच् (इ) = दर्शि दर्शि + लट्-तिङ्प्रत्ययः = **दर्शयति**

३. यथोदाहरणं संयोजयत -

धातवः	णिजन्तक्रियापदानि
१. कृ	पातयति
२. दह्	धारयति
३. नश्	**कारयति**
४. बुध्	ज्ञापयति
५. धृ	उपवेशयति
६. लिख्	बोधयति
७. नद्	नाशयति

८.	ज्ञा	दाहयति
९.	उप + विश्	लेखयति
१०.	पत्	नादयति
११.	तड्	मोदयति
१२.	मुद्	ताडयति

अवधेयम्

विशेषसूचना - प्रायः णिजन्ताः धातवः उभयपदिनः भवन्ति। यथा -

गमयति / गमयते　　पाठयति / पाठयते　　कारयति / कारयते

स्मारयति / स्मारयते　　दर्शयति / दर्शयते　　चोरयति / चोरयते

- यथा अणिजन्तधातूनां लट्-आदिषु दशसु लकारेषु रूपाणि भवन्ति तथैव णिजन्तधातूनाम् अपि लट्-आदिदशलकारेषु रूपाणि भवन्ति। यथा -

  लट् = श्रावयति　　**लृट्** = श्रावयिष्यति　　**लोट्** = श्रावयतु

  लिङ् = श्रावयेत्　　**लङ्** = अश्रावयत्

- यथा अणिजन्तेभ्यः धातुभ्यः तुमुन्, क्त्वा, ल्यप्, क्तवतु इत्यादयः प्रत्ययाः भवन्ति तथैव णिजन्तेभ्यः धातुभ्यः अपि एते प्रत्ययाः भवन्ति।

४. यथोदाहरणं निर्दिष्टलकारस्य प्रथमपुरुषस्य एकवचनान्तं रूपं तालिकायां लिखत -

धातुः (लकारः)	रूपम्		धातुः (लकारः)	रूपम्
क्षाल् + णिच् (लोट्)	क्षालयतु		युज् + णिच् (लिङ्)	
ग्रह् + णिच् (लट्)			पाल् + णिच् (लङ्)	
जन् + णिच् (लिङ्)			भाष् + णिच् (लोट्)	
लोक् + णिच् (लङ्)			वह् + णिच् (लिङ्)	
स्पृह + णिच् (लट्)			भू + णिच् (लट्)	
स्मृ + णिच् (लोट्)			गण + णिच् (लोट्)	
चर् + णिच् (लङ्)			कुप् + णिच् (लङ्)	
शुच् + णिच् (लिङ्)			शी + णिच् (लट्)	
हन् + णिच् (लोट्)			मुच् + णिच् (लङ्)	

➢ अधः लिखितानि तुमुन्-क्तवतु-क्त्वा-ल्यप्-प्रत्ययान्तानि रूपाणि सावधानं परिशीलयत -

धातुः	तुमुन्		क्तवतु	
	अणिजन्ते	णिजन्ते	अणिजन्ते	णिजन्ते
गम्	गन्तुम्	गमयितुम्	गतवान्	गमितवान्
रक्ष्	रक्षितुम्	रक्षयितुम्	रक्षितवान्	रक्षितवान्
नश्	नशितुम्	नाशयितुम्	नष्टवान्	नाशितवान्
स्मृ	स्मर्तुम्	स्मारयितुम्	स्मृतवान्	स्मारितवान्
दृश्	द्रष्टुम्	दर्शयितुम्	दृष्टवान्	दर्शितवान्
कृ	कर्तुम्	कारयितुम्	कृतवान्	कारितवान्
हन्	हन्तुम्	घातयितुम्	हतवान्	घातितवान्
मुह्	मोग्धुम्	मोहयितुम्	मुग्धवान्	मोहितवान्
शुच्	शोचितुम्	शोचयितुम्	शुचितवान्	शोचितवान्
भू	भवितुम्	भावयितुम्	भूतवान्	भावितवान्

	क्त्वा		ल्यप्	
धातुः	अणिजन्ते	णिजन्ते	अणिजन्ते	णिजन्ते
गम्	गत्वा	गमयित्वा	निर्गम्य	निर्गमय्य
रक्ष्	रक्षित्वा	रक्षयित्वा	संरक्ष्य	संरक्ष्य
नश्	नष्ट्वा	नाशयित्वा	विनश्य	विनाश्य
स्मृ	स्मृत्वा	स्मारयित्वा	संस्मृत्य	संस्मार्य
दृश्	दृष्ट्वा	दर्शयित्वा	प्रदर्श्य	प्रदर्श्य
कृ	कृत्वा	कारयित्वा	स्वीकृत्य	स्वीकार्य
हन्	हत्वा	घातयित्वा	निहत्य	निर्घात्य
मुह्	मुग्ध्वा	मोहयित्वा	सम्मुह्य	सम्मोह्य
शुच्	शुचित्वा	शोचयित्वा	संशोच्य	संशोच्य
भू	भूत्वा	भावयित्वा	परिभूय	परिभाव्य

५. यथोदाहरणं कोष्ठके लिखितस्य धातोः उचितं णिजन्तरूपं लिखित्वा रिक्तस्थानानि पूरयत-

यथा - श्रीकृष्णः अर्जुनं विश्वरूपं दर्शयित्वा युद्धाय प्रेरितवान्। (दृश्) (क्त्वा)

१. सः घोषः धार्तराष्ट्राणां हृदयानि -------------------------। (वि+दॄ) (क्तवतु)

२. आचार्यः, गुरवः, पितृव्याः, मातुलाः बान्धवाः च अर्जुनं -------------------------। (मुह्) (क्तवतु)

३. सुभद्रा वृक्षं --------------------------- प्रतिदिनं जलं ददाति। (सम् + वर्ध) (तुमुन्)

४. श्रीकृष्णः अधर्मं -------------- धर्मं --------------। (वि + नश्) (ल्यप्) (प्रति + स्था) (क्तवतु)

५. श्रीकृष्णः सूर्यम् ----------------------- सुदर्शनचक्रं प्रेरितवान्। (आ + छद्) (तुमुन्)

६. दुर्योधनः पाण्डवान् वनवासार्थं -------------------------। (प्रेष्) (क्तवतु)

७. अर्चकः द्रौपद्या पूजास्थलं --------- सामग्रीं ---------। (सम् + शुध, ल्यप्) (स्था) (लट्)

८. श्रीकृष्णः पाण्डवैः अनन्तव्रताचरणं -------------------------। (कृ) (क्तवतु)

९. भीष्मः विषयं ----------------------------- उदाहरणानि दत्तवान्। (ज्ञा) (तुमुन्)

१०. सैनिकाः राष्ट्रगौरवं -------------------------। (वृध्) (क्तवतु)

६. मञ्जूषायाः साहाय्येन 'बुध्'धातोः उचितानि रूपाणि चित्वा रिक्तस्थानेषु पूरयत -

बोधयति, बोध्यते, बोधयतु, बोधयितुम्, अबोधयत्, बोधनीयः, बोधयेयुः, बोधयित्वा, बोधितवती, बोधयति

१. शिक्षकः छात्रान् व्याकरणं -------------------------।

२. कृपया भवान् मार्गं ----------------------------।

३. मनुस्मृतौ मनुः वर्णाश्रमव्यवस्थाम् ------------------------------।

४. श्रेष्ठाः सामान्यान् सदाचारं ----------------------------।

५. माता मां पूर्वमेव पाककलां ------------------------------।

६. व्रतबन्धसमये आचार्येण माणवकः गायत्रीं --------------------------------।

७. शिक्षिका अस्मान् सङ्गणकं --------------------------- आगच्छति।

८. भवता मुख्यातिथेः परिचयः ----------------------------।

९. विज्ञानं ------------------------- शिक्षके छात्राणां महान् विश्वासः वर्तते।

१०. पिता सेवकं सङ्केतं ---------------------------- कार्यालयं प्रेषितवान्।

७. यथोदाहरणं भगवद्गीतातः श्लोकान् परिशील्य उचितैः णिजन्तरूपैः रिक्तस्थानानि पूरयत -

यथा - सः तुमुलः घोषः नभः पृथिवीं च व्यनुनादयन् धार्तराष्ट्राणां हृदयानि व्यदारयत्। (१.१९)

१. वशी देही नवद्वारे पुरे सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन् न ----------------- सुखम् आस्ते। (५.१३)

२. ईश्वरः सर्वभूतानि मायया ------------------------------ सर्वभूतानां हृद्देशे तिष्ठति। (१८.६१)

३. मच्चित्ताः मद्गतप्राणाः परस्परं मां ---------------- ---------------- च नित्यं तुष्यन्ति। (१०.९)

४. मां --------------------- ये जनाः अशास्त्रविहितं घोरं तपः तप्यन्ते तान् आसुरनिश्चयान् विद्धि। (१७.६)
५. सूर्यः तत् न --------------------------- । (१५.६)
६. फलाकाङ्क्षी यया धृत्या धर्मकामार्थान् -------------------------- सा धृतिः राजसी। (१८.३४)
७. अहं तेषाम् अनुकम्पार्थम् अज्ञानजं तमः --------------------------- । (१०.११)
८. अहं गाम् आविश्य च ओजसा भूतानि ----------------------------- । (१५.१३)
९. अहं त्वां सर्वपापेभ्यः ----------------------------- । (१८.६६)
१०. त्वम् अनश्वरं रूपं मां -------------------------- । (११.४)
११. त्वं मयि बुद्धिं ------------------------- । (१२.८)

८. कोष्ठके प्रदत्तस्य पदस्य प्रयोगेण णिजन्तप्रयोगं कृत्वा यथोदाहरणं वाक्यानि लिखत -

यथा - धृतराष्ट्रः युद्धवार्तां शृणोति। (सञ्जयः)
सञ्जयः धृतराष्ट्रं युद्धवार्तां श्रावयति।

१. द्रोणाचार्यः पाण्डवानीकं पश्यति। (दुर्योधनः)
-- ।

२. दुर्योधनः हृष्यति। (भीष्मः)
-- ।

३. अर्जुनः कुरून् अवेक्षते। (कृष्णः)
-- ।

४. कुलधर्माः उत्सीदन्ति। (वर्णसङ्करकारकदोषाः)
-- ।

५. शरीरी विमुह्यति। (कामः)
-- ।

६. नरः संसिद्धिं प्राप्नोति। (कर्म)
-- ।

७. श्रेयः वर्धते। (स्वधर्माचरणम्)
-- ।

८. लोकः प्रकाशते। (रविः)
-- ।

९. भक्तः कदापि न प्रणश्यति। (देवः)
-- ।

१०. अर्जुनः दिव्यविभूतिं शृणोति। (भगवान्)
-- ।

अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि

णिजन्तम् २

७

एतत् सम्भाषणम् उच्चैः पठत -



छात्रः - "आचार्य ! एतत् वाक्यं कुतः उद्धृतम् ?" (फलके लिखितं वाक्यं दृष्ट्वा छात्रः आचार्यं पृच्छति)

आचार्यः - "श्रीमद्भगवद्गीतायाः उद्धृतम् ।"

छात्रः - "आचार्य ! मोक्षस्य विषये गीतायाम् उक्तमस्ति इति मम पिता **कथितवान्** । अस्मिन् वाक्ये अपि '**मोक्षयिष्यामि**' इति पदम् अस्ति । अतः कृपया मोक्षस्य विषये किञ्चित् **बोधयतु** । मोक्षप्राप्तेः मार्गम् अपि **बोधयतु** ।"

आचार्यः - "अस्तु । अहम् एकां कथां वदामि । तां कथां श्रुत्वा भवान् मोक्षस्य विषये स्वयम् अवगमिष्यति, उपविशतु ।"

कदाचित् कश्चन गुरुः जनान् **अबोधयत्** - "एतत् जगत् माया । इतः मुक्तिप्राप्तिः अस्माकं जीवनस्य लक्ष्यं स्यात्" इति । तस्य प्रबोधनस्य अनन्तरं कश्चन ज्येष्ठः आगत्य **न्यवेदयत्** - "श्रीमन् ! मया अपि मुक्तिः प्राप्तव्या । कृपया मुक्तिप्राप्तेः मार्गं **ज्ञापयतु**" इति । तदा गुरुः मन्दहासं प्रदर्श्य पार्श्वस्थं शिष्यम् **असूचयत्** - "एकं नारिकेलफलम् आनय" इति । शिष्यः नारिकेलफलम् आनीय अयच्छत् । तत् तस्मै मोक्षेच्छवे ज्येष्ठाय **दापयित्वा** गुरुः अवदत् - "अस्य अन्तस्सारम् अहम् इच्छामि । तं नारिकेलात् पृथक्कृत्य देहि । सः च अखण्डः स्यात् । आवरणे संलग्नः अपि न भवेत्" इति ।

"तत् कथं शक्येत ? भञ्जनं विना अन्तस्सारः कथं प्राप्येत ? नारिकेले भञ्जिते, सारः अपि भञ्जितः स्यात् एव" इति ज्येष्ठः अवदत् ।

"अस्तु नाम । एतत् गृहं नीत्वा पूजागृहे **स्थापयतु** । मासचतुष्टयस्य अनन्तरम् अहं पुनः अत्र आगमिष्यामि । तदा एतत् आनयतु" इति ।

ज्येष्ठः कथञ्चित् मासचतुष्टयं **यापितवान्** । गुरुः तं ग्रामं पुनरपि आगतवान् । ज्येष्ठः नारिकेलफलं भक्त्या गुरोः पुरतः **स्थापितवान्** । गुरुः अवदत् - "एतत् **भञ्जय**" इति ।

ज्येष्ठः नारिकेलम् **अभञ्जयत्** । ततः गोलाकारेण स्थितम् अखण्डं शुष्कनारिकेलभागं प्राप्नोत् च ।

तदा गुरुः **अकथयत्** - "अखण्डः, आवरणे असंलग्नः च नारिकेलभागः प्राप्तः ननु ! एतत् प्राप्तुं न शक्यते इति भवता उक्तम् आसीत् ननु !"

"इदानीं तु नारिकेलं शुष्कम् अस्ति। अतः भवदुक्तक्रमेण सारभागं प्राप्तुं शक्यम् अभवत्" इति ज्येष्ठः अवदत्।

तदा गुरुः हसन् अवदत् - "मानवजीवनम् अपि एवमेव। आशा-व्यामोहादयः यावत् अस्माकम् अन्तः स्युः तावत् प्रापञ्चिकबन्धनं स्यात् एव। अतः अन्तर्मुखतां प्राप्य आशादीनां त्यागाय निरन्तरं श्रमः करणीयः। आशादिबन्धमोक्षेण जीवनं बाह्यसम्पर्कहीनं भविष्यति। एतदेव मोक्षप्राप्तेः प्राथमिकं सोपानम्। क्रमशः न्यूनीकृतम् आशाबाहुल्यं क्षणिकलाभचिन्ताम् **अपगमयति**। तदेव जीवनं **विकासयति**" इति।

छात्रः आचार्य ! धन्यवादः।

अभ्यासः

१. यथोदाहरणम् अधः प्रदत्तानि णिजन्तपदानि दृष्ट्वा तेषाम् अणिजन्तरूपाणि लिखत -

यथा - बोधयतु	**बोधतु**	अबोधयत्	------------------
ज्ञापयतु	------------------	न्यवेदयत्	------------------
दापयित्वा	------------------	दर्शयित्वा	------------------
यापितवान्	------------------	स्थापयतु	------------------
अभञ्जयत्	------------------	स्थापितवान्	------------------
विकासयति	------------------	अपगमयति	------------------

एतानि वाक्यानि सावधानं परिशीलयत -

कृष्णः **अर्जुनं** विश्वरूपं दर्शयति।	कृष्णः **अर्जुनेन** युद्धं कारयति।
रुक्मिणी **दूतं** द्वारकां प्रेषयति।	राजा **दूतेन** कार्यं साधयति।
अर्जुनः **अश्वान्** जलं पाययति।	बलरामः **गुप्तचरेण** सूचनां प्रेषयति।
कुन्ती **सुभद्रां** द्वारकां गमयति।	गान्धारी **सेविकया** वस्त्राणि प्रक्षालयति।
शल्यः **कर्णं** युद्धक्षेत्रं प्रापयति।	सूर्यः **कर्णेन** कवचकुण्डलं दापयति।
सुभद्रा **अभिमन्युम्** ओदनं भक्षयति।	युधिष्ठिरः **पौत्रेण** दक्षिणां दापयति।
सञ्जयः **धृतराष्ट्रं** युद्धघटनां श्रावयति।	नकुलः **सहदेवेन** पिञ्जं नोदयति।
बृहन्नला **उत्तरां** संगीतम् अध्यापयति।	अर्जुनः **मत्स्यराजपुत्रेण** वस्तूनि सङ्ग्राहयति।
महाराजः **सेनानायकान्** युद्धतन्त्रं स्मारयति।	दुर्योधनः **सेनानायकैः** भीष्माचार्यम् अभिरक्षयति।
प्रबन्धकः **राजसेवकं** कार्यं बोधयति।	अधिकारी **कर्मकरेण** सञ्चिकाम् आनाययति।

एतेषु सर्वेषु वाक्येषु णिजन्ताः धातवः प्रयुक्ताः सन्ति। ते च सकर्मकाः सन्ति। प्रतिवाक्यं कर्तृपदद्वयम् अस्ति।

तयोः एकः प्रयोज्यकर्ता अपरः च प्रयोजककर्ता अस्ति । यः प्रेरयति सः प्रयोजककर्ता । यः प्रेरितः भवति सः प्रयोज्यकर्ता ।

यथा - **अर्जुनः विश्वरूपं पश्यति ।** **कृष्णः अर्जुनं विश्वरूपं दर्शयति ।**

अत्र तु कृष्णः प्रयोजककर्ता अस्ति, अर्जुनः च प्रयोज्यकर्ता । उपरि प्रदत्तेषु वाक्येषु स्थूलाक्षरैः दर्शितानि पदानि प्रयोज्यकर्तॄणि सन्ति । परन्तु तेषु केषुचित् पदेषु द्वितीयाविभक्तिः दृश्यते, केषुचित् तृतीया । कुत्र द्वितीयाविभक्तिः, कुत्र तृतीयाविभक्तिः इति कथं ज्ञातुं शक्यते ?

एतानि वाक्यानि परिशीलयत -

अणिजन्तवाक्यम्	**णिजन्तवाक्यम्**
सेवकः विपणिं गच्छति ।	स्वामी **सेवकं** विपणिं गमयति ।
राजेशः पत्रं प्रेषयति ।	राजेशः पुत्रं **पत्रं** प्रेषयति ।
पर्यटकाः राजभवनम् अटन्ति ।	मार्गदर्शकः **पर्यटकान्** राजभवनम् आटयति ।

एतेषु वाक्येषु प्रयुक्ताः सर्वेऽपि धातवः गत्यर्थकाः सन्ति । तेषां प्रयोगे णिजन्तरहितवाक्येषु प्रयोज्यकर्तुः प्रथमाविभक्तिः भवति । णिजन्तवाक्येषु प्रयोज्यकर्तुः द्वितीयाविभक्तिः भवति ।

यत्र वाक्येषु गत्यर्थकधातूनां णिजन्तत्वेन प्रयोगः भवति तत्र प्रयोज्यकर्तुः द्वितीयाविभक्तिः भवति ।

अवधेयम्

नीञ्धातुः (नयति) वह्धातुः (वहति) च यद्यपि गत्यर्थकौ तथापि तयोः णिजन्तत्वेन प्रयोगे प्रयोज्यकर्तुः द्वितीयाविभक्तिः न भवति, अपि तु तृतीयाविभक्तिः भवति । (अत्र वार्त्तिकम् - नीवह्योर्न)

यथा - कृष्णः रथं नयति । अर्जुनः **कृष्णेन** रथं **नाययति** ।
भृत्यः भारं वहति । मोहनः **भृत्येन** भारं **वाहयति** ।

२. यथोदाहरणं कोष्ठकस्य साहाय्येन रिक्तस्थानानि पूरयत -

यथा - शिक्षकः केशवं वाचनालयं गमयति । **(केशवः)**

१. वायुः सुगन्धं सर्वत्र -------------------------- । (प्र + सृ)
२. श्रीकृष्णः ------------------------- युद्धभूमिं प्रापयति । (रथः)
३. द्रोणः -------------------------- आश्रमम् आटयति । (शिष्याः)
४. सैनिकाः -------------------------- अपि युद्धक्षेत्रं क्रामयन्ति । (अश्वाः)
५. भीमः वृक्षात् तालरसं ------------------------- । (स्रु)
६. धृतराष्ट्रः ------------------------- गुरुगृहं व्रजयति । (पुत्राः)
७. कृष्णः -------------------------- भीष्मभवनं प्रेषयति । (द्रौपदीम्)
८. शल्यराजः -------------------------- युद्धभूमिं प्रापयति । (कर्णः)

एतानि वाक्यानि परिशीलयत -

अणिजन्तवाक्यम्	**णिजन्तवाक्यम्**
अर्जुनः तत्त्वं बोधति।	कृष्णः **अर्जुनं** तत्त्वं बोधयति।
जनाः आरोग्यनियमान् जानन्ति।	वैद्यः **जनान्** आरोग्यनियमान् ज्ञापयति।
शिष्यः वेदान्तं वेत्ति।	गुरुः **शिष्यं** वेदान्तं वेदयति।
पुत्रः धर्ममार्गम् अवगच्छति।	पिता **पुत्रं** धर्ममार्गम् अवगमयति।

एतेषु वाक्येषु प्रयुक्ताः सर्वेऽपि धातवः बुद्ध्यर्थकाः (ज्ञानार्थकाः) सन्ति। एतेषां प्रयोगे अणिजन्तवाक्येषु प्रयोज्यकर्तुः प्रथमाविभक्तिः अस्ति। णिजन्तवाक्येषु तु प्रयोज्यकर्तुः द्वितीयाविभक्तिः अस्ति।

यत्र वाक्येषु ज्ञानार्थकधातूनां णिजन्तत्वेन प्रयोगः भवति तत्र प्रयोज्यकर्तुः द्वितीयाविभक्तिः भवति।

३. यथोदाहरणं मञ्जूषास्थानां पदानाम् उचितैः विभक्त्यन्तैः रूपैः रिक्तस्थानानि पूरयत -

पाण्डवाः, प्रजाः, कर्मयोगः, धर्ममार्गम्, विनायकः, अर्जुनः, भक्तियोगः

यथा - अग्रजा <u>विनायकम्</u> उत्तरम् अवगमयति।

१. द्रोणः -------------------------- धनुर्विद्यां वेदयति।

२. श्रीकृष्णः अर्जुनं --------------------------- अध्यापयति।

३. उद्घोषकः ------------------------------- राजनिर्देशं सूचयति।

४. श्रीमद्भगवद्गीता ----------------------------- बोधयति।

५. श्रीकृष्णः पाण्डवान् -------------------------------- दर्शयति।

६. कृष्णः -------------------------------- यज्ञान् कर्मजान् वेदयति।

एतानि वाक्यानि परिशीलयत -

अणिजन्तवाक्यम्	**णिजन्तवाक्यम्**
अश्वाः जलं पिबन्ति।	सारथिः **अश्वान्** जलं पाययति।
भीमः ओदनं भुङ्क्ते।	माता **भीमम्** ओदनं भोजयति।
गौः तृणं चरति।	गोपालकः **गां** तृणं चारयति।
नकुलसहदेवौ फलम् अश्नीतः।	कुन्ती **नकुलसहदेवौ** फलम् आशयति।
कलभः इक्षुदण्डं भक्षयति।	गजः **कलभम्** इक्षुदण्डं भक्षयति।

एतेषु वाक्येषु प्रयुक्ताः सर्वेऽपि धातवः भक्षणार्थकाः सन्ति। एतेषां प्रयोगे अणिजन्तवाक्येषु प्रयोज्यकर्तुः प्रथमाविभक्तिः अस्ति। णिजन्तवाक्येषु प्रयोज्यकर्तुः द्वितीयाविभक्तिः अस्ति।

येषु वाक्येषु भक्षणार्थकधातूनां णिजन्तत्वेन प्रयोगः भवति तेषु प्रयोज्यकर्तुः द्वितीयाविभक्तिः भवति।

अवधेयम्

अद्धातुः (अत्ति) खाद्धातुः (खादति) च यद्यपि भक्षणार्थकौ तथापि तयोः णिजन्तत्वेन प्रयोगे प्रयोज्यकर्तुः द्वितीयाविभक्तिः न भवति, अपि तु तृतीयाविभक्तिः भवति। अत्र वार्त्तिकम् - आदिखाद्योर्न।
यथा - सिंहः मांसम् अत्ति। जन्तुशालाधिकारी **सिंहेन** मांसम् **आदयति**।
भीमः पायसं खादति। कुन्ती **भीमेन** पायसं **खादयति**।

एतानि वाक्यानि परिशीलयत -

अणिजन्तवाक्यम्	**णिजन्तवाक्यम्**
धृतराष्ट्रः युद्धवृत्तान्तं शृणोति।	सञ्जयः **धृतराष्ट्रं** युद्धवृत्तान्तं श्रावयति।
भीमसेनः नियुद्धतन्त्रं पठति।	द्रोणाचार्यः **भीमसेनं** नियुद्धतन्त्रं पाठयति।
गायत्री श्लोकं वदति।	सरस्वती **गायत्रीं** श्लोकं वादयति।
शिष्यः वेदम् अधीते।	आचार्यः **शिष्यं** वेदम् अध्यापयति।
युधिष्ठिरः सत्यं वक्ति।	प्रकृतिः **युधिष्ठिरं** सत्यं वाचयति।

एतेषु वाक्येषु प्रयुक्ताः सर्वेऽपि धातवः शब्दकर्मकाः सन्ति। शब्दः कर्म येषां ते शब्दकर्मकाः। पठ्, श्रु, वच्, अधि+इङ् इत्यादीनां धातूनां यत् कर्म तत् शब्दरूपम् एव भवति। यथा - **वेदः, गद्यं पद्यं** च। अतः एते धातवः शब्दकर्मकाः इत्युच्यन्ते।

येषु वाक्येषु शब्दकर्मकाणां धातूनां णिजन्तत्वेन प्रयोगः भवति तेषु प्रयोज्यकर्तुः द्वितीयाविभक्तिः भवति।

४. कोष्ठकात् उचितं रूपं चित्वा रिक्तस्थानानि पूरयत -

यथा - शिक्षिका <u>विपुलं</u> पत्रं वाचयति। (विपुलः, विपुलं, विपुलात्, विपुले)

१. पिता ------------------------ भगवद्गीतां श्रावयति। (पुत्रस्य, पुत्राभ्याम्, पुत्रेण, पुत्रं)
२. शिक्षिका ----------------------- राजयोगं पाठयति। (छात्रैः, छात्रान्, छात्रेभ्यः, छात्रेषु)
३. भीष्मः ----------------- शङ्खनादं श्रावयति। (युद्धसज्जेभ्यः, युद्धसज्जैः, युद्धसज्जान्, युद्धसज्जाः)
४. आचार्यः ---------------------- काव्यम् अध्यापयति। (पुत्राय, पुत्रेण, पुत्रः, पुत्रं)

एतानि वाक्यानि परिशीलयत -

अणिजन्तवाक्यम्	**णिजन्तवाक्यम्**
बालाः हसन्ति।	विदूषकः **बालान्** हासयति।
भीमः शेते।	माता **भीमं** शाययति।
चटकाः डयन्ते।	बालाः **चटकान्** डाययन्ति।
उभयोः सेनयोः मध्ये रथः तिष्ठति।	कृष्णः उभयोः सेनयोः मध्ये **रथं** स्थापयति। (श्रीमद्भग. १.२१)
कुलधर्मः नश्यति।	कुलक्षयः **कुलधर्मं** नाशयति। (श्रीमद्भग. १.४०)
जन्तवः मुह्यन्ति।	अज्ञानावृतज्ञानं **जन्तून्** मोहयति।

एतेषु वाक्येषु प्रयुक्ताः सर्वेऽपि धातवः अकर्मकाः सन्ति।

> अकर्मकधातूनां णिजन्तत्वेन प्रयोगे प्रयोज्यकर्तुः द्वितीयाविभक्तिः भवति ।

५. कोष्ठकस्थस्य पदस्य उचितेन विभक्त्यन्तेन रूपेण यथोदाहरणं रिक्तस्थानानि पूरयत -

यथा - दुर्योधनः भीष्माचार्यं कोपयति । (भीष्माचार्यः)

१. कृषकः ------------------------ वर्धयति । (सस्यम्)
२. कृष्णः ------------------------ स्थापयति । (रथः)
३. केशवः ------------------------ हासयति । (पाण्डवाः)
४. विष्णुः ------------------------ डाययति । (गरुडः)
५. शिवः जटायाः -------------------- प्रवाहयति । (गङ्गा)
६. प्राज्ञः ------------------------ अनुवर्तयति । (कर्मचक्रम्)
७. कृष्णः अर्जुनस्य -------------------- व्यामिश्रेण वाक्येन भ्रामयति । (बुद्धिः) (श्रीमद्भग. ३.२)
८. कामः इन्द्रियैः -------------------------- मोहयति । (देही)
९. ज्ञानम् ------------------------ नाशयति । (अज्ञानम्)
१०. अग्रजः -------------------------------- क्रीडयति । (अनुजा)

६. अधः लिखितेषु वाक्येषु कः *प्रयोजककर्ता* कः च *प्रयोज्यकर्ता* इति यथोदाहरणं लिखत -

१. दण्डदीपः प्रकोष्ठं प्रकाशयति ।
२. माता पुत्रम् उत्थापयति ।
३. वैद्यः रुग्णं यन्त्रसाहाय्येन श्वासयति ।
४. अग्रजः अनुजां रोदयति ।
५. ईश्वरः धर्मं संस्थापयति ।
६. अनुश्रीः दण्डदीपं ज्वालयति ।
७. अश्वारोही अश्वं धावयति ।
८. मर्कटपालकः मर्कटौ नर्तयति ।
९. अर्जुनः बाणगङ्गाम् उद्भावयति ।
१०. भवतः अर्थहीनाः प्रश्नाः मां कोपयन्ति ।
११. बालाः वृक्षात् आम्रफलानि पातयन्ति ।
१२. शुक्राचार्यः सञ्जीवनीमन्त्रेण असुरान् पुनः जीवयति स्म ।

प्रयोजककर्ता		**प्रयोज्यकर्ता**	
दण्डदीपः	------------------	**प्रकोष्ठम्**	------------------
------------------	------------------	------------------	------------------
------------------	------------------	------------------	------------------
------------------	------------------	------------------	------------------
------------------	------------------	------------------	------------------
------------------	------------------	------------------	------------------

७. कोष्ठके स्थितस्य प्रयोज्यकर्तुः उचितानि विभक्त्यन्तानि रूपाणि रिक्तस्थानेषु लिखत -

यथा - सरला पुत्रीं कथां कथयति । (पुत्री)

१. परीक्षकः ---------------------------- चर्चां कारयति । (विद्यार्थिनः)
२. प्रवीणः ---------------------------- पातितवान् । (आम्रफलानि)
३. मत्स्येन्द्रनाथः ---------------------------- संन्यासं स्वीकारितवान् । (गोरक्षनाथः)

४. महिला ---------------------------- अवकरं क्षेपयति। (सेविका)
५. विद्याधरः ---------------------------- नवनीतं खादयति। (श्रीहरिः)
६. अमेयः -------------------------------- महाविद्यालयम् आटयति। (सन्दीपः)
७. परिचारिका ---------------------------- औषधं पाययति। (रोगी)
८. स्वामिनी ---------------------------- भोजनं पाचयति। (पाचिका)
९. अम्बा ---------------------------- चित्रं लेखयति। (पुत्रौ)
१०. लोकयाननचालकः ---------------------------- कार्यालयं प्रापयति। (कर्मकराः)
११. सुभद्रा ---------------------- जनयति। (अभिमन्युः)
१२. जाह्नवी ---------------------------- भाययति। (सुप्रिया)
१३. अग्रजः ---------------------------- क्रीडयति। (अनुजा)
१४. गोविन्दः ------------------------ पाषाणखण्डान् क्षेपयति। (राघवः)
१५. माधवः ---------------------------- आसन्दे उपवेशयति। (पितामहः)

८. कोष्ठके दत्तानि पदानि प्रयोजककर्तृरूपेण उपयुज्य यथोदाहरणं णिजन्तत्वेन प्रयोगं कुरुत -

यथा - बालकाः नृत्यन्ति। (मार्गदर्शकः)

<u>मार्गदर्शकः</u> बालकान् नर्तयति।

१. माणवकाः भोजनं कुर्वन्ति। (धनिकः) -- ।
२. पाचकः पायसं पचति। (चैतन्यः) -- ।
३. यजमानः यज्ञं यजते। (ऋत्विजः) -- ।
४. शिशुपालः म्रियते। (श्रीकृष्णः) -- ।
५. स्नेहला पितृव्येन मिलति। (पिता) -- ।
६. छात्राः गीतानि गायन्ति। (गुरुः) -- ।
७. नटाः संवादान् रटन्ति। (दिग्दर्शकः) -- ।
८. पुत्र्यौ स्तोत्रं पठतः। (माता) -- ।
९. विजयः मधुरं ददाति। (छाया) -- ।
१०. माधवः राममूर्तौ चन्दनं लिम्पति। (महेशः) -- ।
११. पुत्रः तिलकं धरति। (पिता) -- ।
१२. स्नुषा गृहे सुगन्धिजलं प्रोक्षति। (श्वश्रूः) -- ।
१३. सैनिकाः देशद्रोहिणः अन्विष्यन्ति। (अधिकारी) -- ।

९. स्वजनदर्शनम् अर्जुने कानि परिवर्तनानि कारयति इति अधः मञ्जूषायां सूचितम् अस्ति। यथोदाहरणं वाक्यानि रचयत -

अर्जुनः विषीदति। तस्य गात्राणि सीदन्ति। मुखं परिशुष्यति। शरीरे वेपथुः जायते। त्वक् परिदहति। गाण्डीवं स्रंसते। रोमहर्षः जायते। मनः भ्रमति। रथोपस्थे उपविशति। (श्रीमद्भग. १.२९,३०,४७)

यथा - स्वजनदर्शनम् अर्जुनं विषादयति।

१. -- ।

२. -- ।

३. -- ।

४. -- ।

५. -- ।

६. -- ।

७. -- ।

८. -- ।

१०. विषयान् ध्यायतः पुरुषस्य कथं विनाशः सञ्जायते इति अधः मञ्जूषायां सूचितम् अस्ति। यथोदाहरणं वाक्यानि रचयत -

पुरुषः विषयान् ध्यायति। तेषु विषयेषु सङ्गः जायते। ततः कामः सञ्जायते। ततः क्रोधः अभिजायते। ततः सम्मोहः उत्पद्यते। ततः स्मृतिविभ्रमः जायते। ततः बुद्धिः विनश्यति। ततः प्रणश्यति।

यथा - विषयध्यानं तेषु विषयेषु सङ्गं जनयति।

१. -- ।

२. -- ।

३. -- ।

४. -- ।

५. -- ।

६. -- ।

११. अधः प्रदत्तानि अणिजन्तरूपाणि णिजन्तरूपेण परिवर्तयत -

यथा - धार्तराष्ट्राणां हृदयानि विदृणन्ति। (तुमुलः घोषः)

तुमुलः घोषः धार्तराष्ट्राणां हृदयानि विदारयति। (श्रीमद्भग. १.१९)

१. अश्वः चणकान् खादति। (अश्वपालकः)

-- ।

२. सैनिकाः सर्वेषु अयनेषु यथाभागम् अवतिष्ठन्ते। (श्रीमद्भग. १.११) (सेनानायकः)

-- ।

३. अर्जुनः योत्स्यमानान् अवेक्षते। (श्रीमद्भग. १.२३) (कृष्णः)

-- ।

४. गणेशः महाभारतम् अलिखत्। (व्यासः)

-- ।

५. शिखण्डी पुरतः तिष्ठति। (अर्जुनः)

-- ।

६. धीरः पुरुषः न व्यथते। (मात्रास्पर्शाः)

-- ।

७. आत्मा न क्लिद्यति न वा शुष्यति। (श्रीमद्भग. २.२३) (आपः, मारुतः)

-- ।

८. यज्ञात् पर्जन्यः उद्भवति। (श्रीमद्भग. ३.१४) (यज्ञः)

-- ।

९. पुरुषः पापं चरति। (श्रीमद्भग. ३.३६) (कामः)

-- ।

१०. ईश्वरः आत्मानं सृजति। (श्रीमद्भग. ४.७) (धर्मग्लानिः)

-- ।

११. दुष्कृतः विनश्यन्ति। (श्रीमद्भग. ४.८) (भगवान्)

-- ।

अवधेयम्

गत्यर्थकानाम्, बुद्ध्यर्थकानाम्, प्रत्यवसानार्थकानाम् (भक्षणार्थकानाम्), शब्दकर्मकाणाम् अकर्मकधातूनां वा णिजन्तत्वेन प्रयोगः यदा भवति तदा तेषु प्रयोज्यकर्तुः द्वितीयाविभक्तिः भवति। अत्र पाणिनीयं सूत्रम् -

'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ' (पा. सू. १.४.५२)

गत्यर्थकादिभिन्नाः ये धातवः सन्ति तेषां णिजन्तत्वेन प्रयोगे प्रयोज्यकर्तुः सर्वदा तृतीयाविभक्तिः भवति।

यथा - श्रीधरः **प्रकाशेन** चित्रं **लेखयति**। माता **पुत्रेण** भगवन्तं **वन्दयति**।

ऋषयः **गौतमेन** गोदावरीम् **अवतारयन्ति**। अर्जुनः **कृष्णेन** संशयं **छेदयति**।

हृ, कृ धात्वोः (हरति, करोति) णिजन्तत्वेन प्रयोगे प्रयोज्यकर्तुः विकल्पेन द्वितीयाविभक्तिः भवति। अत्र पाणिनीयं सूत्रमिदम् - **'हृक्रोरन्यतरस्याम्' (पा. सू. १. ४. ५३)**

यथा - श्रीकृष्णः अर्जुनम् / अर्जुनेन युद्धं कारयति।

दृश्धातोः जल्पतिप्रभृतीनां च णिजन्तत्वेन प्रयोगे प्रयोज्यकर्तुः द्वितीयाविभक्तिः भवति।

यथा - १. कृष्णः अर्जुनं समवेतान् युयुत्सून् दर्शयति। २. दुर्जनाः सज्जनान् जल्पयन्ति।

****

कुमन्त्रणायाः दुष्फलम्

विशेषण-विशेष्यभावः ८

एतत् कथानकं सावधानं पठत -



एकदा **भूत-वर्तमान-भविष्यवेत्ता**, सर्वघटनानां **प्रत्यक्षदर्शी**, **गवल्गणपुत्रः**, **विद्वान्** **सञ्जयः** युद्धभूमेः प्रत्यागतः । सः **चिन्तामग्नस्य** **धृतराष्ट्रस्य** समीपं गत्वा अत्यन्तं दुःखितमनाः सन् भरतवंशिनां **पितामहस्य** **भीष्मस्य** मृत्योः वार्ताम् अश्रावयत् ।

सञ्जयः अवदत् – **हे महाराज ! धृतराष्ट्र !** भरतवंशिनां पितामहः **महाराजस्य** **शन्तनोः** **पुत्रः** अद्य युद्धभूमौ हतः । यः समस्तयोद्धॄणां ध्वजस्वरूपः **सम्पूर्णानां** **धनुर्धराणाम्** आश्रयः च आसीत् । **सः** एव कुरुकुलस्य **पितामहः** **भीष्मः** अद्य युद्धभूमौ शरशय्यायां **सुप्तः** वर्तते । हे राजन् ! तव **पुत्रः** **दुर्योधनः** यस्य बाहुबले विश्वस्य द्यूतम् अक्रीडत् **तम्** एव **भीष्मं** शिखण्डी रणभूमौ अमारयत् ।

यः महारथी वीरः **भीष्मः** काशिराजस्य नगर्यां **समवेतान्** **समस्त-भूपालान्** **एकाकी** एव पराजयत, यः च रणभूमौ **जमदग्निपुत्रेण** **परशुरामेण** सह निर्भयो भूत्वा अयुदध्यत, यं च परशुरामः अपि हन्तुं न अशक्नोत्, **सः** एव **भीष्मः** अद्य शिखण्डिना **मारितः** ।

यः शौर्ये इन्द्रेण सदृशः आसीत् । स्थैर्ये हिमवान् इव आसीत् । गाम्भीर्ये समुद्रः इव आसीत् । सहिष्णुतायां भूमिः इव आसीत् । मनुष्येषु सिंहः इव आसीत् । अथ च धनुः एव यस्य मुखम् आसीत् । बाणाः एव यस्य दन्ताः आसन् । खड्गः एव यस्य जिह्वा आसीत् । एतादृशस्य तस्य समीपं कश्चन अपि गन्तुं न शक्नोति स्म । **तादृशः सः गङ्गापुत्रः** **भीष्मः** अद्य **पाञ्चाल-राजकुमारेण** **शिखण्डिना** **हतः** ।

हे भरतश्रेष्ठ ! यथा गवां **समूहः** सिंहं दृष्ट्वा **व्याकुलः** भवति तथा एव युद्धभूमौ **सशस्त्रं** **पितामहं** दृष्ट्वा पाण्डवानां विशालसैन्यं बिभेति स्म । अस्य एव संरक्षणे दश दिनानि यावत् अस्माकं **सैन्यं** **सुरक्षितम्** आसीत् । सूर्यः इव **सः** **ब्रह्माचारी** **योद्धा** अद्य अत्यन्तं **दुष्करं** **पराक्रमं** प्रकटयन् अस्ताचलम् अगच्छत् ।

हे भरतवंशिन् ! नरेश ! **इदं** भवतः कुमन्त्रणायाः एव **दुष्फलं** वर्तते । अतः भीष्मपितामहस्य **इयं** **दुर्दशा** अभवत् ।

एतानि वाक्यानि पठत अवगच्छत च -

उन्नतः **वृक्षः** ।	विशालं **भवनम्** ।	दीर्घा **नदी** ।
धीरः **सैनिकः** ।	आत्मीयं **मित्रम्** ।	कुशला **शिक्षिका** ।

यत् पदं विशेषतां सूचयति तत् विशेषणम् । एतेषु वाक्येषु **उन्नतः, विशालम्, दीर्घा, धीरः, आत्मीयम्, कुशला** इत्येतानि पदानि **विशेषणानि** सन्ति । यस्य विशेषता उच्यते तत् पदं विशेष्यम् । एतेषु वाक्येषु **वृक्षः, भवनम्, नदी, सैनिकः, मित्रम्, शिक्षिका** इत्येतानि पदानि **विशेष्याणि** ।

अन्यानि अपि कानिचित् विशेषणानि विशेष्याणि च परिशीलयत -

विशेषणम्	विशेष्यम्	विशेषणम्	विशेष्यम्
धर्मक्षेत्रम्	कुरुक्षेत्रम्	अचला	श्रद्धा
सौभद्रः	अभिमन्युः	अचला	बुद्धिः
श्वेतः	अश्वः	अखिलम्	कर्म
भिन्ना	प्रकृतिः	अक्षरम्	ब्रह्म
दुरत्यया	माया	चञ्चलम्	मनः
उत्तमा	गतिः	परमम्	धाम

अभ्यासः

१. यथोदाहरणं विशेषणं विशेष्यं च पृथक्कृत्य लिखत -

		विशेषणम्	विशेष्यम्	
यथा -	**दिव्यः शङ्खः**	**दिव्यः**	**शङ्खः**	(श्रीमद्भग. १.१४)
१.	शाश्वतः मतः	-------------	----------------	
२.	बहूनि जन्मानि	-------------	----------------	(श्रीमद्भग. ४.५)
३.	परा बुद्धिः	-------------	----------------	(श्रीमद्भग. ३.४२)
४.	नैष्ठिकी शान्तिः	-------------	----------------	(श्रीमद्भग. ५.१२)
५.	सुखी नरः	-------------	----------------	(श्रीमद्भग. ५.२३)
६.	परमं पदम्	-------------	----------------	
७.	निवातस्थः दीपः	-------------	----------------	(श्रीमद्भग. ६.१९)
८.	अनाश्रितः योगी	-------------	----------------	(श्रीमद्भग. ६.१)
९.	आवृतं ज्ञानम्	-------------	----------------	(श्रीमद्भग. ३.३९)
१०.	तुमुलः घोषः	-------------	----------------	(श्रीमद्भग. १.१९)

अवधेयम्

विशेषणस्य विशेष्यस्य च सम्बन्धः एव विशेषण-विशेष्यभावः इति उच्यते । अस्मिन् पाठे स्थूलाक्षरैः मुद्रितानां पदानां विशेषण-विशेष्यभावः अस्ति । यथा - **महारथी भीष्मः, गङ्गापुत्रः भीष्मः, सुरक्षितं सैन्यम्, इयं दुर्दशा** ।

भगवद्गीतातः उद्धृतेषु एतेषु पदेषु विशेषण-विशेष्यभावं सावधानं परिशीलयत -

विशेषणम्	**विशेष्यम्**	**विशेषणम्**	**विशेष्यम्**
दैवी	सम्पद्	आसुरीम्	सम्पदम्
आसुराः	जनाः	अप्रतिष्ठम्	जगत्
एताम्	दृष्टिम्	दुष्पूरम्	कामम्
प्रलयान्ताम्	चिन्ताम्	क्रूरान्	नराधमान्
आसुरीषु	योनिषु	अधमाम्	गतिम्
त्रिविधम्	द्वारम्	त्रिभिः	द्वारैः
पराम्	गतिम्	आसुरी	मता
द्वौ	भूतसर्गौ	अनीश्वरम्	जगत्

संस्कृते विशेषण-विशेष्यभावसहितानां पदानां प्रयोगावसरे केचन अंशाः अवश्यं स्मर्तव्याः भवन्ति। **यथा -**

१. विशेषणवाचकशब्दाः प्रायः त्रिषु अपि लिङ्गेषु प्रयुक्ताः भवन्ति। यथा - पुंलिङ्गे **उत्तमः, समीचीनः** इति। स्त्रीलिङ्गे **उत्तमा, समीचीना** इति। नपुंसकलिङ्गे **उत्तमम्, समीचीनम्** इति। विशेष्यवाचकस्य पदस्य यत् लिङ्गं तदेव लिङ्गं विशेषणवाचकस्य अपि भवति।

यथा - **नूतनः ग्रन्थः।** **नूतना पत्रिका।** **नूतनं पुस्तकम्।**

२. विशेष्यवाचकपदस्य यत् वचनं तदेव वचनं विशेषणवाचकस्य अपि भवति।

यथा -	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
	दिव्यः शङ्खः	**दिव्यौ शङ्खौ**	**दिव्याः शङ्खाः**
	दीर्घा लता	**दीर्घे लते**	**दीर्घाः लताः**
	पुरातनं वस्त्रम्	**पुरातने वस्त्रे**	**पुरातनानि वस्त्राणि**

३. विशेष्यवाचकपदस्य या विभक्तिः सा एव विभक्तिः विशेषणवाचकस्य अपि भवति।

पुंलिङ्गे यथा -

प्रथमा - सज्जनः पुरुषः अयम्।

द्वितीया - सज्जनं पुरुषं नमस्कुर्मः।

तृतीया - सज्जनेन पुरुषेण सह चर्चां कुर्मः।

चतुर्थी - सज्जनाय पुरुषाय नमः।

पञ्चमी - सज्जनात् पुरुषात् ज्ञानं प्राप्नुमः।

षष्ठी - सज्जनस्य पुरुषस्य आज्ञां पालयामः।

सप्तमी - सज्जने पुरुषे सर्वे स्निह्यन्ति।

स्त्रीलिङ्गे यथा -

प्रथमा - शिक्षिता महिला इयम्।

द्वितीया - शिक्षितां महिलां पश्यतु।

तृतीया - शिक्षितया महिलया सह वार्तालापं करोतु।

चतुर्थी - शिक्षितायै महिलायै नमः।

पञ्चमी - शिक्षितायाः महिलायाः शिक्षां गृह्णातु।

षष्ठी - शिक्षितायाः महिलायाः सम्मानं करोतु।

सप्तमी - शिक्षितायां महिलायां सर्वेषाम् आदरः भवति।

नपुंसकलिङ्गे यथा -

प्रथमा - सुन्दरं पुष्पम् इदम्।

द्वितीया - सुन्दरं पुष्पं चिनोतु।

तृतीया - सुन्दरेण पुष्पेण अर्चयतु।

चतुर्थी - पितामही **सुन्दराय पुष्पाय** गच्छति।

पञ्चमी - सुन्दरात् पुष्पात् सुगन्धः आयाति।

षष्ठी - सुन्दरस्य पुष्पस्य वर्णः आकर्षकः अस्ति।

सप्तमी - सुन्दरे पुष्पे भ्रमरः अस्ति।

२. अधो लिखितानां विशेषणवाचकशब्दानां प्रथमाविभक्त्यन्तानि रूपाणि यथोदाहरणं लिखत -

	प्रातिपदिकम्	पुंलिङ्गम्	स्त्रीलिङ्गम्	नपुंसकलिङ्गम्
यथा -	चतुर	चतुरः	चतुरा	चतुरम्
	उत्तम	--------------	----------------	------------------
	कृष्ण	---------------	----------------	------------------
	अधम	---------------	----------------	------------------
	तीव्र	---------------	----------------	------------------
	मन्द	---------------	----------------	------------------
	पर	---------------	----------------	------------------
	मधुर	---------------	----------------	------------------
	सुन्दर	---------------	सुन्दरी	------------------
	क्रूर	---------------	----------------	------------------
	समीचीन	---------------	----------------	------------------
	दिव्य	---------------	----------------	------------------
	उन्नत	---------------	----------------	------------------
	श्रेष्ठ	---------------	----------------	------------------
	प्रिय	---------------	----------------	------------------
	प्रसिद्ध	---------------	----------------	------------------

३. कोष्ठके दत्तानां विशेषणवाचकानां विशेष्यानुसारं प्रयोगं कृत्वा रिक्तस्थानानि पूरयत -

यथा - अर्जुनस्य रथं समर्थाः अश्वाः वहन्ति। **(समर्थ)**

१.	------------------ वृकोदरः (भीमः) गदायुद्धं करोति।	(भीमकर्मन्)
२.	श्रीकृष्णः अर्जुनः च ---------------------- शङ्खौ प्रदध्मतुः।	(दिव्य)
३.	------------------ पण्डिताः सर्वेषु आत्मानं पश्यन्ति।	(समदर्शिन्)
४.	------------------ पितामहः इति उच्यते।	(कुरुवृद्ध)
५.	मम ------------------ माया अस्ति इति श्रीकृष्णः कथयति।	(दुरत्यय)
६.	----------- सम्पत् संसाररूपं बन्धनं नाशयति।	(दैव)
७.	ईश्वरस्य ---------------- कालचक्रं सर्वान् नियन्त्रयति।	(प्रवर्तित)
८.	------------------ जन्म मृतस्य भवति।	(ध्रुव)
९.	------------- मनः बलवद् दृढं भवति।	(चञ्चल)
१०.	------------ जन्मानि आवयोः व्यतीतानि इति अर्जुनं श्रीकृष्णः कथयति।	(बहु)

४. यथोदाहरणं 'क'भागस्य विशेषणपदानि 'ख'भागे प्रदत्तैः समुचितैः विशेष्यपदैः सह मेलयित्वा लिखत -

	(क)	(ख)	विशेषणम्	विशेष्यम्
यथा -	महतीं	भोगान्	महतीं	चमूम्
	धीमता	सेनयोः	----------	----------
	वीर्यवान्	पुरुषस्य	----------	----------
	अयनेषु	शङ्खौ	----------	----------
	रुधिरप्रदिग्धान्	चमूम्	----------	----------
	वासांसि	शिष्येण	----------	----------
	प्रतिष्ठिता	सर्वेषु	----------	----------
	उभयोः	काशिराजः	----------	----------
	पुष्पितां	प्रज्ञा	----------	----------
	दिव्यौ	जीर्णानि	----------	----------
	विपश्चितः	वाचम्	----------	----------

५. मञ्जूषातः उचितानि विशेषणपदानि चित्वा रिक्तस्थानानि पूरयत -

तपःपूताः, अनेकाः, असंख्याः, सर्वोन्नतः, परमां, पर्वतराजः, संयमिनां, उत्तरस्यां, उन्नतात्, विविधानाम्, अनेके बहुमूल्याः, जितेन्द्रियाणाम्, हिमाच्छादितानि, अनेके, उन्नतानि

अयं ---------------- पर्वतः हिमालयः । अयं ----------------- कथ्यते । भारतस्य ------------ दिशि स्थितः अयम् । अस्मात् ------------------ पर्वतात् -------------------- नद्यः निस्सरन्ति । अयं -------------- औषधानाम् आकरः एव । आवर्षम् अस्य --------------------- शिखराणि ----------------------- भवन्ति । अस्य उपरि --------------------- ऋषीणाम् ---------------------- आश्रमाः सन्ति । तेषु ------------------- मुनयः तपश्चर्यां कुर्वन्ति । हिमालये --------------------- वृक्षाः सन्ति । --------------- पर्यटकाः अत्र भ्रमणाय आगच्छन्ति । ते ------------------ मुनीनाम् आश्रमान् अपि गच्छन्ति । दर्शनं च कृत्वा ----------------- शान्तिम् अनुभवन्ति ।

अभ्यासः

१. भगवद्गीतायाः सप्तदशाध्यायस्य अधोनिर्दिष्टसंख्याकेषु श्लोकेषु विद्यमानानां विशेषण-विशेष्यभावयुक्तानां पदानां प्रयोगान् परिशीलयत -

(२, ४, ७, ८, ९, १०, १३, १४, १५, १६, २१)

२. यथोदाहरणं सप्तसु विभक्तिषु विशेषणविशेष्यभावस्य (एकवचने) अभ्यासरूपेण लिखत -

		उन्नत	**पर्वत (पुंलिङ्गे)**
यथा -	**प्रथमाविभक्तिः**	**उन्नतः ।**	**पर्वतः ।**
	द्वितीयाविभक्तिः	--------------------	-------------------- ।
	तृतीयाविभक्तिः	--------------------	-------------------- ।
	चतुर्थीविभक्तिः	--------------------	-------------------- ।
	पञ्चमीविभक्तिः	--------------------	-------------------- ।
	षष्ठीविभक्तिः	--------------------	-------------------- ।
	सप्तमीविभक्तिः	--------------------	-------------------- ।

उन्नत	**अट्टालिका (स्त्रीलिङ्गे)**	**उन्नत**	**भवन (नपुंसकलिङ्गे)**
उन्नता	अट्टालिका ।	उन्नतं	भवनम् ।
--------------	---------------------- ।	------------	-------------------- ।
--------------	---------------------- ।	------------	-------------------- ।
--------------	---------------------- ।	------------	-------------------- ।
--------------	---------------------- ।	------------	-------------------- ।
--------------	---------------------- ।	------------	-------------------- ।
--------------	---------------------- ।	------------	-------------------- ।

लौकिकन्यायाः

विशेषः -

कमपि विषयं स्पष्टीकर्तुं संस्कृतसाहित्ये विविधानां लौकिकन्यायानां प्रयोगः क्रियते । बहवः एतादृशाः लौकिकन्यायाः शास्त्रेषु यत्र तत्र प्रयुक्ताः दृश्यन्ते। यथा -

१. वटबीजन्यायः -

अत्यन्तलघुबीजात् अपि अतीव विशालः वटवृक्षः जायते । अत्यन्तस्थूलपदार्थः अपि उत्पत्तेः प्राक् अत्यन्तसूक्ष्मरूपेण स्वकारणे भवति इति भावः । अखिलस्य विश्वस्य इदमेव तात्त्विकं स्वरूपम् । अतीव सूक्ष्मस्य आत्मनः सर्वम् इदं जगत् आविर्भवति इति उपनिषदां सिद्धान्तः। एवं निरुपाधिपरमात्मनः विषये एषः न्यायः ज्ञानिभिः प्रयुज्यते।

२. वटे यक्षन्यायः -

"अस्य वटवृक्षस्य उपरि कश्चन यक्षः वसति" इति केनचित् प्रचारः क्रियते। तत् श्रुत्वा जनाः भीताः भवन्ति। स्वयं तत्र केनापि यक्षः, भूतः पिशाचः वा न दृष्टः चेदपि भयेन मूढाः जनाः अन्यान् तदेव कथयन्ति । एवं समाजे मूढविश्वासः बद्धमूलः भवति इति भावः। एवम् अन्धानुकरणविषये एषः न्यायः प्रयुज्यते।

३. अन्धाञ्जनन्यायः -

अन्धस्य नेत्रे कियदपि अञ्जनं स्थापयामः तस्य अञ्जनस्य उपयोगः न भवति। तत् प्रयोजनशून्यं कार्यं भवति। एवं प्रयोजनशून्यस्य कार्यस्य विषये एषः न्यायः प्रयुज्यते।

ध्यातव्यम् - **यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य।**
तल्लिङ्गं तद्वचनं सैव विभक्तिर्विशेषणस्यापि ॥

****

द्वौ भूतसर्गौ लोकेऽस्मिन्

संख्यासु लिङ्गभेदः

९

उच्चैः पठत अवगच्छत च -

एकः अश्वः अस्ति ।

एका शाखा अस्ति ।



एकं पुष्पम् अस्ति ।



द्वौ मृगेन्द्रौ स्तः ।



द्वे माले स्तः ।



द्वे पर्णे स्तः ।



त्रयः झषाः सन्ति ।

तिस्रः बालिकाः सन्ति ।



त्रीणि सेवफलानि सन्ति ।



चत्वारः शुकाः सन्ति ।

चतस्रः महिलाः सन्ति ।



चत्वारि आसनानि सन्ति ।

पञ्च देवाः सन्ति ।



पञ्च मालाः सन्ति ।



पञ्च आयुधानि सन्ति ।

➢ **एतं श्लोकं सावधानेन पठत -**

एकं शास्त्रं देवकीपुत्रगीत**मेको देवो** देवकीपुत्र एव ।

एको मन्त्रस्तस्य नामानि यानि **कर्माप्येकं** तस्य देवस्य सेवा ॥

(**एकं** शास्त्रं देवकीपुत्रगीतम् **एकः** देवः देवकीपुत्रः एव । **एकः** मन्त्रः तस्य नामानि यानि कर्म अपि **एकं** तस्य देवस्य सेवा ।)

अस्मिन् श्लोके 'एक'शब्दस्य विशेषणत्वेन प्रयोगः कृतः अस्ति ।

पठत अवगच्छत च -

प्रातिपदिकम्	पुंलिङ्गे	स्त्रीलिङ्गे	नपुंसकलिङ्गे
एक	एकः	एका	एकम्
द्वि	द्वौ	द्वे	द्वे
त्रि	त्रयः	तिस्रः	त्रीणि
चतुर्	चत्वारः	चतस्रः	चत्वारि
पञ्चन्	पञ्च	पञ्च	पञ्च
षष्	षट्	षट्	षट्
सप्तन्	सप्त	सप्त	सप्त
अष्टन्	अष्ट	अष्ट	अष्ट
नवन्	नव	नव	नव
दशन्	दश	दश	दश

अवधेयम्

- ❖ **एकम्, द्वे, त्रीणि, चत्वारि** इत्यादयः सङ्ख्यावाचकाः शब्दाः अपि विशेषणानि भवन्ति ।
- ❖ **एकम्, द्वे, त्रीणि, चत्वारि** इत्येतेषां चतुर्णाम् एव त्रिषु लिङ्गेषु भिन्नानि रूपाणि भवन्ति । ततः अग्रे त्रिषु अपि लिङ्गेषु समानं रूपं भवति ।
- ❖ **पञ्च** इत्यतः आरभ्य **नवदशपर्यन्तं** सङ्ख्यावाचकशब्दाः नित्यबहुवचनान्ताः भवन्ति ।
- ❖ **'अष्टन्'** इति शब्दस्य **अष्ट / अष्टौ** इति रूपद्वयं भवति ।
- ❖ **विंशतितः नवनवतिपर्यन्तं** संङ्ख्यावाचकशब्दाः एकवचनान्ताः स्त्रीलिङ्गशब्दाः च भवन्ति ।
- ❖ **'शतम्'** इति शब्दः नपुंसकलिङ्गः पुंलिङ्गश्च ।

पठत अवगच्छत च -

'एक'शब्दः

पुंलिङ्गे	स्त्रीलिङ्गे	नपुंसकलिङ्गे	विभक्तिः
एकः	एका	एकम्	प्रथमाविभक्तिः
एकम्	एकाम्	एकम्	द्वितीयाविभक्तिः
एकेन	एकया	एकेन	तृतीयाविभक्तिः
एकस्मै	एकस्यै	एकस्मै	चतुर्थीविभक्तिः
एकस्मात्	एकस्याः	एकस्मात्	पञ्चमीविभक्तिः
एकस्य	एकस्याः	एकस्य	षष्ठीविभक्तिः
एकस्मिन्	एकस्याम्	एकस्मिन्	सप्तमीविभक्तिः

'द्वि'शब्दः

पुंलिङ्गे	स्त्रीलिङ्गे	नपुंसकलिङ्गे	विभक्तिः
द्वौ	द्वे	द्वे	प्रथमाविभक्तिः
द्वौ	द्वे	द्वे	द्वितीयाविभक्तिः
द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्	तृतीयाविभक्तिः
द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्	चतुर्थीविभक्तिः
द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्	पञ्चमीविभक्तिः
द्वयोः	द्वयोः	द्वयोः	षष्ठीविभक्तिः
द्वयोः	द्वयोः	द्वयोः	सप्तमीविभक्तिः

'त्रि'शब्दः

पुंलिङ्गे	स्त्रीलिङ्गे	नपुंसकलिङ्गे	विभक्तिः
त्रयः	तिस्रः	त्रीणि	प्रथमाविभक्तिः
त्रीन्	तिस्रः	त्रीणि	द्वितीयाविभक्तिः
त्रिभिः	तिसृभिः	त्रिभिः	तृतीयाविभक्तिः
त्रिभ्यः	तिसृभ्यः	त्रिभ्यः	चतुर्थीविभक्तिः

त्रिभ्यः	तिसृभ्यः	त्रिभ्यः	पञ्चमीविभक्तिः
त्रयाणाम्	तिसृणाम्	त्रयाणाम्	षष्ठीविभक्तिः
त्रिषु	तिसृषु	त्रिषु	सप्तमीविभक्तिः

'चतुर्'शब्दः

पुंलिङ्गे	स्त्रीलिङ्गे	नपुंसकलिङ्गे	विभक्तिः
चत्वारः	चतस्रः	चत्वारि	प्रथमाविभक्तिः
चतुरः	चतस्रः	चत्वारि	द्वितीयाविभक्तिः
चतुर्भिः	चतसृभिः	चतुर्भिः	तृतीयाविभक्तिः
चतुर्भ्यः	चतसृभ्यः	चतुर्भ्यः	चतुर्थीविभक्तिः
चतुर्भ्यः	चतसृभ्यः	चतुर्भ्यः	पञ्चमीविभक्तिः
चतुर्णाम्	चतसृणाम्	चतुर्णाम्	षष्ठीविभक्तिः
चतुर्षु	चतसृषु	चतुर्षु	सप्तमीविभक्तिः

'पञ्चन्'शब्दः

पुंलिङ्गे	स्त्रीलिङ्गे	नपुंसकलिङ्गे	विभक्तिः
पञ्च	पञ्च	पञ्च	प्रथमाविभक्तिः
पञ्च	पञ्च	पञ्च	द्वितीयाविभक्तिः
पञ्चभिः	पञ्चभिः	पञ्चभिः	तृतीयाविभक्तिः
पञ्चभ्यः	पञ्चभ्यः	पञ्चभ्यः	चतुर्थीविभक्तिः
पञ्चभ्यः	पञ्चभ्यः	पञ्चभ्यः	पञ्चमीविभक्तिः
पञ्चानाम्	पञ्चानाम्	पञ्चानाम्	षष्ठीविभक्तिः
पञ्चसु	पञ्चसु	पञ्चसु	सप्तमीविभक्तिः

- **'षष्', 'सप्तन्', 'अष्टन्', 'नवन्', 'दशन्'** इति शब्दानाम् अपि रूपाणि **'पञ्चन्'** शब्दस्य रूपाणि इव भवन्ति।

अभ्यासः

१. चित्रं दृष्ट्वा गणयित्वा च चित्रे किं किम् अस्ति इति पञ्चवाक्यैः लिखत -



यथा - <u>एकः</u> गर्दभः अस्ति ।

१. -- ।

२. -- ।

३. -- ।

४. -- ।

५. -- ।



१. -- ।

२. -- ।

३. -- ।

४. -- ।

५. -- ।



१. --- ।

२. --- ।

३. --- ।

४. --- ।

५. --- ।



१. --- ।

२. --- ।

३. --- ।

४. --- ।

५. --- ।

२. प्रत्येकस्मिन् चित्रे कति पशवः सन्ति इति यथोदहरणं लिखत -



यथा - अत्र <u>चत्वारः</u> गजाः सन्ति ।



१. ----------- ---------------------------------- ।



२. -- ।



३. -- ।



४. --- ।



५. -- ।

३. कोष्ठके प्रदत्तायाः संख्यायाः आधारेण गीतायाः श्लोकं दृष्ट्वा अधः स्थितं वाक्यखण्डद्वयं मेलयत -

यथा - १. व्यवसायात्मिका बुद्धिः एका →	तत् मे ब्रूहि सुनिश्चितम् ।	(श्रीमद्भग. ५.१)
२. यत् श्रेयः एतयोः एकं	**इह कुरु नन्दन ।**	(श्रीमद्भग. २.४१)
३. एकं साङ्ख्यं च योगं	सुकृतिनः जनाः मां भजन्ते ।	(श्रीमद्भग. ७.१६)
४. चतुर्भिः प्रकारैः	यः पश्यति स पश्यति ।	(श्रीमद्भग. ५.५)
५. महर्षयः सप्त पूर्वे चत्वारो मनवः	लोकेऽस्मिन् स्तः ।	(श्रीमद्भग. १६.६)
६. द्वौ भूतसर्गौ	प्रकृतिः अष्टधा ।	(श्रीमद्भग. ७.४)
७. भूमिरापोऽनलः	येषां लोक इमाः प्रजाः ।	(श्रीमद्भग. १०.६)

४. अधः लिखितानां शब्दानां निर्दिष्टविभक्तेः रूपाणि यथोदाहरणं लिखत -

यथा - एक (स्त्री.)	**(तृतीयाविभक्तिः) (ए. व.)**	**एकया**
१. द्वे (पुं.)	(सप्तमीविभक्तिः) (द्विव.)	------------------------
२. त्रि (नपुं.)	(प्रथमाविभक्तिः) (ब.व.)	------------------------
३. चतुर् (स्त्री.)	(चतुर्थीविभक्तिः) (ब.व.)	------------------------
४. पञ्चन् (पुं.)	(षष्ठीविभक्तिः) (ब.व.)	------------------------
५. षष् (स्त्री.)	(पञ्चमीविभक्तिः) (ब.व.)	------------------------
६. सप्तन् (नपुं.)	(द्वितीयाविभक्तिः) (ब.व.)	------------------------
७. अष्टन् (पुं.)	(तृतीयाविभक्तिः) (ब.व.)	------------------------
८. नवन् (स्त्री.)	(सप्तमीविभक्तिः) (ब.व.)	------------------------
९. दशन् (नपुं.)	(सप्तमीविभक्तिः) (ब.व.)	------------------------

५. अधस्तने चित्रे <u>किं कियत्संख्याकम् अस्ति</u> इति गणयित्वा दशभिः वाक्यैः लिखत -

१. -- ।

२. -- ।

३. -- ।

४. -- ।

५. -- ।

६. -- ।

७. -- ।

८. -- ।

९. -- ।

१०. -- ।

६. चित्रं दृष्ट्वा मञ्जूषायाः क्रियापदानां साहाय्येन <u>चित्रे के किं कुर्वन्ति</u> ? इति यथोदाहरणं लिखत -

लिखतः, धावन्ति, गायन्ति, कर्षन्ति, पतति, डयन्ते, चलतः, नृत्यन्ति, विलसन्ति

यथा - <u>द्वौ</u> बालकौ चित्रं लिखतः ।

१. ------------------------------------ ।



२. ------------------------------------ ।

३. ------------------------------------ ।



४. ------------------------------------ ।



५. ------------------------------------ ।

६. ------------------------------------ ।

७. ----------------------------------- ।

८. -------------------------------------- ।

७. अधः लिखितेषु वाक्येषु विशेष्यम् अनुसृत्य कोष्ठके लिखितायाः सङ्ख्यायाः उचितां विभक्तिं लिखत -

यथा - द्वे बालिके चित्रलेखनं कुरुतः ।

१. कृष्णस्य --------------- (१) भगिनी अस्ति ।

२. महाराजः दशरथः --------------- (४) पुत्रान् आह्वयति ।

३. गुरुः --------------- (३) शिष्यान् बोधयति ।

५. नेता --------------- (१) कार्यं निर्दिशति ।

२. मुनिः --------------- (४) वेदान् पठति ।

४. --------------- (९) गृहाणि सन्ति ।

६. --------------- (६) ऋतवः भवन्ति ।

७. महिलाः --------------- (७) मालासु पुष्पाणि योजयन्ति ।

८. अहं --------------- (३) अपि बालिकाः नयामि ।

९. माता --------------- (५) वटुभ्यः भिक्षां यच्छति ।

१०. शिक्षिका --------------- (४) बालकेभ्यः पुस्तकानि स्वीकरोति ।

****

भगवद्भक्तेः महिमा

पूरणप्रत्ययान्ताः

१०

एतत् कथानकम् उच्चैः पठत अवगच्छत च -



प्रह्लादः भगवतः विष्णोः महान् भक्तः आसीत्। तस्य पिता दैत्यराजः हिरण्यकशिपुः आसीत्। हिरण्यकशिपुः भगवतः विष्णोः अत्यन्तं विरोधी आसीत्। सः भगवतः नाम अपि श्रोतुं न इच्छति स्म।

हिरण्यकशिपुः पुत्रं प्रह्लादं पठनाय दैत्यगुरोः शुक्राचार्यस्य गुरुकुलं प्रेषितवान्। प्रह्लादः गुरुकुलात् द्वितीयवारं यदा राजभवनम् आगतवान् तदा हिरण्यकशिपुः तं प्रीत्या अङ्के उपवेश्य पृष्टवान् - "पुत्र ! भवता गुरुकुले यत् अधीतं ततः किञ्चित् उत्तमं श्रावयतु" इति।

प्रह्लादः उक्तवान् - "हे पितः ! अस्मिन् पर्याये अहं नवविधाः विद्याः अधीतवान् अस्मि" इति।

"ताः काः ?" इति पिता पृष्टवान्।

प्रह्लादः उक्तवान् -"श्रूयताम् - **प्रथमा** विद्या - विष्णोः कथायाः श्रवणम्। **द्वितीया** - विष्णोः नाम्नां कीर्तनम्। **तृतीया** - विष्णोः स्मरणम्। **चतुर्थी** - विष्णोः पादसेवनम्। **पञ्चमी** - विष्णोः अर्चना। **षष्ठी** - विष्णोः वन्दना। **सप्तमी** - विष्णोः दास्यम्। **अष्टमी** - विष्णोः सख्यम्। **नवमी**- विष्णोः चरणयोः आत्मनिवेदनम्" इति।

एतत् श्रुत्वा हिरण्यकशिपुः क्रोधेन अङ्कात् प्रह्लादं क्षिप्तवान् उक्तवान् च - "भोः दैत्याः ! एतं मम पुत्रं मारयन्तु। यतः एषः रोगेण सदृशः अस्ति" इति। दैत्याः प्रह्लादं **प्रथमे** प्रयत्ने शूलेन हन्तुं प्रयत्तवन्तः, परन्तु मारयितुं न शक्तवन्तः। **द्वितीये** प्रयत्ने सः हिरण्यकशिपुः हस्तिना मारयितुं प्रयत्तवान्। **तृतीये** प्रयत्ने सः विषयुक्तेन सर्पेण दंशितवान्। **चतुर्थे** प्रयत्ने सः ब्राह्मणान् मायाप्रयोगेण तस्य हनने नियोजितवान्। **पञ्चमे** प्रयत्ने सः तं पर्वतशिखरात् अधः पातितवान्। **षष्ठे** प्रयत्ने सः शम्बरासुरेण रचिताभिः बहुविधाभिः मायाभिः भायितवान्। **सप्तमे** प्रयत्ने सः तमोयुक्ते प्रकोष्ठे तं बन्धिनं कृतवान्। **अष्टमे** प्रयत्ने सः विषं पायितवान्, अस्मै भोजनं मास्तु इति अपि आदिष्टवान्। **नवमे** प्रयत्ने सः हिमयुक्ते शिखरे अपातयत्। **दशमे** प्रयत्ने सः तम् अग्नौ प्रावेशयत्। **एकादशे** प्रयत्ने समुद्रे पातितवान्। **द्वादशे** प्रयत्ने सः प्रभञ्जने त्यक्तवान्। **त्रयोदशे** प्रयत्ने पर्वतस्य अधः निखातवान्। परन्तु तस्य सर्वे अपि प्रयत्नाः विफलाः अभवन्। भगवतः नाम्नः प्रभावेण प्रह्लादस्य कापि हानिः न अभवत्।

पठत अवगच्छत च -

पूरणप्रत्ययान्ताः			
सङ्ख्या	पुंलिङ्गे	स्त्रीलिङ्गे	नपुंसकलिङ्गे
१ - एकम्	प्रथमः	प्रथमा	प्रथमम्
२ - द्वे	द्वितीयः	द्वितीया	द्वितीयम्
३ - त्रीणि	तृतीयः	तृतीया	तृतीयम्
४ - चत्वारि	चतुर्थः	चतुर्थी	चतुर्थम्
५ - पञ्च	पञ्चमः	पञ्चमी	पञ्चमम्
६ - षट्	षष्ठः	षष्ठी	षष्ठम्
७ - सप्त	सप्तमः	सप्तमी	सप्तमम्
८ - अष्ट	अष्टमः	अष्टमी	अष्टमम्
९ - नव	नवमः	नवमी	नवमम्
१० - दश	दशमः	दशमी	दशमम्
११ - एकादश	एकादशः	एकादशी	एकादशम्
१२ - द्वादश	द्वादशः	द्वादशी	द्वादशम्
१३ - त्रयोदश	त्रयोदशः	त्रयोदशी	त्रयोदशम्
१४ - चतुर्दश	चतुर्दशः	चतुर्दशी	चतुर्दशम्
१५ - पञ्चदश	पञ्चदशः	पञ्चदशी	पञ्चदशम्
१६ - षोडश	षोडशः	षोडशी	षोडशम्
१७ - सप्तदश	सप्तदशः	सप्तदशी	सप्तदशम्
१८ - अष्टादश	अष्टादशः	अष्टादशी	अष्टादशम्
१९ - नवदश	नवदशः	नवदशी	नवदशम्
२० - विंशतिः	विंशतितमः	विंशतितमी	विंशतितमम्
३० - त्रिंशत्	त्रिंशत्तमः	त्रिंशत्तमी	त्रिंशत्तमम्
४० - चत्वारिंशत्	चत्वारिंशत्तमः	चत्वारिंशत्तमी	चत्वारिंशत्तमम्

५० - पञ्चाशत्	पञ्चाशत्तमः	पञ्चाशत्तमी	पञ्चाशत्तमम्
६० - षष्टिः	षष्टितमः	षष्टितमी	षष्टितमम्
७० - सप्ततिः	सप्ततितमः	सप्ततितमी	सप्ततितमम्
८० - अशीतिः	अशीतितमः	अशीतितमी	अशीतितमम्
९० - नवतिः	नवतितमः	नवतितमी	नवतितमम्
१०० - शतम्	शततमः	शततमी	शततमम्

अवधेयम्

सङ्ख्या-पूरणप्रत्ययान्तशब्दयोः भेदः -

(१) **एकम्, द्वे, त्रीणि, चत्वारि** इत्यादयः सङ्ख्याः इति कथ्यन्ते ।

(२) **प्रथमः, द्वितीयः, तृतीयः, चतुर्थः** इत्यादयः पूरणप्रत्ययान्तशब्दाः इति कथ्यन्ते ।

➢ पूरणप्रत्ययान्तशब्दः विशेषणं भवति । अतः सदैव विशेष्यस्य अनुगुणं लिङ्गं विभक्तिं वचनं च प्राप्नोति ।

यथा - **प्रथमः** बालकः । **प्रथमा** बालिका । **प्रथमं** मित्रम् ।

पञ्चमः पुत्रः । **पञ्चमी** तिथिः । **पञ्चमं** भवनम् । **पञ्चमाय** बालकाय पुष्पं ददाति ।

पञ्चमात् वृक्षात् फलं पतति । **पञ्चमे** गृहे उत्सवः अस्ति ।

➢ विंशतितः अग्रे **विंशः, विंशतितमः, त्रिंशः, त्रिंशत्तमः** इति रूपद्वयं भवति । यतः विंशतितः अग्रे सर्वेभ्यः सङ्ख्यावाचकशब्देभ्यः विकल्पेन तमट् प्रत्ययः भवति । विंशः इत्यत्र 'डट्' प्रत्ययः अस्ति । विंशतितमः इत्यत्र 'तमट्' प्रत्ययः अस्ति । यथा - विंशतिः + डट् = **विंशः** ।

विंशतिः+तमट् = **विंशतितमः** । उभौ अपि साधू । परन्तु अत्र अस्माभिः एकमेव रूपं निर्दिष्टम् अस्ति ।

अभ्यासः

१. तालिकायां प्रदत्तानां सङ्ख्यानां पूरणप्रत्ययान्तरूपाणि यथोदाहरणं लिखत -

सङ्ख्या	पुंलिङ्गे	स्त्रीलिङ्गे	नपुंसकलिङ्गे
यथा - ११	एकादशः	एकादशी	एकादशम्
१५			
१८			

११			
७२			
४४			
५४			
६७			
८८			
७१			
२८			
३३			
६१			
७६			
३९			
२२			
९५			
९६			
६			
४			
५			
१			
२७			
६९			

२. **भागवते भगवतः विष्णोः चतुर्विंशतिः अवताराः वर्णिताः सन्ति । तेषु केचन अवताराः अधः दत्ताः सन्ति । तेषु कतिथः अवतारः कः अस्ति इति यथोदाहरणं वाक्यरूपेण लिखत -**

कपिलः (५)	१. वामनः (१५)	२. धन्वन्तरिः (१२)	३. नृसिंहः (१४)
४. दत्तात्रेयः (६)	५. नारदः (३)	६. बलरामः (१९)	७. कृष्णः (२०)
८. वेदव्यासः (१७)	९. नरनारायणौ (४)	१०. वराहः (२)	११. कच्छपः (११)

यथा - विष्णोः पञ्चमः अवतारः कपिलः अस्ति ।

१. -- ।

२. -- ।

३. -- ।

४. -- ।
५. -- ।
६. -- ।
७. -- ।
८. -- ।
९. -- ।
१०. -- ।
११. -- ।

(भागवतपुराणे एवम् अवतारक्रमः वर्णितः अस्ति ।)

३. कोष्ठके प्रदत्तां सङ्ख्यां दृष्ट्वा तस्याः पूरणप्रत्ययान्तरूपेण उचितविभक्तिं संयोज्य रिक्तस्थानानि पूरयत -

यथा - धृतराष्ट्रस्य पुत्रेषु दुर्योधनः प्रथमः । (१)

१. पाण्डवेषु अर्जुनः -------------- अस्ति । (३)
२. पाण्डवेषु सहदेवः -------------- अस्ति । (५)
३. पाण्डवेषु -------------- भीमेन दुःशासनः हतः । (२)
४. पाण्डवेषु -------------- नकुलस्य स्वभावः सरलः अस्ति । (४)
५. कौरवेषु --------------- चित्राक्षः अस्ति । (२५)
६. कौरवेषु --------------- चित्रायुधः अस्ति । (५०)
७. कौरवेषु --------------- कनकध्वजः अस्ति । (९८)
८. कौरवेषु --------------- दृढक्षत्राय दुःशासनः कन्दुकं ददाति । (५५)
९. कौरवेषु --------------- कः अस्ति ? (७१)
१०. कौरवेषु -------------- कः अस्ति ? (१००)

४. चतुष्षष्टिकलासु काश्चन कलाः अधः दत्ताः सन्ति । तासु का कतिथी कला इति पूरणप्रत्ययान्तरूपेण यथोदाहरणं लिखत -

यथा - नाटिकाख्यायिकादर्शनं द्वात्रिंशत्तमीकला । (३२)

१. पुस्तकवाचनं --------------------- । (३१)
२. काव्यसमस्यापूरणं -------------------- । (३३)
३. वस्त्रगोपनं ------------------------ । (५८)
४. शुकसारिकाप्रलपनं -------------------- । (४४)
५. देशभाषाज्ञानं --------------------- । (४९)
६. उत्सादनं ------------------------------ । (४५)
७. अभिधानकोषच्छन्दोज्ञानं ------------ । (५७)
८. वैनायिकी विद्या ------------------- । (६२)
९. वैजायिकी विद्या -------------------- । (६३)
१०. वैतालिकी विद्या ------------------- । (६४)

११. मानसी काव्यक्रिया ------------------ । (५४) १२. वृक्षायुर्वेदयोगः ------------------- । (४२)

१३. हस्तलाघवं ------------------------ । (२३) १४. सुगन्धयुक्तिः ------------------- । (१९)

१५. रौप्यरत्नपरीक्षा ---------------------- । (३८)

५. **यथोचितं मेलयत -**

यथा - १. द्वादशे	भवने
२. चतुर्दश्यां	बालिकायै
३. षष्ठी	पङ्क्तिम्
४. त्रिंशत्तमस्य	तिथौ
५. पञ्चदशेन	सरिता
६. अष्टचत्वारिंशत्तमीं	रोगिणम्
७. नवनवतितम्यै	बालकस्य
८. द्विचत्वारिंशत्तमे	दिनाङ्के
९. अष्टात्रिंशत्तमं	उत्पीठिका
१०. सप्तम्या	प्रधानमन्त्रिणा

६. **भगवद्गीतायाः अध्यायानां नामानि तालिकायां दत्तानि सन्ति । एतानि दृष्ट्वा कः कतिथः अध्यायः इति यथोदाहरणं लिखत -**

१ - अर्जुनविषादयोगः	२ - साङ्ख्ययोगः	३ - कर्मयोगः
४ - ज्ञानकर्मसंन्यासयोगः	५ - कर्मसंन्यासयोगः	६ - आत्मसंयमयोगः
७ - ज्ञानविज्ञानयोगः	८ - अक्षरब्रह्मयोगः	९ - राजविद्याराजगुह्ययोगः
१० - विभूतियोगः	११ - विश्वरूपदर्शनयोगः	१२ - भक्तियोगः
१३ - क्षेत्रक्षेत्रज्ञविभागयोगः	१४ - गुणत्रयविभागयोगः	१५ - पुरुषोत्तमयोगः
१६ - दैवासुरसम्पद्विभागयोगः	१७ - श्रद्धात्रयविभागयोगः	१८ - मोक्षसंन्यासयोगः

यथा - १. गीतायाम् अर्जुनविषादयोगः <u>प्रथमः</u> अध्यायः ।

२. --- ।

३. --- ।

४. --- ।

५. --- ।

६. --- ।

७. --- ।

८. --- ।

९. -- ।
१०. -- ।
११. -- ।
१२. -- ।
१३. -- ।
१४. -- ।
१५. -- ।
१६. -- ।
१७. -- ।
१८. -- ।

७. मञ्जूषायां भगवद्गीतायाः अष्टादशाध्यायस्य केषाञ्चित् श्लोकानाम् एकः पादः श्लोकसङ्ख्यया सह प्रदत्तः अस्ति । तदाधारेण यथोदाहरणं वाक्यानि लिखत -

(१.) सिद्धिं प्राप्तो यथा ब्रह्म । ५०	(२.) समः सर्वेषुभूतेषु । ५४	(३.) बुद्धियोगम् उपाश्रित्य । ५७
(४.) ईश्वरः सर्वभूतानाम् । ६१	(५.) शृणु मे परमं वचः । ६४	(६.) कश्चिन्मे प्रियकृत्तमः । ६९
(७.) ज्ञानयज्ञेन तेनाहम् । ७०	(८.) करिष्ये वचनं तव । ७३	(९.) हृष्यामि च पुनः पुनः । ७७
(१०.) यत्र योगेश्वरः कृष्णः । ७८	(११.) यत्र पार्थो धनुर्धरः । ७८	

यथा - १. गीतायाः अष्टादशाध्यायस्य <u>पञ्चाशत्तमे</u> श्लोके अयं पादः अस्ति ।

२. -- ।
३. -- ।
४. -- ।
५. -- ।
६. -- ।
७. -- ।
८. -- ।
९. -- ।
१०. -- ।
११. -- ।

सरस्वतीमातुः द्वादश नामानि उच्चैः पठत अत्र प्रयुक्तानि पूरणप्रत्ययान्तरूपाणि जानीत च -

प्रथमं भारती नाम **द्वितीयं** च सरस्वती ।
तृतीयं शारदा देवी **चतुर्थं** हंसवाहिनी ॥१॥

पञ्चमं तु जगन्माता **षष्ठं** वागीश्वरी तथा ।
सप्तमं बुद्धिदात्री च **अष्टमं** वरदायिनी ॥२॥

नवमं चैव कौमारी **दशमं** ब्रह्मचारिणी ।
एकादशं चन्द्रघण्टा **द्वादशं** भुवनेश्वरी ॥३॥

द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः ।
जिह्वाग्रे वसति तस्य ब्रह्मरूपा सरस्वती ॥४॥

एतत् सुभाषितम् उच्चैः पठत -

धनिकः श्रोत्रियो राजा नदी वैद्यस्तु **पञ्चमः** ।
पञ्च यत्र न विद्यन्ते न तत्र दिवसं वसेत् ॥

यस्मिन् स्थाने धनिकः, वेदज्ञः, प्रशासकः, नदी (जलस्रोतः), चिकित्सकः चेति एते पञ्च न भवन्ति तत्र एकं दिवसम् अपि न तिष्ठेत् ।

गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ।
अथवा विद्यया विद्या **चतुर्थो** नोपपद्यते ॥

विद्यार्जनाय त्रिविधाः उपक्रमाः सन्ति -

(१) गुरुसेवया विद्यार्जनं कर्तुं शक्यते ।

(२) अधिकेन धनेन वा विद्यार्जनं कर्तुं शक्यते ।

(३) अथवा विद्यायाः माध्यमेन विद्यार्जनं कर्तुं शक्यते । यथा - भवान् मां व्याकरणं पाठयतु अहं भवन्तं संगीतं पाठयामि । एतान् विहाय विद्यार्जनाय चतुर्थः उपायः नस्ति ।

ज्ञानवर्धिनी

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥

श्रवणम्, कीर्तनम्, स्मरणम्, पादसेवनम्, अर्चनम्, वन्दनम्, दास्यम्, सख्यम्, आत्मनिवेदनम् इत्येवं भक्तिः नवविधा भवति । भक्तः समर्पणभावेन ताम् आचरति चेत् (तेषु अन्यतमं विधिम् आचरति चेदपि) कल्याणं प्राप्नोति इति पुराणे वर्णितम् अस्ति ।

****

नहुषस्य पतनम्

सर्वनामशब्दाः (पुंलिङ्गम्, नपुंसकलिङ्गम्)

११



शल्यः - हे युधिष्ठिर !एकदा बुद्धिमान् इन्द्रः देवैः तथा च लोकपालैः सह उपविश्य नहुषवधस्य उपायं चिन्तयति स्म। **तस्मिन्** समये तत्र तपस्वी भगवान् अगस्त्यः प्रकटितः अभवत्। **असौ** अकथयत् - 'इदं परं सौभाग्यं यत् **त्वं** विश्वरूप-विनाशेन वृत्रासुरवधेन च निरन्तरम् अभ्युदयशीलः जायमानः असि' इति।

इन्द्रः - 'महर्षे ! अत्र **भवतः** स्वागतम्। **भवतः** दर्शनेन **अहं** प्रसन्नः अभवम्। **भवतः** सेवायां पाद्यम्, अर्घ्यम्, आचमनीयं, गौः च समर्पयामि। कृपया गृह्णातु' इति।

शल्यः - हे युधिष्ठिर ! मुनिश्रेष्ठः अगस्त्यः सत्कारेण प्रसन्नो भूत्वा आसने उपाविशत्। तदनन्तरम् इन्द्रः अपृच्छत् - 'हे भगवन् ! नहुषः स्वर्गात् कथं भ्रष्टताम् आप्नोत् ?' इति।

अगस्त्यः - हे इन्द्र ! पापकारिणः नहुषात् पीडिताः महर्षयः **कस्मिंश्चित्** दिने नहुषम् अपृच्छन् - 'हे देवेन्द्र ! गवां प्रोक्षणस्य विषये वेदेषु **ये** मन्त्राः प्रोक्ताः सन्ति, **किं भवान् तान्** मन्त्रान् प्रामाणिकान् मनुते ? तदा नहुषः उदतरत् - '**अहम् एतान्** वेदमन्त्रान् प्रामाणिकान् न मन्वे' इति।

इन्द्रः - हे महर्षे ! यदा ऋषयः एवम् उक्तवन्तः तदा नहुषः किम् अवदत् ?

अगस्त्यः - तदा ऋषयः अकथयन् - '**त्वम्** अधर्मप्रवृत्ति-कारणात् धर्मस्य तत्त्वं न अधिगच्छसि। पुराकाले महर्षयः **एतान्** वेदमन्त्रान् **अस्माकं** कृते प्रमाणभूतान् असूचयन्' इति।

इन्द्रः - ततः किम् अभवत् ?

अगस्त्यः - ततः नहुषः **तैः** सह विवादम् प्रारभत। एवं च अधर्मेण पीडितः **सः** पापी **मम** मस्तके पादप्रहारम् अकरोत्। **अनेन तस्य** समग्रतेजः नष्टम् अभवत्। **असौ** राजा नहुषः श्रीहीनः अभवत्।

इन्द्रः - पुनः किं जातम् ?

अगस्त्यः - तदा तमोगुणैः अत्यन्तं पीडितं नहुषम् **अहम्** उक्तवान् - हे राजन् ! **पूर्वैः** ब्रह्मर्षिभिः **यस्य** अनुष्ठानं कृतं **यत्** च प्राणभूतं मतम्, **तत्** वेदमतं **भवान्** दोषयुक्तम् अप्रामाणिकं च वदति। पुनः च एतदतिरिच्य **भवान् मम** शिरसि पादप्रहारम् अकरोत्। अयि दुष्ट ! **त्वं** ब्रह्मसदृशैः दुर्धर्षिभिः ऋषिभिः शिबिकां वाहयसि। **अनेन त्वं** तेजोहीनः जातः। **तव** पुण्यं क्षीणम् अभवत्। अतः **त्वं** स्वर्गात् भ्रष्टो भूत्वा पृथिव्यां पत।

अवधेयम्

- **सर्व, अन्य, तद्, एतद्, यद्, इदम्, किम्, अस्मद्, युष्मद्, भवत्** इत्यादयः शब्दाः सर्वनामशब्दाः इति उच्यन्ते।
- सर्वनामशब्दाः विशेषणानि भवन्ति।
- एतेषु बहूनां विभक्तिरूपाणि, तेषां प्रयोगं च प्रथमपुस्तके भवन्तः ज्ञातवन्तः।
- अस्मिन् पाठे **इदम्, यद्, अन्यत्** इत्येतेषां सर्वनाम्नां विशेषप्रयोगः कृतः अस्ति।

एतानि रूपाणि सावधानं पठत -

'इदम्'शब्दः - (पुंलिङ्गरूपाणि)

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्तिः
अयम्	इमौ	इमे	प्रथमाविभक्तिः
इमम्	इमौ	इमान्	द्वितीयाविभक्तिः
अनेन	आभ्याम्	एभिः	तृतीयाविभक्तिः
अस्मै	आभ्याम्	एभ्यः	चतुर्थीविभक्तिः
अस्मात्	आभ्याम्	एभ्यः	पञ्चमीविभक्तिः
अस्य	अनयोः	एषाम्	षष्ठीविभक्तिः
अस्मिन्	अनयोः	एषु	सप्तमीविभक्तिः

'इदम्'शब्दः (नपुंसकलिङ्गरूपाणि)

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्तिः
इदम्	इमे	इमानि	प्रथमाविभक्तिः
इदम्	इमे	इमानि	द्वितीयाविभक्तिः
अनेन	आभ्याम्	एभिः	तृतीयाविभक्तिः
अस्मै	आभ्याम्	एभ्यः	चतुर्थीविभक्तिः
अस्मात्	आभ्याम्	एभ्यः	पञ्चमीविभक्तिः
अस्य	अनयोः	एषाम्	षष्ठीविभक्तिः
अस्मिन्	अनयोः	एषु	सप्तमीविभक्तिः

'अदस्' शब्दः - (पुंलिङ्गरूपाणि)

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्तिः
असौ	अमू	अमी	प्रथमाविभक्तिः
अमुम्	अमू	अमून्	द्वितीयाविभक्तिः
अमुना	अमूभ्याम्	अमीभिः	तृतीयाविभक्तिः
अमुष्मै	अमूभ्याम्	अमीभ्यः	चतुर्थीविभक्तिः
अमुष्मात्	अमूभ्याम्	अमीभ्यः	पञ्चमीविभक्तिः
अमुष्य	अमुयोः	अमीषाम्	षष्ठीविभक्तिः
अमुष्मिन्	अमुयोः	अमीषु	सप्तमीविभक्तिः

'अदस्'शब्दः(नपुंसकलिङ्गरूपाणि)

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्तिः
अदः	अमू	अमूनि	प्रथमाविभक्तिः
अदः	अमू	अमूनि	द्वितीयाविभक्तिः
अमुना	अमूभ्याम्	अमीभिः	तृतीयाविभक्तिः
अमुष्मै	अमूभ्याम्	अमीभ्यः	चतुर्थीविभक्तिः
अमुष्मात्	अमूभ्याम्	अमीभ्यः	पञ्चमीविभक्तिः
अमुष्य	अमुयोः	अमीषाम्	षष्ठीविभक्तिः
अमुष्मिन्	अमुयोः	अमीषु	सप्तमीविभक्तिः

'अन्य'शब्दः (पुंलिङ्गरूपाणि)

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्तिः
अन्यः	अन्यौ	अन्ये	प्रथमाविभक्तिः
अन्यम्	अन्यौ	अन्यान्	द्वितीयाविभक्तिः

अन्येन	अन्याभ्याम्	अन्यैः	तृतीयाविभक्तिः
अन्यस्मै	अन्याभ्याम्	अन्येभ्यः	चतुर्थीविभक्तिः
अन्यस्मात्	अन्याभ्याम्	अन्येभ्यः	पञ्चमीविभक्तिः
अन्यस्य	अन्ययोः	अन्येषाम्	षष्ठीविभक्तिः
अन्यस्मिन्	अन्ययोः	अन्येषु	सप्तमीविभक्तिः

'अन्य'शब्दः (नपुंसकलिङ्गरूपाणि)

एकवचनम्	**द्विवचनम्**	**बहुवचनम्**	**विभक्तिः**
अन्यत्	अन्ये	अन्यानि	प्रथमाविभक्तिः
अन्यत्	अन्ये	अन्यानि	द्वितीयाविभक्तिः
अन्येन	अन्याभ्याम्	अन्यैः	तृतीयाविभक्तिः
अन्यस्मै	अन्याभ्याम्	अन्येभ्यः	चतुर्थीविभक्तिः
अन्यस्मात्	अन्याभ्याम्	अन्येभ्यः	पञ्चमीविभक्तिः
अन्यस्य	अन्ययोः	अन्येषाम्	षष्ठीविभक्तिः
अन्यस्मिन्	अन्ययोः	अन्येषु	सप्तमीविभक्तिः

'यद्'शब्दः (पुंलिङ्गरूपाणि)

एकवचनम्	**द्विवचनम्**	**बहुवचनम्**	**विभक्तिः**
यः	यौ	ये	प्रथमाविभक्तिः
यम्	यौ	यान्	द्वितीयाविभक्तिः
येन	याभ्याम्	यैः	तृतीयाविभक्तिः
यस्मै	याभ्याम्	येभ्यः	चतुर्थीविभक्तिः
यस्मात्	याभ्याम्	येभ्यः	पञ्चमीविभक्तिः
यस्य	ययोः	येषाम्	षष्ठीविभक्तिः
यस्मिन्	ययोः	येषु	सप्तमीविभक्तिः

'यद्'शब्दः(नपुंसकलिङ्गरूपाणि)

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्तिः
यद्	ये	यानि	प्रथमाविभक्तिः
यद्	ये	यानि	द्वितीयाविभक्तिः
येन	याभ्याम्	यैः	तृतीयाविभक्तिः
यस्मै	याभ्याम्	येभ्यः	चतुर्थीविभक्तिः
यस्मात्	याभ्याम्	येभ्यः	पञ्चमीविभक्तिः
यस्य	ययोः	येषाम्	षष्ठीविभक्तिः
यस्मिन्	ययोः	येषु	सप्तमीविभक्तिः

अभ्यासः

१. पाठं पठित्वा प्रश्नानाम् उत्तराणि लिखत -

१. कस्मिन् समये तत्र तपस्वी भगवान् अगस्त्यः प्रकटितः अभवत् ?

-- ।

२. अगस्त्यस्य दर्शनेन कः प्रसन्नः अभवत् ?

-- ।

३. कः अधर्मप्रवृत्ति-कारणात् धर्मस्य तत्त्वं न अधिगच्छति ?

-- ।

४. ततः नहुषः कैः सह विवादं प्रारभत ?

-- ।

५. कस्य पुण्यं क्षीणम् अभवत् ?

-- ।

२. अधः तालिकायां प्रदत्तानां पदानां सर्वनाम, लिङ्गं विभक्तिं वचनं च यथोदाहरणं लिखत -

रूपम्	सर्वनाम	लिङ्गम्	विभक्तिः	वचनम्
यथा - इदम्	इदम्	नपुंसकलिङ्गम्	प्रथमाविभक्तिः	एकवचनम्
असौ				
अहम्				
त्वम्				
भवतः				
ये				
कस्मिन्				
तस्मिन्				
एतान्				

३. 'यद्'शब्दस्य उचितानि रूपाणि रिक्तस्थानेषु पूरयत -

भगवद्गीतायाः द्वितीयाध्याये स्थितप्रज्ञस्य **यानि** लक्षणानि कथितानि तानि यदि अस्मासु भवन्ति तर्हि वयम् अपि स्वजीवनं नियन्त्रयितुं सम्यक् नियोजयितुं च शक्नुमः ।

१. -------------- मनः दुःखेषु अनुद्विग्नं सुखेषु विगतस्पृहं च भवति सः स्थितप्रज्ञः अस्ति ।

२. ----------------- सर्वान् कामान् प्रजहाति, आत्मनि एव तुष्टः च भवति सः स्थितप्रज्ञः अस्ति ।

३. शुभम् अशुभं वा प्राप्य ------------- आनन्दः द्वेषः वा न उपजायते सः स्थितप्रज्ञः अस्ति ।

४. इन्द्रियाणि इन्द्रियार्थेभ्यः ------------- संहृतानि सः स्थितप्रज्ञः अस्ति ।

५. सर्वभूतानां ----------- निशा भवति तस्यां निशायां संयमी जागर्ति ।

६. समुद्रम् आपः इव ---------- सर्वे कामाः प्रविशन्ति स शान्तिम् आप्नोति ।

७. --------------- शान्तिः प्राप्यते सः निःस्पृहः निरहङ्कारः च भवति ।

८. ------------- रागद्वेषादयः दोषाः वियुक्ताः भवन्ति सः आत्मवशी प्रसादम् अधिगच्छति ।

९. ------------- स्थित्वा मुनिः ब्रह्मनिर्वाणम् ऋच्छति सा ब्राह्मी स्थितिः इति उच्यते ।

४. मञ्जूषातः उचितानि सर्वनामरूपाणि चित्वा रिक्तस्थानानि पूरयत -

एतत्, तस्मिन्, एतस्य, अस्य, अन्यानि, इमम्, सः, तस्य, सर्वेषाम्, तम्, अस्मिन्, एतम्

एतत् सरस्वतीमन्दिरम् अस्ति । -------------- ग्रामे यदा प्रथमविद्यालयः आरब्धः तदा संस्कृतविद्वान् ----------- देवालयं मन्दिरं च निर्मितवान्। ------------- ग्रामस्य श्रेष्ठी तथा कर्तुं महता आदरेण ---------- आदिष्टवान्। अत्रस्थः सरस्वत्याः विग्रहः ------------ स्थलस्य वैशिष्ट्यं वर्धयति । ---------- ग्रन्थालयः अस्ति । बहवः जनाः ----------- विशालतां दृष्ट्वा आश्चर्यान्विताः भवन्ति । विशाले ---------------------------- ग्रन्थालये शास्त्राणां पुस्तकानि सम्यक् स्थापितानि सन्ति । जनाः भाषापुस्तकानि, इतिहासपुस्तकानि, पर्यटनविषयकपुस्तकानि --------------- च अत्र पठितुं शक्नुवन्ति । अतः संस्कृतपण्डिताः, अनुरागिणः च -------------- ग्रामम् अवश्यम् आगच्छन्ति ।

५. यथोदाहरणम् अधः प्रदत्तेषु सर्वनामपदानां समूहेषु भिन्नं सर्वनामरूपं चित्वा रिक्तस्थानेषु लिखत -

	सर्वनामपदानां समूहः	भिन्नं रूपम्
यथा -	एषा, एतयोः, अयम्, एताभिः	अयम्
१.	तम्, तस्मात्, सः, अन्ये	----------
२.	ये, याभ्याम्, तेषु, येषु	----------
३.	एतम्, एतैः, एतस्मात्, तस्मात्	----------
४.	तानि, ते, तौ, तत्	----------
५.	कान्, कैः, कस्मै, सा	----------
६.	सर्वौ, सर्वे, सर्वैः, अन्यः	----------
७.	भवन्तः, भवता, एतस्याः, भवान्	----------
८.	अन्येन, सर्वेण, अन्यस्मै, अन्ययोः	----------
९.	कया, कस्यै, ताः, काः	----------
१०.	या, यया, यस्याः, तया	----------

****

सभायाम् असौ द्रौपदी

सर्वनामशब्दप्रयोगः (स्त्रीलिङ्गम्) **१२**

एतां कथां पठत अवगच्छत च -



महाभारते कौरवसभायाम् अपमानिता द्रौपदी हृदयविदारकं विलापम् अकरोत्। दुर्योधनस्य दुरात्मनः दुःशासनस्य च अत्याचारं विरुद्ध्य प्रतिशोधमानसा **असौ** सभायाम् अवदत् -

द्रौपदी - **अहम् अस्यां** कौरवसभायां कुरुवंशिनः महात्मनः प्रणमामि। **अहं** व्यग्रताकारणात् पूर्वं न प्रणतवती। अतः **अस्याः** दुष्टतायाः कृते **अहं** क्षन्तव्या।

वैशम्पायनः - दुःशासनस्य पुनः पुनः कर्षणेन **इयं** द्रौपदी भूमौ न्यपतत्। **सा यस्यां** दुरवस्थायाम् अवस्थिता आसीत् **तस्याः** अवस्थितेः **सा** कदापि योग्या न आसीत्।

द्रौपदी - हा धिक्! **एतां** सभाम्। **अस्यां** सभायाम् **अहं** स्वयंवरकाले आगता आसम्। तस्मिन् एव समये रङ्गभूमौ उपस्थिताः राजानः **माम्** अत्र अपश्यन्। ततः परं न केनापि **अहम्** अत्र दृष्टा। परन्तु अद्य **एतां** जनसभाम् आगत्य **अहं** सर्वेषां नेत्राणां लक्ष्यीभूता अभवम्। अधुना **अहं** समस्तान् कौरवश्रेष्ठान् पृच्छामि यत् - किम् **इयं** धर्मराजयुधिष्ठिरस्य पत्नी दासी उत अदासी? भवन्तः यथा आदिशन्ति तथा **एषा** करिष्यति इति। पुनः द्रौपदी कुरुवंशिनः उद्दिश्य कथयति यत् - हे कुरुवंशिनः क्षत्रियाः! किम् **एषा** कुरुकुलवधूः भवद्भिः जिता उत न? **इयं** दुःखिता पाण्डवपत्नी भवतां मुखात् समुचितम् उत्तरं श्रोतुम् इच्छति। उत्तरं श्रुत्वा एव अग्रे किं करणीयम् इति निर्णयं करिष्यति।

भीष्मः - हे कल्याणि! अहं पूर्वमेव अवोचम् यत् धर्मगतिः अतीव सूक्ष्मा वर्तते। लोकज्ञाः महात्मानः अपि अस्मिन् विषये यथोचितं निर्णयं कर्तुम् असमर्थाः। अतः अहं **भवत्याः** प्रश्नानाम् उत्तराणि वक्तुं न समर्थः।

हे पाञ्चालकुमारि! **भवत्याः** इदम् आचरणम् अनुकूलम् एव अस्ति। यतः **भवती अस्यां** विपत्तौ अपि धर्मम् एव पश्यति। **भवती** जिता उत न अस्य निर्णयं तु धर्मराजः एव कर्तुं योग्यः।

एतानि वाक्यानि सावधानतया उच्चैः पठत -

इयं मम माता।

इमाम् अहं विद्यालये 'आर्ये' इति सम्बोधयामि।

अस्यै सङ्गीतम् अत्यन्तं रोचते।

अस्याः प्रियं पुस्तकं 'श्रीमद्भगवद्गीता' अस्ति।

इयं मम विद्यालये शिक्षिका अस्ति।

अनया लिखितानि वाक्यानि सुन्दराणि भवन्ति।

अस्याः छात्राः बिभ्यति।

अस्यां शिक्षिकायां छात्राणां महान् आदरः अस्ति।

विभक्तिः	'तद्'शब्दः (स्त्रीलिङ्गरूपाणि)		
	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमाविभक्तिः	सा	ते	ताः
द्वितीयाविभक्तिः	ताम्	ते	ताः
तृतीयाविभक्तिः	तया	ताभ्याम्	ताभिः
चतुर्थीविभक्तिः	तस्यै	ताभ्याम्	ताभ्यः
पञ्चमीविभक्तिः	तस्याः	ताभ्याम्	ताभ्यः
षष्ठीविभक्तिः	तस्याः	तयोः	तासाम्
सप्तमीविभक्तिः	तस्याम्	तयोः	तासु

'एतद्'शब्दः (स्त्रीलिङ्गरूपाणि)		
एकवचनम्	द्विवचनम्	बहुवचनम्
एषा	एते	एताः
एताम्	एते	एताः
एतया	एताभ्याम्	एताभिः
एतस्यै	एताभ्याम्	एताभ्यः
एतस्याः	एताभ्याम्	एताभ्यः
एतस्याः	एतयोः	एतासाम्
एतस्याम्	एतयोः	एतासु

	'अदस्'शब्दः (स्त्रीलिङ्गरूपाणि)		
	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमाविभक्तिः	असौ	अमू	अमूः
द्वितीयाविभक्तिः	अमुम्	अमू	अमूः
तृतीयाविभक्तिः	अमुया	अमूभ्याम्	अमूभिः
चतुर्थीविभक्तिः	अमुष्यै	अमूभ्याम्	अमूभ्यः
पञ्चमीविभक्तिः	अमुष्याः	अमूभ्याम्	अमूभ्यः
षष्ठीविभक्तिः	अमुष्याः	अमुयोः	अमूषाम्
सप्तमीविभक्तिः	अमुष्याम्	अमुयोः	अमूषु

'इदम्'शब्दः (स्त्रीलिङ्गरूपाणि)		
एकवचनम्	द्विवचनम्	बहुवचनम्
इयम्	इमे	इमाः
इमाम्	इमे	इमाः
अनया	आभ्याम्	आभिः
अस्यै	आभ्याम्	आभ्यः
अस्याः	आभ्याम्	आभ्यः
अस्याः	अनयोः	आसाम्
अस्याम्	अनयोः	आसु

अभ्यासः

१. यथोदाहरणं स्थूलाक्षरैः दर्शितस्य पदस्य स्थाने 'किम्'शब्दस्य स्त्रीलिङ्गरूपाणि उपयुज्य प्रश्ननिर्माणं कुरुत -

यथा - <u>**उत्तरा**</u> **जलम् आहरति स्म।** <u>**का**</u> **जलम् आहरति स्म ?**

१. सभायाम् **असौ** अपृच्छत्। -- ?

२. अहं **भवत्याः** प्रश्नानाम् उत्तराणि वक्तुं न समर्थः। --- ?

३. **अहं** कुरुवंशिनः महात्मनः प्रणमामि। --- ?

४. भवती **अस्यां** विपत्तौ अपि धर्मम् एव पश्यति। --- ?

५. **भवत्याः** इदम् आचरणम् अनुकूलम् एव अस्ति। --- ?

६. **इयं** दुःखिता पाण्डवपत्नी भवतां मुखात् समुचितम् उत्तरं श्रोतुम् इच्छति ।
--- ?

७. **भवती** जिता उत न अस्य निर्णयं तु धर्मराजः एव कर्तुं योग्यः।
--- ?

२. स्थूलाक्षरैः दर्शितं पदम् आधृत्य 'तद्-एतत् इति' शब्दयोः रूपैः यथोदाहरणं रिक्तस्थानानि पूरयत -

यथा - भगवतः (तत्) सा माया दुरत्यया अस्ति।

१. वेदवादरताः अविपश्चितः (तत्) ---------------- **पुष्पितां वाचं** प्रवदन्ति।
२. (एतत्) -------------- **व्यवसायात्मिका बुद्धिः** समाधौ न विधीयते।
३. भक्तस्य (तत्) --------------- **अचलां श्रद्धाम्** अहं विदधामि।
४. सः (एतत्) --------------- **श्रद्धया** युक्तः तस्याः आराधनम् ईहते।
५. (तत्) --------------- **सिद्धिं** काङ्क्षन्तः इह देवताः यजन्ते।
६. (एतत्) -------------- **मायया** अपहृतज्ञानाः आसुरं भावम् आश्रयन्ते।
७. सञ्जयः धृतराष्ट्रम् (तत्) ---------------- **युद्धवार्तां** श्रावयति।
८. (एतत्) ---------------- **भगवद्गीतायाम्** अष्टादशाध्यायाः सन्ति।
९. (तत्) ----------------- **भगवद्गीतायाः** द्वादशेऽध्याये भक्तियोगः वर्णितः अस्ति।
१०. संयतेन्द्रियाणाम् (एतत्) -------------- **प्रज्ञा** प्रतिष्ठिता भवति।

३. कोष्ठकात् उचितं विकल्पं चित्वा यथोदाहरणं रिक्तस्थानानि पूरयत -

यथा - इदं कुरुक्षेत्रम्। अस्मिन् महाभारतयुद्धम् अभवत्। (अस्याम्, अनयोः, अस्मिन्)

१. इयं भगवद्गीता। ------------------ अष्टादशाध्यायाः सन्ति। (अस्मिन्, अस्याम्, अनयोः)
२. इयं माया दुरत्यया। -------------- मर्त्यजीवाः बद्धाः सन्ति। (अनया, एभिः अनेन)
३. वसिष्ठस्य एषा धेनुः। ----------------------- नाम नन्दिनी अस्ति। (अस्याः, अनया, एतस्याः)
४. एषा संस्कृतपाठशाला। -------------- छात्राः आगच्छन्ति। (एतस्याः, एताभ्यः, एतस्मात्)
५. सा अध्यात्मविद्या। जनाः --------------- श्रेयः प्राप्नुवन्ति। (तस्मात्, तस्याः, अस्य)
६. सा कृपी। ---------------------- भ्राता कृपाचार्यः अस्ति। (तस्य, तस्याः, तेषाम्)

७. एषा संस्कृतकक्ष्या। ---------------- कक्ष्यायां पठिष्यामि। (तस्याम्, तस्मिन्, एतस्याम्)

८. इयं मालतीलता। ---------------------- पुष्पाणि चिनोतु। (अस्याम्, अस्याः, अस्मात्)

९. एषा धरित्रीमाता। -------------------- उपरि सर्वे वसन्ति। (अस्याः, अस्याम्, एतस्याः)

१०. भवती गीतां पठतु। ------------- जीवनं सम्यक् भविष्यति। (भवत्याः, भवतः, भवताम्)

११. ताः बालाः। ------------------------------ क्रीडनं रोचते। (तस्यै, तस्याः, ताभ्यः)

१२. एषा द्रौपदी। -------------------- पतिः युधिष्ठिरः अस्ति। (तस्याः, एतस्याः, एतस्याम्)

४. **अधः लिखितान् गीताश्लोकान् सम्यक् पठत सर्वनामपदानि परिशीलयत च -**

या निशा सर्वभूतानां **तस्यां** जागर्ति संयमी।
यस्यां जाग्रति भूतानि **सा** निशा पश्यतो मुनेः॥ (श्रीमद्भग. २.६९)

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये।
बन्धं मोक्षं च **या** वेत्ति बुद्धिः **सा** पार्थ सात्त्विकी॥ (श्रीमद्भग. १८.३०)

यया धर्ममधर्मं च कार्यं चाकार्यमेव च।
अयथावत्प्रजानाति बुद्धिः **सा** पार्थ राजसी॥ (श्रीमद्भग. १८.३१)

अधर्मं धर्ममिति **या** मन्यते तमसावृता।
सर्वार्थान्विपरीतांश्च बुद्धिः **सा** पार्थ तामसी॥ (श्रीमद्भग. १८.३२)

धृत्या **यया** धारयते मनःप्राणेन्द्रियक्रियाः।
योगेनाव्यभिचारिण्या धृतिः **सा** पार्थ सात्त्विकी॥ (श्रीमद्भग. १८.३३)

सूक्तिः - "विद्यया शस्यते लोकः।" (जगति विद्यया एव जनस्य प्रशंसा भवति।)

प्रहेलिका

विशेषः - (१) सुप्तो न नेत्रे निमीलयामि जलस्य मध्ये निवसामि नित्यम्।
स्वजातिजीवाः मम भोजनानि वदन्तु मान्याः मम नामधेयम्॥

अहं सुप्तः अपि नेत्रनिमीलनं न करोमि। सदैव जले निवसामि। स्वजातिजीवान् एव भोजनरूपेण खादामि। मान्यवराः! वदन्तु मम नाम किम्? कः अहम्?

(२) न तस्यादिः न तस्यान्तं मध्ये यस्तस्य तिष्ठति।
ममाप्यस्ति तवाप्यस्ति यो जानाति सः पण्डितः॥

एतस्य आदौ न अस्ति। अन्ते अपि न अस्ति। अस्य मध्ये यः अस्ति। एतत् मम अपि अस्ति। तव अपि अस्ति। एतत् किम्? यः एतत् जानाति सः पण्डितः।

(उत्तरम् - १. मत्स्यः २. नयनम्)

जीवनयापनस्य केचन उपायाः

चित्-चन-प्रयोगः **१३**



एतत् कथानकम् उच्चैः पठत अवगच्छत च -

श्रीमद्भगवद्गीतायां जीवनयापनस्य **केचन** उपायाः उक्ताः । तेषु **केचित्** अंशाः अत्र प्रस्तूयन्ते । मनुष्येण **कस्मिंश्चित्** अपि प्रसङ्गे विषादः न करणीयः । **कश्चिद्** अपि मानवः अधीरतां मा आप्नुयात् सर्वदा स्थितप्रज्ञः सन् कर्मणि प्रवर्तेत । **कुत्रचित्** अपि कार्यं कुर्मः तत्र सर्वदा **कस्याश्चिद्** अपि फलासक्तेः प्राधान्यं न भवेत् । **कथञ्चित्** अपि फले मानवस्य अधिकारः न भवति । उक्तं यथा भगवता - "कर्मण्येवाधिकारस्ते मा फलेषु **कदाचन**" इति । यः **कश्चन** अपि प्राणी ज्ञानस्य कर्मणः संन्यासस्य च महत्त्वम् अधिगच्छति सः सांसारिकबन्धनेभ्यः मुक्तः भवति । **कस्यचित्** अपि मानवस्य कर्मयोगं विना मनसा इन्द्रियैः शरीरेण वा सम्पूर्णेषु कर्मसु कर्तृत्वत्यागः असम्भवः वर्तते । यदा यदा **केनचिद्** मानवेन द्वेषरहितस्य वस्तुषु आसक्तिरहितस्य जीवनस्य यापनं क्रियते तदा सः वस्तुतः संन्यासी एव । उक्तं च भगवता - ज्ञेयः सः नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति । यः योगभ्रष्टः भवति दुर्गतिः तस्यापि न भवति । सः तु अपरस्मिन् जन्मनि श्रीमतां गेहे जन्म प्राप्नोति अथवा तस्य जन्म धीमतां कुले भवति । सहस्रेषु वर्षेषु **कश्चन** एकः मोक्षं प्राप्तुं प्रयत्नं करोति । तेषु **केषुचित् कश्चन** एकः एव मम यथार्थं स्वरूपं जानाति । यथा -

मनुष्याणां सहस्रेषु **कश्चित्** यतति सिद्धये ।
यततामपि सिद्धानां **कश्चिन्**मां वेत्ति तत्त्वतः ।। (श्रीमद्भग.७.३)

ये **केचन** जनाः अनन्यभक्त्या मां पूजयन्ति, तेषां योगक्षेमम् अहं पश्यामि । अतः केनचिद् अपि मानवेन मम स्मरणं न त्यक्तव्यम्, येषु **केषुचिद्** अपि कर्मणि ते मया नियुक्ताः ते तत्तत्कर्मसु मनः नियोजयेयुः । **कस्मिंश्चित्** अपि कर्मणि रतेन मानवेन तस्मिन् कार्ये महता परिश्रमेण श्रेष्ठत्वं प्राप्तव्यम् । संसारे **यत्किञ्चित्** प्रवर्तमानं तत् सर्वं मयि निहितं वर्तते । यैः **कैश्चिद्** अपि भक्तैः मयि विश्वस्य मम स्मरणपूर्वकं समाधिः स्वीक्रियते तेषां **कयाचित्** दृढभक्त्या अहं बद्धः भवामि । मनुजेन संसारे **कस्यचित्** अपि वस्तुनः तत्त्वज्ञानाय विवेकबुद्धिः सम्पादनीया । जगति **केचन** गुणाः मया सृष्टाः ते सत्त्वं रजः तमः च इति । मानवस्य जगतः च **कस्याश्चित्** अपि क्रियायाः कारणीभूताः एते गुणाः एव भवन्ति । मृत्युलोकात् परः **कश्चन** अन्यतमः विष्णुलोकः अस्ति । यत्र **कश्चन** गच्छति चेत् पुनर्जन्म न अवाप्नोति । अतः तस्य लोकस्य अन्वेषणमेव जीवनस्य मुख्यं लक्ष्यं भवेत् । **केनचित्** अपि मनुष्येण किं करणीयं किं च न करणीयं तदर्थं शास्त्रविधिः एव स्वीकरणीयः । यः शास्त्रविधिम् उत्सृज्य कार्यं करोति सः स्वीयलक्ष्यात् च्युतः भवति ।

शास्त्रविधिना कर्मसाधने अभिरतेन मानवेन **क्वचिद्** अपि श्रद्धा न त्यक्तव्या । यः **कश्चित्** अपि मनुष्यः सर्वाणि कर्माणि ब्रह्मणि निधाय लक्ष्यम् अनुद्दिश्य च पुनः पुनः तत्र विनूतनतया चिन्तनं करोति सः एव अभीष्टसिद्धिं प्राप्तुम् अर्हति ।

अवधेयम्

'किम्' इति सर्वनामशब्दः प्रश्नार्थकः । तस्य रूपैः सह **'चित्-चन-प्रत्यययोः'** योजनेन अनिश्चितार्थकत्वं सिध्यति । यथा - १. **काचित्** गच्छति । (अत्र का गच्छति इति निश्चयः नास्ति ।)

२. **कश्चन** अभिनयति । (अत्र कः अभिनयति इति निश्चयः नास्ति ।)

३. **शिरीषः केनचित्** सह क्रीडति । (अत्र केन सह क्रीडति इति निश्चयः नास्ति ।)

एतानि रूपाणि पठत -

विभक्तिः	पुंलिङ्गे			स्त्रीलिङ्गे		
	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्रथमाविभक्तिः	कश्चित्	कौचित्	केचित्	काचित्	केचित्	काश्चित्
द्वितीयाविभक्तिः	कञ्चित्	कौचित्	कांश्चित्	काञ्चित्	केचित्	काश्चित्
तृतीयाविभक्तिः	केनचित्	काभ्याञ्चित्	कैश्चित्	कयाचित्	काभ्याञ्चित्	काभिश्चित्
चतुर्थीविभक्तिः	कस्मैचित्	काभ्याञ्चित्	केभ्यश्चित्	कस्यैचित्	काभ्याञ्चित्	काभ्यश्चित्
पञ्चमीविभक्तिः	कस्माच्चित्	काभ्याञ्चित्	केभ्यश्चित्	कस्याश्चित्	काभ्याञ्चित्	काभ्यश्चित्
षष्ठीविभक्तिः	कस्यचित्	कयोश्चित्	केषाञ्चित्	कस्याश्चित्	कयोश्चित्	कासाञ्चित्
सप्तमीविभक्तिः	कस्मिंश्चित्	कयोश्चित्	केषुचित्	कस्याञ्चित्	कयोश्चित्	कासुचित्

कश्चित्, काचित्, किञ्चित् इत्यादयः सर्वेऽपि विशेषणत्वेन उपयुज्यन्ते । अतः ते सर्वे विशेष्यस्य लिङ्गं वचनं विभक्तिं च अनुसरन्ति ।

यथा - १. सः **कश्चित्** बालकः अस्ति ।

२. तत्र **काचित्** युवती तिष्ठति ।

३. तत्र **किञ्चित्** वनम् अस्ति ।

४. **कश्चित्** जनः मां गृहसङ्केतं पृष्टवान् ।

५. गुरुः **कांश्चित्** शिष्यान् आदिशत् ।

६. छात्रा **कस्मैचित्** शिक्षकाय पुस्तकं ददाति ।

७. **कस्माच्चित्** यज्ञात् धूमः आगच्छति ।

८. सः **कस्मिंश्चित्** ग्रामे निवसति ।

अभ्यासः

१. पाठे आगतान् 'चित्-चन' इत्यनयोः प्रयोगान् यथोदाहरणं रिक्तस्थानेषु लिखत -

यथा - १. कश्चन ५. ------------------ ९. -------------- १३. ------------------

२. केचित् ६. ------------------ १०. -------------- १४. ------------------

३. -------------- ७. ------------------ ११. -------------- १५. ------------------

४. -------------- ८. ------------------ १२. -------------- १६. ------------------

२. उपरि तालिकायां प्रदत्तानि पुंलिङ्गरूपाणि दृष्ट्वा नपुंसकलिङ्गरूपाणि पूरयत -

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमाविभक्तिः	किञ्चित्	केचित्	कानिचित्
द्वितीयाविभक्तिः	किञ्चित्	केचित्	कानिचित्
तृतीयाविभक्तिः			
चतुर्थीविभक्तिः			
पञ्चमीविभक्तिः			
षष्ठीविभक्तिः			
सप्तमीविभक्तिः			

३. मञ्जूषातः उचितानि पदानि चित्वा रिक्तस्थानानि पूरयत -

काचित्, कञ्चन, केनचित्, कस्यचित्, कयाचित्, काचित्, कस्याश्चित्, किञ्चन, कानिचन

काचित् बालिका धावति । सा ------------------ अन्यया बालिकया सह उद्यानं गन्तुम् इच्छति । -------------------- कारणेन तस्याः विलम्बः अभवत् । अतः सा धावित्वा सख्याः समीपं गच्छति । मार्गे ----------- मित्रस्य गृहं दृश्यते । किञ्चित्कालानन्तरं ते द्वे अपि तत्र जलं पिबतः । उद्याने प्रवेशात् पूर्वं --------------- वृक्षं दृष्ट्वा ते तिष्ठतः । पाषाणेन ------------------ फलानि पातयतः । फलं खादित्वा उद्याने ------------------ दोलायाम् उपविशतः । अकस्मात् आकाशे ---------------- मेघगर्जना भवति । अतः तौ शीघ्रं गृहं गन्तुम् उद्युक्तौ । गृहम् आगत्य मातरं ------------- भोजनं दातुं निवेदयतः ।

अवधेयम्

- **चित्-चन**-प्रत्यययोः अर्थभेदः नास्ति।
- **कश्चित् कश्चन** इत्येतयोः अर्थः समानः। एवम् अन्यासु विभक्तिषु अपि ज्ञातव्यम्। यथा -

१.	अहं **कानिचित्** द्राक्षाफलानि खादामि।	अहं **कानिचन** द्राक्षाफलानि खादामि।
२.	मोहनः **कस्मैचन** बालकाय पारितोषिकं ददाति।	मोहनः **कस्मैचित्** बालकाय पारितोषिकं ददाति।
३.	**कस्याञ्चन** कपाटिकायां ग्रैवेयकम् अस्ति।	**कस्याञ्चित्** कपाटिकायां ग्रैवेयकम् अस्ति।

४. अधः कस्यचित् गृहस्य वर्णनम् अस्ति। तत्र प्रदत्तेषु रिक्तस्थानेषु 'किम्'शब्दस्य स्त्रीलिङ्गस्य रूपैः सह चित्-प्रत्ययं योजयित्वा रिक्तस्थानानि पूरयत -

सुलोचना नाम्नी ------------------- युवती। सा गृहे उपविश्य ------------- मौक्तिकानां मालां निर्माति। --------------------- कपाटिकायाः नूतनशाटिकां निष्कास्य धरति। तदा -------------- सख्यः ताम् आह्वयन्ति। सुलोचना दूराद् एव दृष्ट्वा तासु ----------------- युवतीं जलपानार्थम् आह्वयति। पाकशालायां ----------- कूप्यां फलरसः अस्ति। सुलोचना --------------- सखीभ्यः तं ददाति। अन्याः -------------- तं न पिबन्ति। गृहस्य प्रथमप्रकोष्ठे ------------------ कपाटिकायाः कोणे यत् सुगन्धिद्रव्यं भवति तत् सम्प्रोक्ष्य सर्वाः बहिः गच्छन्ति।

अवधेयम्

- यथा **'किम्'** इति शब्दस्य रूपैः सह **चित्-चन**-प्रत्ययौ योज्येते, तथैव **कुत्र, कति, कदा, कुतः, कथम्** इत्येतैः प्रश्नवाचकैः सह अपि **चित्-चन**-प्रत्ययौ योजयितुं शक्येते। तेषाम् अपि अनिश्चयार्थकत्वमेव।

यथा -
१. तस्य लेखनी **कुत्रचित्** पतिता।
२. सः **कतिचन** पुस्तकानि क्रीणाति।
३. अस्मिन् ग्रामे **कदाचित्** उत्सवः भवेत्।
४. भवान् **कुतश्चित्** जलम् आनयतु।
५. एतद् कार्यं **कथञ्चित्** अपि अद्य एव समापयामि।

५. कुत्रचित्/कुतश्चित्/कदाचित्/कथञ्चित् इत्येतेषु उचितं पदं प्रयुज्य रिक्तस्थानानि पूरयत -

मम गीतायाः **कतिचन** श्लोकाः कण्ठस्थाः सन्ति। भवता प्रतिदिनम् एकः अध्यायः पठनीयः इति माता वदति। तथापि -------------- आलस्यकारणेन आवर्तनं न करोमि। अतः सर्वं न जानामि। --------------------- श्लोकपङ्क्तिं स्मरामि चेत् अग्रे स्मरणं न भवति। अतः गुरवः अपि वदन्ति ----------------------- अपि, ----------------------- अपि अङ्गीकृतकार्यं न त्यक्तव्यम् इति।

६. अधः लिखितां श्लोकसङ्ख्यां पठित्वा श्लोकपङ्क्तिं मेलयत -

यथा - आश्चर्यवत् पश्यति कश्चिद् एनम् । (श्रीमद्भग.२.२९)

	श्लोकपङ्क्तयः		श्लोकसङ्ख्या
१.	न हि कश्चित् क्षणमपि	नैव किञ्चित् करोति सः ।	(श्रीमद्भग.४.२०)
२.	नैव तस्य कृतेनार्थो	छिन्नाभ्रमिव नश्यति ।	(श्रीमद्भग. ६.३८)
३.	न मे पार्थाऽस्ति कर्तव्यं	जातु तिष्ठत्यकर्मकृत् ।	(श्रीमद्भग.३.५)
४.	कर्मण्यभिप्रवृत्तोऽपि	नाकृतेनेह कश्चन ।	(श्रीमद्भग.३.१८)
५.	नादत्ते कस्यचित् पापं	मां तु वेद न कश्चन ।	(श्रीमद्भग.७.२६)
६.	कच्चिन्नोभयविभ्रष्टः	न चैव सुकृतं विभुः ।	(श्रीमद्भग.५.१५)
७.	भविष्याणि च भूतानि	त्रिषु लोकेषु किञ्चन ।	(श्रीमद्भग.३.२२)

१. -- ।

२. -- ।

३. -- ।

४. -- ।

५. -- ।

६. -- ।

७. -- ।

****

कः श्रेष्ठः स्यात् ?

परस्मैपदिधातूनां विधिलिङ्लकारः

१४

एतां कथाम् उच्चैः पठत अवगच्छत च -



सरस्वतीनद्याः तटे ऋषयः यज्ञं कुर्वन्तः आसन्। तत्र तेषां संशयः जातः यत् त्रिषु देवेषु अस्माकं यज्ञस्य पुण्यं कः स्वीकरोति ? त्रिषु देवेषु कः महान् **स्यात्** ? कं च वयम् आराधयामहे ? एवं सन्देहापन्ने कः अस्मिन् विषये **जानीयात्** ? कः वा तत्र गत्वा तेषां परीक्षणं **कुर्यात्** इति ? इत्थं चिन्तयन्तः सर्वे ऋषयः निश्चयम् अकुर्वन् यत् महर्षिः भृगुः परीक्षणार्थं **व्रजेत्** इति।

सर्वैः ऋषिभिः त्रिषुदेवेषु एकस्य श्रेष्ठतां परीक्षयितुं संस्तुतः महर्षिः भृगुः अचिन्तयत् यत् 'सर्वप्रथमं कुत्र **गच्छेयम्** ? कथं वा परीक्षणं **कुर्याम्** ?' इति। तदा निश्चयं कृत्वा सर्वप्रथमं ब्रह्मलोकम् अगच्छत्।

तत्र सः ब्रह्मसभां प्राविशत्। तं दृष्ट्वा ब्रह्मा अचिन्तयत् यत् एषः कदाचित् नमनं **कुर्यात्**। मम स्तुतिं वा **कुर्यात्**। स्तोत्रादिकं वा **पठेत्**। तदनन्तरम् आसने **उपविशेत्**। किन्तु भृगुः स्तुतिस्तोत्रादिकम् अकृत्वा लोकाचारं परित्यज्य च आसने उपाविशत्। ब्रह्मा महर्षेः ईदृशं दुर्व्यवहारं दृष्ट्वा अत्यन्तं कुपितः जातः। ब्रह्मणः कोपयुक्तं मुखं दृष्ट्वा भृगुः अनुक्त्वा एव ततः निरगच्छत्।

ततः सः कैलाशम् अगच्छत्। कैलाशे महर्षिं भृगुं दृष्ट्वा भगवान् शिवः प्रसन्नो भूत्वा तम् आलिङ्गितुम् उदतिष्ठत्। किन्तु भृगुः शिवस्य परिहासं कुर्वन् तं प्रति अपमानवचनानि अकथयत्। महर्षेः अपमानयुक्तेन व्यवहारेण कुपितः शिवः शूलम् उद्यम्य तं मारयितुं प्रायतत। एतद् दृष्ट्वा पार्वती अचिन्तयत् यत् मम पतिः महर्षिं **हन्यात्**। तेन ब्रह्महत्यां वा **आप्नुयात्**। अनेन किमपि अनिष्टं **भवेत्** इति। अतः अनिष्टाशङ्कया पार्वती त्रिलोचनस्य पुरतः तं क्षन्तुं प्रार्थनाम् अकरोत्।

तदनन्तरं महर्षिः वैकुण्ठं प्रति अगच्छत्। महर्षिः वैकुण्ठं प्राप्य लक्ष्म्याः अङ्के शिरः संस्थाप्य शयानं भगवन्तं विष्णुम् अपश्यत्। एतत् दृष्ट्वा महर्षिः विष्णोः वक्षसि पादप्रहारम् अकरोत्। तेन जागरितः विष्णुः उत्थाय लक्ष्म्या सह महर्षिं प्राणमत् अवदत् च - 'हे महर्षे ! भवतः स्वागतम्। कृपया भवान् आसनं **स्वीकुर्यात्**' इति।

पुनः विष्णुः अवदत् - हे महर्षे ! भवतः आगमनस्य विषये अहम् अनभिज्ञः आसम्। यदि मम पूर्वविदितं **स्यात्** तर्हि अहं तव स्वागतं कर्तुम् अशक्ष्यम्। हे महामुने ! तव चरणौ कोमलौ स्तः। मम हृदयं तु कठोरम् इति कथयन् स्वहस्ताभ्यां महर्षेः पादयोः मर्दनम् अकरोत्।

अद्य आरभ्य भवतः वक्षसि कृतेन पादप्रहारेण जातं चिह्नं मम अलङ्काररूपेण स्थास्यति।

अनन्तरं वैकुण्ठाधीश्वरस्य ईदृशं स्वभावं दृष्ट्वा ब्रह्मवादिनां मुनीनां सभाम् आगत्य महर्षिः भृगुः स्वानुभूतं वृत्तान्तम् अश्रावयत्। तदा सर्वे अपि ऋषयः विष्णुः एव त्रिदेवेषु श्रेष्ठतमः इति विज्ञाय मुक्तसंशयाः अभवन्।

एतानि वाक्यानि उच्चैः पठत -

१. प्रायः अद्य कृष्णः युद्धे भागं **वहेत्**।

२. धृष्टद्युम्नः श्वः द्रोणाचार्यं **हन्यात्**।

३. भीष्मेण सह योद्धुं कं **नियोजयेम** ?

४. घटोत्कचं कः **मारयेत्** ?

५. अभिमन्युः व्यूहं भेत्तुम् **अर्हेत्**।

६. प्रायः कर्णः सैनापत्यम् अङ्गी**कुर्यात्**।

७. भीमः दुःशासनस्य हृदयं **विदारयेत्**।

८. पाण्डवपुत्राः अपि युद्धं **कुर्युः**।

९. घटोत्कचः कर्णं हन्तुं **शक्नुयात्**।

१०. भीमः दुर्योधनं **हन्यात्**।

(कुरुक्षेत्रे युद्धावसरे कौरवपाण्डवसेनाशिबिरयोः एतानि वाक्यनि श्रुतानि । अत्र सर्वत्र विधिलिङ्लकारस्य प्रयोगः कृतःअस्ति ।)

अवधेयम्

विधिलिङ्लकारस्य प्रयोगः विध्यर्थे सम्भावनार्थे च आधिक्येन भवति । तयोः भेदः अत्र दर्शितः अस्ति -

- **विधिः** - बालकः गीतां **पठेत्**। बालकेन गीता पठनीया इत्यर्थः।
- **सम्भावना** - प्रायः अद्य गीतासत्रं **भवेत्**। कदाचित् ते **जयेयुः**।
  यदि शीघ्रम् **उत्तिष्ठेयं** तर्हि पठितुं **शक्नुयाम्**।

कदाचित्, प्रायः, अथवा, यदि इत्यादीनि पदानि सम्भावनां प्रदर्शयन्ति।

अभ्यासः

१. कथां पठित्वा प्रश्नानाम् उत्तराणि लिखत -

१. कः परीक्षणार्थं व्रजेत् ?

-- ।

२. 'एषः कदाचित् नमनं कुर्यात्' इति कः अचिन्तयत् ?

-- ।

३. कः स्तुतिस्तोत्रादिकम् अकृत्वा लोकाचारं परित्यज्य च आसने उपाविशत् ?

-- ।

४. 'मम पतिः महर्षिं हन्यात्' इति का अचिन्तयत् ?

-- ।

५. 'कृपया भवान् आसनं स्वीकुर्यात्' इति कः अवदत् ?

-- ।

२. श्रीकृष्णस्य मनसि आगतानि एतानि वाक्यानि परिशील्य सन्देहः अस्ति, उत न इति यथोदाहरणं लिखत -

वाक्यानि	सन्देहः
यथा - १. ज्ञानी मम अतीव प्रियः स्यात्।	नास्ति
२. कदाचित् उद्धवः वृन्दावनं गच्छेत्।	--------------------
३. प्रायः ते एतं न परिचिनुयुः।	--------------------
४. कदाचित् एतेन सह वार्तां न कुर्युः।	--------------------
५. अस्मै स्वचिह्नं दद्यां चेत् एषः मम सखा इति जानीयुः।	--------------------
६. तेन मम अग्रेऽपि साहाय्यं भवेत्।	--------------------
७. अस्य आगमनानन्तरं ममापि मनः आनन्देत्।	--------------------
८. सम्भवतः तौ श्वः परश्वः वा आगच्छेताम्।	--------------------
९. कदाचित् कालयवनः मम नाम पृच्छेत्।	--------------------
१०. प्रायः तदानीं यावत् जरासन्धः अपि आपतेत्।	--------------------

परस्मैपदिनां धातूनां विधिलिङ्लकारस्य रूपाणि एवं भवन्ति -

पुरुषः	वद्-धातुः		
	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	वदेत्	वदेताम्	वदेयुः
मध्यमपुरुषः	वदेः	वदेतम्	वदेत
उत्तमपुरुषः	वदेयम्	वदेव	वदेम

❖ **एवमेव अन्येषां धातूनाम् अपि विधिलिङ्रूपाणि भवन्ति।**

३. **अधः प्रदत्तानि लट्लकारस्य रूपाणि आश्रित्य यथोदाहरणं विधिलिङ्रूपाणि लिखत -**

	लट्लकारः प्रथमपुरुषः एकवचनम्	विधिलिङ्लकारस्य रूपाणि			
		प्रथमपुरुषः		उत्तमपुरूषः	
		एकवचनम्	बहुवचनम्	एकवचनम्	बहुवचनम्
१.	आश्रयति	आश्रयेत्	आश्रयेयुः	आश्रयेयम्	आश्रयेम
२.	भवति				
३.	अस्ति	स्यात्			
४.	अनुस्मरति				

५.	जयति					
६.	पश्यति					
७.	भ्रमति					
८.	जोषयति					
९.	तिष्ठति					
१०.	आगच्छति					
११.	नमति					
१२.	गच्छति					
१३.	विचालयति					
१४.	प्रविशति					
१५.	त्यजेत्					
१६.	पिबति					
१७.	नयेत्					
१८.	तरति					
१९.	उत्सीदति					
२०.	वहति					
२१.	लिखति					
२२.	अवसादयति					
२३.	चिन्तयेत्					
२४.	उद्धरति					

अवधेयम्

➢ **केषाञ्चन धातूनां रूपाणि भिन्नानि भवन्ति ।**

यथा -

पुरुषः	**क्री-धातुः**		
	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**
प्रथमपुरुषः	क्रीणीयात्	क्रीणीयाताम्	क्रीणीयुः

मध्यमपुरुषः	क्रीणीयाः	क्रीणीयातम्	क्रीणीयात
उत्तमपुरुषः	क्रीणीयाम्	क्रीणीयाव	क्रीणीयाम

एवमेव बध्नाति, *जानाति, गृह्णाति, प्रीणाति, मथ्नाति, अश्नाति* इत्यादीनां विधिलिङ्रूपाणि भवन्ति।

पुरुषः	**चि-धातुः**		
	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**
प्रथमपुरुषः	चिनुयात्	चिनुयाताम्	चिनुयुः
मध्यमपुरुषः	चिनुयाः	चिनुयातम्	चिनुयात
उत्तमपुरुषः	चिनुयाम्	चिनुयाव	चिनुयाम

एवमेव *शक्नोति, आप्नोति, शृणोति, तनोति* इत्यादीनां रूपाणि भवन्ति।

पुरुषः	**दा-धातुः**			**कृ-धातुः**		
	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्रथमपुरुषः	दद्यात्	दद्याताम्	दद्युः	कुर्यात्	कुर्याताम्	कुर्युः
मध्यमपुरुषः	दद्याः	दद्यातम्	दद्यात	कुर्याः	कुर्यातम्	कुर्यात
उत्तमपुरुषः	दद्याम्	दद्याव	दद्याम	कुर्याम्	कुर्याव	कुर्याम

४. यथोदाहरणं रिक्तस्थानानि पूरयत -

	लट्लकारस्य क्रियापदम्	**प्रथमपुरुषः**		**उत्तमपुरुषः**	
		एकवचनम्	**बहुवचनम्**	**एकवचनम्**	**बहुवचनम्**
१.	**बध्नाति**	**बध्नीयात्**	**बध्नीयुः**	**बध्नीयाम्**	**बध्नीयाम**
२.	**गृह्णाति**				
३.	**अश्नाति**				
४.	**जानाति**				
५.	**क्रीणाति**				
६.	**शक्नोति**	**शक्नुयात्**	**शक्नुयुः**	**शक्नुयाम्**	**शक्नुयाम**
७.	**आप्नोति**				

८.	शृणोति					
९.	चिनोति					
१०.	चिन्तयति	चिन्तयेत्	चिन्तयेयुः		चिन्तयेयम्	चिन्तयेम
११.	गणयति					
१२.	लेखयति					
१३.	पाठयति					
१४.	कथयति					

अवधेयानि कानिचन रूपाणि परिशीलयत -

	लट्लकारस्य क्रियापदम्	प्रथमपुरुषः			उत्तमपुरुषः	
		एकवचनम्	बहुवचनम्		एकवचनम्	बहुवचनम्
१.	हन्ति	हन्यात्	हन्युः		हन्याम्	हन्याम
२.	अपनुदति	अपनुद्यात्	अपनुद्युः		अपनुद्याम्	अपनुद्याम
३.	वेत्ति	विद्यात्	विद्युः		विद्याम्	विद्याम
४.	स्नाति	स्नायात्	स्नायुः		स्नायाम्	स्नायाम

५. कोष्ठके प्रदत्तस्य क्रियापदस्य स्थाने विधिलिङ्लकारस्य क्रियापदम् उपयुज्य वाक्यानि यथोदाहरणं परिवर्तयत -

(सुशीला काचित् वृद्धा अस्ति । तस्याः पुत्रः दीनबन्धुः उक्तवान् यत् 'अहं मन्दिरं गत्वा भगवन्तं प्रणम्य आगमिष्यामि' इति । तत्समये आकाशे मेघान् दृष्ट्वा तया वृद्धया चिन्तितानि कानिचन वाक्यानि प्रसङ्गतः अत्र दत्तानि सन्ति ।)

यथा - अल्पे एव काले सर्वत्र अन्धकारः (भवति) । अल्पे एव काले सर्वत्र अन्धकारः भवेत् ।

१. तदनन्तरं महान् वातप्रकोपः (आगच्छति) ------------------- ।
२. वृष्टिः अपि भवितुम् (अर्हति) ------------------------------- ।
३. पुत्रः वृष्टिपीडाम् (अनुभवति) ------------------------------- ।
४. आर्द्रवस्त्रेण एव मन्दिरं (प्रविशति) --------------------------- ।
५. तत्र सः व्यजनस्य अधः (तिष्ठति) ---------------------------- ।
६. महान्तं कालं यावत् तत्रैव दर्शनं (करोति) ------------------- ।
७. तत्र सङ्कीर्तनं भवति । सः तत्र (उपविशति) ---------------- ।
८. गीतम् अपि (गायति) --------------------------------------- ।

९. रात्रौ विलम्बेन गृहं (प्राप्नोति) ------------------------------ ।

१०. श्वः प्रातः यदा (उत्तिष्ठति) -------------- तदा पीनसः ज्वरः च एतं (पीडयति) ---------------- ।

११. तदा अहम् एतं चिकित्सालयं (नयामि) ------------------------ ।

१२. तत्र वैद्याः पुत्राय औषधं (ददति) ---------------------------- ।

१३. ज्वरग्रस्तः एषः किमपि कर्तुं न (शक्नोति) --------------------- ।

१४. महत् कष्टम् (अनुभवति) -- ।

१५. स्वकृतदोषम् अपि (जानाति) ----------------------------------- ।

१६. तेन वृष्टिकाले छत्रेण विना कुत्रापि न (गमिष्यति) ------------- ।

१७. समस्यायाम् अपि न (पतिष्यति) ---------------------------- ।

६. अधः लिखितानि वाक्यानि 'प्रायः, श्वः, यदि, कदाचित्' इत्यादीनां प्रयोगेण सम्भावनार्थे परिवर्त्य यथोदाहरणं पुनः लिखत -

यथा - अद्य मीना पाकं करोति । — **प्रायः अद्य मीना पाकं कुर्यात् ।**

१. सः ग्रामं गच्छति । -- ।

२. ते क्रीडन्ति । -- ।

३. बालकाः इच्छन्ति । -- ।

४. यदि सः खादति, तर्हि त्वम् अपि खादसि । -- ।

५. सा चलचित्रं पश्यति, त्वम् अपि पश्यसि । -- ।

६. यूयं न भ्रमथ । -- ।

७. यूयं लेखितुं शक्नुथ । -- ।

८. अहं वदामि । -- ।

९. अहम् एव पुस्तकं गृह्णामि । -- ।

१०. वयम् अभिनन्दामः । -- ।

११. वयं गत्वा शृणुमः । -- ।

अवधेयम्

विधिलिङ्लकारस्य विध्यर्थे (आज्ञार्थे) प्रयोगः भवति । यथा -

➤ भवान् श्वः आगच्छेत् ।	प्रह्लादः अष्टाध्यायीं स्मरेत् ।
➤ नारायणः आसन्दे उपविशेत् ।	दीपकः भोजनाय सर्वान् छात्रान् आह्वयेत् ।
➤ ते पाठान् पठेयुः ।	सर्वे सर्वान् विषयान् जानीयुः ।
➤ ज्येष्ठानाम् आज्ञां पालयेयुः ।	धर्मरक्षणाय प्राणान् अर्पयेयुः ।

७. यथोदाहरणं प्रदत्तेषु वाक्येषु प्रयुक्तानि क्रियापदानि विधिलिङ्लकारे परिवर्त्य लिखत -

(विद्यालयतः सर्वे छात्राः गोवर्धनपरिक्रमार्थं गच्छन्ति । प्रधानाचार्यः सर्वान् छात्रान् किमपि आदिशति । तदनुसारं प्रसङ्गतः कानिचन वाक्यानि अधः दत्तानि सन्ति ।)

यथा - मोहनः छात्रसङ्ख्यां गणयति । — गणयेत् ।

१. सर्वे छात्राः आगच्छन्ति तदा एव वदामि । -------------, ------------ ।

२. प्रथमम् एकैकः ज्येष्ठः एकैकलघुच्छात्रस्य हस्तं गृह्णाति । ---------------- ---------- ।

३. राममोहनः विपिनं पश्यति, आपरिक्रमं तेन सह एव भवति । ------------, ------------- ।

४. पुष्पराजः गमनाय यानस्य व्यवस्थां करोति । ------------------------- ।

५. सर्वे तत्र प्राप्य मानसीगङ्गायां स्नान्ति । ------------------------- ।

६. अनन्तरं मुकुटमुखारविन्दस्य दर्शनं कुर्वन्ति । ------------------------- ।

७. गिरिराजभगवन्तं साष्टाङ्गं प्रणमन्ति । ------------------------- ।

८. गिरिराजभगवतः जयोस्तु इति पुनः पुनः वदन्ति । ------------------------- ।

९. पूछरीकालौठा इत्यस्य दर्शनं कुर्वन्तु । ------------------------- ।

१०. राधाकुण्डे राधासहस्रनाम पठन्तु । ------------------------- ।

११. स्पष्टरूपेण नामानि उच्चारयन्तु । ------------------------- ।

१२. अनन्तरं कुसुमसरोवरतटे उपविशन्तु । ------------------------- ।

१३. अधः न अवतरन्तु, यतः गभीरम् अस्ति । ------------------------- ।

१४. परिक्रमां समाप्य सर्वे विद्यालयम् आगच्छन्ति । ------------------------- ।

१५. आगत्य सर्वे स्वपन्ति, श्वः पाठः भविष्यति । ------------------------- ।

८. मञ्जूषातः विधिलिङ्लकारस्य क्रियापदानि चित्वा लिखत -

आश्रयेताम्, यायात्, ब्रूयात्, अयुः, करवाम, अनुशोचेत, दहेः, प्रवदेव, आप्नुयातम्, प्राप्नोत्, अभिनन्देम, अभवतम्, कुरु, धरेयुः, शृणुयाः, स्याम, लभेताम्, प्राप्नोत्, गृह्णीहि, पृच्छामः, गृह्णीयुः, हन्याम्, विजानीयात्, उद्धरेयम्, चिन्तयताम्, दद्यात्, प्रीणन्ति, सीदेयुः, जानीताम्, स्वप्युः, व्रजन्ति, स्नातात्, वायुः, अगच्छत्, धमेत्, अर्चताम्, तिष्ठतम्, अस्मरत्, गिलन्ति

-------------- -------------- -------------- -------------- --------------

-------------- -------------- -------------- -------------- --------------

-------------- -------------- -------------- -------------- --------------

-------------- -------------- -------------- -------------- --------------

९. **भवतः गृहे गीतापाठस्य कार्यक्रमः अस्ति । तत्र के के आगच्छेयुः इति विचिन्त्य वाक्यानि लिखत -**

यथा - गीता पाठाय पं.अम्बिकाप्रसादः आगच्छेत् ।

१. गीतापाठाय मम अनुजौ --------------------- ।

२. गीतापाठाय मम आचार्याः --------------------- ।

३. गीतापाठाय आवाम् अपि ------------------- ।

४. गीतापाठाय मित्राणि अपि --------------------- ।

५. गीतापाठाय सुरेशस्य अनुजे ---------------- ।

६. गीतापाठाय वयं सर्वेऽपि ----------------------- ।

७. गीतापाठाय प्रायः सर्वे जनाः ---------------- ।

एतान् श्लोकान् उच्चैः पठत विधिलिङ्लकाररूपाणि अवलोकयत च -

अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेत**द्विजानीयां** त्वमादौ प्रोक्तवानिति ॥ (विजानीयाम्) (श्रीमद्भग.४.४)

कर्मण्यकर्म यः **पश्येद**कर्मणि च कर्म यः । (पश्येत्)
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ (श्रीमद्भग.४.१८)

उद्धरेदात्मनात्मानं नात्मानम**वसादयेत्** । (उद्धरेत्, अवसादयेत्)
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ (श्रीमद्भग.६.५)

दिवि सूर्यसहस्रस्य **भवेद्यु**गपदुत्थिता । (भवेत्)
यदि भाः सदृशी सा **स्याद्भा**सस्तस्य महात्मनः ॥ (स्यात्) (श्रीमद्भग.११.१२)

श्रद्धावाननसूयश्च **शृणुयाद**पि यो नरः । (शृणुयात्)
सोऽपि मुक्तः शुभाँल्लोकान् **प्राप्नुयात्** पुण्यकर्मणाम् ॥ (श्रीमद्भग.१८.७१)

१०. **भगवतः कृष्णस्य प्रियः कः भवितुम् अर्हेत् इति वाक्यानि दृष्ट्वा जानीत, आवरणे स्थितस्य धातोः विधिलिङ्लकाररूपेण निर्दिशत च -**

यथा - यः जनः हर्षामर्षभयोद्वेगैः मुक्तः सः मम प्रियः भवेत् । **(भू)**

१. यः जनः न हृष्यति न द्वेष्टि सः मम प्रियः ------------------------- । (अस्)

२. यः जनः न शोचति न काङ्क्षति सः भक्तिमान् मम प्रियः भवितुम् ---------- । (अर्ह्)

३. यः जनः शुभाशुभस्य कर्मणः परित्यागं ------------ सः भक्तिमान् मम प्रियः । (कृ)

४. यः जनः निन्दास्तुत्योः समः -------------- सः भक्तिमान् मम प्रियः । (स्था)

५. यः जनः शत्रुमित्रयोः समतां -------------- सः भक्तिमान् मम प्रियः । (दृश्)

११. यथोदाहरणं विधिलिङ्लकाररूपाणि लिखत -

➢ **यथा - अहं सात्त्विकः <u>भवेयम्</u>। (भू)**

१. तस्य कृते अहं देवान् ---------------------- । (यज्)

२. अहं कृष्णस्य यजनं ------------------------ । (कृ)

३. अहम् आहारमपि सात्त्विकं ---------------- । (खाद्)

४. अहं सात्त्विकविचारान् एव ---------------- । (कथ्)

५. अहं सात्त्विकयज्ञान् एव ------------------- । (आ+चर्)

➢ **यथा - जनाः मनःप्रसादं <u>प्राप्नुयुः</u>। (प्र+आप्)**

६. जनाः सौमनस्यम् ------------------ । (आप्)

७. जनाः मौनं ------------------------ । (पाल्)

८. जनाः आत्मविनिग्रहं -------------- । (कृ)

९. जनाः भावसंशुद्धिं ----------------- । (रक्ष्)

****

श्रीकृष्णः एव त्रायेत !

आत्मनेपदिधातूनां विधिलिङ्लकारः

१५

एतां कथाम् उच्चैः पठत अवगच्छत च -

दुर्योधनस्य विशालं सैन्यं दृष्ट्वा 'अस्माकं सैन्यं युद्धे जयं प्राप्तुं कदाचित् न्यूनं **विद्येत**' इति चिन्तयित्वा महाराजस्य युधिष्ठिरस्य मनसि अत्यन्तं विषादः अभवत्। असौ अचिन्तयत् यत् भीष्मपितामहः यं व्यूहम् अरचयत् तस्य भेदने तु क्लेशः **जायेत**। एवं चिन्तयन् सः अर्जुनम् अवदत् - हे महाबाहो ! यस्य सैन्यस्य नेतृत्वं पितामहः भीष्मः **कुर्वीत** येषां च प्रधानयोद्धा भीष्मपितामहः **वर्तेत** तैः सह समरभूमौ अस्माकं युद्धं कथं **जायेत** ? तत्र तु सैनिकानां कृते सर्वविधव्यवस्था अपि **वर्तेत**। महातेजस्विना शत्रुसूदनेन भीष्मेण शास्त्रीयविधिना अयम् अक्षोभ्यः अभेद्यः च व्यूहः रचितः वर्तते। एतस्मात् व्यूहात् अस्मान् कः वा **त्रायेत** ? सः तु सर्वथा 'अहं जयं प्राप्नुयाम्' इत्येव **कामयेत**। हे अर्जुन ! वयं ससैन्यम् अधुना प्राणसंकटस्थितौ प्राप्ताः स्मः अधुना एतस्मात् सङ्कटात् अस्मान् कः वा **त्रायेत** ?

तदा अर्जुनः युधिष्ठिरम् आश्वासयन् अवदत् - 'हे राजन् ! भवान् दोषदृष्टिरहितः वर्तते। अस्माकं सैन्यं यथा कश्चन अपि न **ध्वंसेत** तथा अहं भवन्तम् एकां युक्तिं **कथयेय**। तया युक्त्या शत्रुसैन्यं तु **ध्वंसेत** एव। अथ च वयं निश्चयेन जयम् अपि **लभेमहि**। हे पाण्डुनन्दन ! तां युक्तिं नारदः, पितामहः भीष्मः द्रोणाचार्यः च **जानीरन्**।

श्रूयते यत् पुराकाले यदा देवासुरसंग्रामः प्रवर्तमानः आसीत् तदा परमपिता ब्रह्मा इन्द्रादीन् एवम् अकथयत् - विजयेच्छवः शूरवीराः स्वीयेन पराक्रमेण तादृशं जयं न **लभेरन्** यादृशं सत्येन, सज्जनतया, धर्मेण, उत्साहेन च **लभेरन्**। ब्रह्मा अकथयत् - भोः देवाः ! अधर्मं, लोभं मोहं च परित्यज्य अहङ्कारशून्याः च भूत्वा उद्यमपूर्वकं **युद्ध्येरन्**। यत्र धर्मः विद्येत तत्र तस्य पक्षस्य एव जयः अपि **जायेत**। अतः भवान् अपि निश्चितरूपेण एतत् **जानीत** यत् अस्माकं जयः निश्चितः वर्तते इति। यतः महर्षिः नारदः अपि अकथयत् - 'यत्र कृष्णः तत्रैव जयः' इति।

अस्मिन् पाठे स्थूलाक्षरैः मुद्रितानि पदानि आत्मनेपदिधातूनां विधिलिङ्लकारस्य रूपाणि सन्ति।

अवधेयम्

आत्मनेपदिधातूनां विधिलिङ्लकारः

वृत्-धातुः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	वर्तेत	वर्तेयाताम्	वर्तेरन्
मध्यमपुरुषः	वर्तेथाः	वर्तेयाथाम्	वर्तेध्वम्
उत्तमपुरुषः	वर्तेय	वर्तेवहि	वर्तेमहि

कृ-धातुः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	कुर्वीत	कुर्वीयाताम्	कुर्वीरन्
मध्यमपुरुषः	कुर्वीथाः	कुर्वीयाथाम्	कुर्वीध्वम्
उत्तमपुरुषः	कुर्वीय	कुर्वीवहि	कुर्वीमहि

दा-धातुः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	ददीत	ददीयाताम्	ददीरन्
मध्यमपुरुषः	ददीथाः	ददीयाथाम्	ददीध्वम्
उत्तमपुरुषः	ददीय	ददीवहि	ददीमहि

युध्-धातुः

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	युध्येत	युध्येयाताम्	युध्येरन्
मध्यमपुरुषः	युध्येथाः	युध्येयाथाम्	युध्येध्वम्
उत्तमपुरुषः	युध्येय	युध्येवहि	युध्येमहि

***एवमेव अन्येषां धातूनाम् अपि रूपाणि भवन्ति।**

अभ्यासः

१. प्रदत्तायाः कथायाः विधिलिङ्लकारस्य क्रियापदानि चित्वा यथोदाहरणं लिखत -

क्रियापदम्	वचनम्		क्रियापदम्	वचनम्
यथा - वर्तेत	एकवचनम्			

२. अत्र भागत्रये धातुः, आत्मनेपदिधातूनां विधिलिङ्लकारस्य क्रियापदं, तस्य अर्थज्ञानाय विभज्य प्रयोगः अपि दत्तः अस्ति। यथोदाहरणं मेलनं कुरुत -

धातुः	क्रियापदम्	विभज्यप्रयोगः
१. शी	ददीत	वन्दनं कुर्यात्
२. मुद्	जायेत	दानं कुर्यात्
३. कम्	लभेत	लाभं प्राप्नुयात्
४. जन्	वन्देत	शयनं कुर्यात्
५. दा	त्रायेत	त्राणं (रक्षणं) कुर्यात्
६. उद् + विज्	कामयेत	निरीक्षणं कुर्यात्
७. लभ	मोदेत	भाषणं कुर्यात्
८. त्रा	शयीत	प्रार्थनां कुर्यात्
९. निर् + ईक्ष्	उद्विजेत	कार्यं कुर्यात्
१०. कृ	भाषेत	सर्जनं कुर्यात्
११. वन्द	निरीक्षेत	चयनं कुर्यात्
१२. प्र + अर्थ	प्रार्थयेत	उद्वेगं कुर्यात्
१३. भाष	कुर्वीत	जन्म प्राप्नुयात्
१४. चि	सृज्येत	कामनां कुर्यात्
१५. सृज्	चिन्वीत	मुदितः भवेत्

३. तालिकायां दत्तानि लट्लकारस्य रूपाणि परिशील्य यथोदाहरणं विधिलिङ्लकारस्य एकवचनबहुवचनयोः रूपाणि लिखत -

लट्लकारः क्रियापदम्	प्रथमपुरुषः			उत्तमपुरुषः	
	एकवचनम्	बहुवचनम्		एकवचनम्	बहुवचनम्
रोचते	रोचेत	रोचेरन्		रोचेय	रोचेमहि
शोभते					
द्योतते					
स्रंसते					
ध्वंसते					
दधते					
डीयते					
जायते					

४. मञ्जूषातः पदानि चित्वा यथोदाहरणं रिक्तस्थानानि पूरयत -

भाषेय, वन्देरन्, डयेत, विद्येयाताम्, लभेवहि, चिन्वीरन्, जानीमहि, जायेत, विन्देयाताम्

यथा - अहं सभायां ---------------------- । अहं सभायां भाषेय ।

१. तस्य विलम्बः ---------------------- ।
२. ते भगवन्तं -------------------------- ।
३. विमानम् आकाशे ------------------- ।
४. भवन्तः वस्त्राणि ---------------------- ।
५. तौ उत्तमपदवीं ---------------------- ।
६. आवां पारितोषिकं -------------------- ।
७. वयं शास्त्रं -------------------------- ।
८. मम लेखन्यौ तत्र ---------------------- ।

५. गद्यांशे प्रयुक्तानि लट्लकारस्य वाक्यानि यथोदाहरणं विधिलिङ्लकारे परिवर्तयत -

श्रीनिवासः छात्रप्रतिनिधिः वर्तते । भवान् अभ्यागतानां स्वागतं करोति । लतिके ! त्वं प्रमुखातिथेः परिचयं जानासि । युवां द्वे छात्रे शारदास्तवनं कुरुथः । यूयं पञ्च छात्राः भोजनव्यवस्थाम् अवलोकयथ । अहं सर्वेभ्यः पुष्पस्तबकं ददामि । आवां कार्यक्रमस्य समयं नियोजयावः । फलानि कः क्रीणाति ? सायङ्काले कति दीपाः द्योतन्ते ? जलव्यवस्था अपि वर्तते । पादरक्षाः आवल्यां विद्यन्ते ।

यथा - श्रीनिवासः छात्रप्रतिनिधिः <u>वर्तेत</u> ।

१. --- ।
२. --- ।

३. --- ।

४. --- ।

५. --- ।

६. --- ।

७. --- ।

८. --- ।

९. --- ।

१०. --- ।

६. पाठं पठित्वा रिक्तस्थानानि पूरयत -

१. युद्धे जयं प्राप्तुम् अस्माकं सैन्यं कदाचित् न्यूनं -------------- इति चिन्तयित्वा अत्यन्तं विषादः अभवत् ।
२. असौ अचिन्तयत् यत् भीष्मपितामहः यं व्यूहम् अरचयत् तस्य भेदने तु क्लेशः ------------- ।
३. एवं चिन्तयन् सः अर्जुनम् अवदत् - हे महाबाहो ! यस्य सैन्यस्य नेतृत्वं पितामहः भीष्मः ----------- ।
४. येषां च प्रधानयोद्धा भीष्मपितामहः ------------------ ।
५. तैः सह समरभूमौ अस्माकं युद्धं कथं ------------------ ।
६. तत्र तु सैनिकानां कृते सर्वविधव्यवस्था अपि ------------------ ।
७. एतस्मात् अस्मान् कः वा ------------------ ।
८. सः तु सर्वथा 'अहं जयं प्राप्नुयाम्' इत्येव ------------------ ।
९. हे अर्जुन ! वयं ससैन्यम् अधुना प्राणसंकटस्थितौ प्राप्ताः स्मः अधुना एतस्मात् सङ्कटात् अस्मान् कः वा ------------------ ?
१०. अस्माकं सैन्यं यथा कश्चन अपि न ------------------ ।
११. तथा अहं भवन्तम् एकां युक्तिं ------------------ ।
१२. तया युक्त्या शत्रुसैन्यं तु ------------------ एव ।
१३. अथ च वयं निश्चयेन जयम् अपि ------------------ ।
१४. हे पाण्डुनन्दन ! तां युक्तिं नारदः, पितामहः भीष्मः द्रोणाचार्यः च ------------------ ।
१५. विजयेच्छवः शूरवीराः स्वीयेन पराक्रमेण तादृशं जयं न ------------------ ।
१६. यादृशं सत्येन, सज्जनतया, धर्मेण, उत्साहेन च ------------------ ।
१७. अधर्मं लोभं मोहं च परित्यज्य अहङ्कारशून्याः च भूत्वा उद्यमपूर्वकं ------------------ ।
१८. यत्र धर्मः ----------------- तत्र तस्य पक्षस्य एव जयः अपि ------------------ ।

७. कोष्ठकस्थायाः सङ्ख्यायाः आधारेण गीताश्लोकान् परिशील्य रिक्तस्थानानि पूरयत -

१. स्थितधीः किं प्रभाषेत किम् --------------- व्रजेत किम् । (श्रीमद्भग.२.५४)
२. यदि ह्ययं न ----------------- जातु कर्मण्यतन्द्रितः । (श्रीमद्भग.३.२३)
३. नैव किञ्चित् करोमीति युक्तो --------------- तत्त्ववित् । (श्रीमद्भग.५.८)
४. योगी ----------------- सततम् आत्मानं रहसि स्थितः । (श्रीमद्भग.६.१०)

युधिष्ठिरस्य अपशकुनानां दर्शनम्

लृङ्लकारः

१६

एतां कथाम् उच्चैः पठत अवगच्छत च -



अर्जुनस्य द्वारकागमनानन्तरं कतिचन मासाः अतीताः। तदानीं घोररूपाणि अनिष्टनिमित्तानि अपशकुनानि दृष्ट्वा युधिष्ठिरः भीमम् उक्तवान् - "भीम! तव भ्राता अर्जुनः इदानीं यावत् न आगतवान्। मम मनसि भीतिः जायमाना अस्ति" इति। तदा 'भीत्याः कारणं किम्?" इति भीमः पृष्टवान्।

युधिष्ठिरः अवदत् - "यदि गतस्य अर्जुनस्य अधिकानि दिनानि अतीतानि न **अभविष्यन्** तर्हि अहं भीतः न **अभविष्यम्**। किन्तु गतस्य तस्य सप्त मासाः अतीताः सन्ति। अथवा, तत्र गतः सः यदि वार्ताम् **अप्रेषयिष्यत्** तर्हि अहं न **अचिन्तयिष्यम्**। किन्तु ततः कापि वार्ता नास्ति। तन्मध्ये अहं बहूनि अपशकुनानि अपश्यम्। यदि तादृशानि अपशकुनानि न **अद्रक्ष्यं** तर्हि न **अभेष्यम्**। अद्य मम वामभागतः धेनवः अश्वाश्च अप्रदक्षिणाकारेण गताः। यदि ते दक्षिणतः प्रदक्षिणाकारेण **अगमिष्यन्** तर्हि मम मनः न **अखेत्स्यत**। अद्य अहं हतप्रभं सूर्यं दृष्टवान्। अन्यान् अपि उत्पातान् अवलोकितवान्। यदि तत्सर्वं न **अवालोकिष्ये** तर्हि निश्चयेन किमपि अशुभं न **अशङ्किष्ये**। धैर्येण **अस्थास्यम्** अपि। किन्तु अद्य अहं बहूनि अपशकुनानि एव दृष्टवान्। अतः भीतः अस्मि" इति।

एवं युधिष्ठिरः भीमम् उद्दिश्य स्वस्य मनोव्यथां यदा श्रावयन् आसीत् तदा एव द्वारकातः प्रतिनिवृत्तः अर्जुनः तत्र आगत्य तस्य पादयोः पतितवान्। तस्य मुखं कान्तिहीनम् आसीत्। नेत्रे अश्रुपूर्णे आस्ताम्। युधिष्ठिरेण यदा कारणं पृष्टं तदा सः 'भगवतः महाविष्णोः कृष्णावतारः समाप्तः' इति वार्तां श्रावितवान्। तां वार्तां श्रुत्वा सर्वेऽपि अखिद्यन्त। अनन्तरं पाण्डवाः अभिमन्योः पुत्रं परीक्षितं सिंहासने अभिषिच्य स्वयं च भगवत्स्मरणं कुर्वन्तः स्वर्गारोहणयात्रां कृतवन्तः।

अवधेयम्

अवधानेन पश्यत जानीत च -

पठति (लट्)

अपठत् (लङ्)



पठिष्यति (लृट्)

अपठिष्यत् (लृङ्)

(लृट्लकारस्य रूपाणि दृष्ट्वा तस्य किञ्चित्परिवर्तनेन लृङ्लकारस्य रूपाणि अपि ज्ञातुं शक्नुमः। यथा - **पठिष्यति** इत्यस्य तकारोत्तरम् (इ) इकारं मार्जयित्वा **(पठिष्यत्)** आदौ (अ) अकारं योजयामः चेत् **(अपठिष्यत्)** इति लृङ्रूपं भविष्यति। (पठिष्यति, पठिष्यत्, अपठिष्यत्) अनेन क्रमेण कस्यापि हलादिधातोः प्रथमपुरुषस्य एकवचनान्तं रूपं ज्ञातुं शक्नुमः।)

परस्मैपदिधातूनां लृङ्लकारे रूपाणि एवं भवन्ति -

'पठ्'धातुः			
पुरुषः	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्रथमपुरुषः	अपठिष्यत्	अपठिष्यताम्	अपठिष्यन्
मध्यमपुरुषः	अपठिष्यः	अपठिष्यतम्	अपठिष्यत
उत्तमपुरुषः	अपठिष्यम्	अपठिष्याव	अपठिष्याम

आत्मनेपदिधातूनां लृङ्लकारे रूपाणि एवं भवन्ति -

'वृध्'धातुः			
पुरुषः	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्रथमपुरुषः	अवर्धिष्यत	अवर्धिष्येताम्	अवर्धिष्यन्त
मध्यमपुरुषः	अवर्धिष्यथाः	अवर्धिष्येथाम्	अवर्धिष्यध्वम्
उत्तमपुरुषः	अवर्धिष्ये	अवर्धिष्यावहि	अवर्धिष्यामहि

अभ्यासः

१. यथोदाहरणं धातूनां लृङ्लकारस्य परस्मैपदिरूपाणि तालिकायां पूरयत -

लृट्लकारः प्रथमपुरुषः एकवचनम्	लृङ्लकारः				
	प्रथमपुरुषः			उत्तमपुरुषः	
	एकवचनम्	बहुवचनम्		एकवचनम्	बहुवचनम्
गमिष्यति	अगमिष्यत्	अगमिष्यन्		अगमिष्यम्	अगमिष्याम
१. वदिष्यति					
२. खादिष्यति					
३. स्मरिष्यति					
४. एषिष्यति	ऐषिष्यत्				
५. नंस्यति					
६. नेष्यति					
७. प्रक्ष्यति					
८. क्षमिष्यति					

२. यथोदाहरणं धातूनां लृङ्लकारस्य आत्मनेपदिरूपाणि तालिकायां पूरयत -

लृट्लकारः	लृङ्लकारः				
	प्रथमपुरुषः			उत्तमपुरुषः	
	एकवचनम्	बहुवचनम्		एकवचनम्	बहुवचनम्
वर्धिष्यते	अवर्धिष्यत	अवर्धिष्यन्त		अवर्धिष्ये	अवर्धिष्यामहि
१. वर्तिष्यते					
२. शोभिष्यते					
३. मोदिष्यते					
४. भाषिष्यते					
५. स्पर्धिष्यते					

६. जनिष्यते					
७. लप्स्यते					

अवधेयम्

➤ **यत्र क्रियाद्वयस्य कार्यकारणभावः भवति, किञ्च क्रियायाः आरम्भः अपि न भवति तत्र लृङ्लकारस्य प्रयोगः भवति ।**

यथा - रामः यदि लेखम् अलेखिष्यत् तर्हि अहं द्वितीयं लेखम् अदास्यम् ।

(अत्र लेखनस्य दानस्य च कार्यकारणभावः अस्ति । रामः लेखं न लिखितवान्, अहं तस्मै द्वितीयं लेखं न दत्तवान् इति उभयत्र अपि क्रियायाः असमाप्तिः दृश्यते ।)

सावधानं पठत अवगच्छत च -

१. यदि भीमः युद्धस्य नियमं **पर्यपालयिष्यत्** तर्हि पाण्डवाः कौरवान् न **पराजेष्यन्त** ।
२. यदि अर्जुनः श्रेयः **अन्वद्रक्ष्यत्** तर्हि स्वजनं **प्रत्ययोत्स्यत** ।
३. भीमः यदि कृष्णस्य संकेतं न **अवागमिष्यत्** तर्हि जरासन्धं न **व्यहनिष्यत्** ।
४. अर्जुनः यदि शीघ्रं **प्रत्यागमिष्यत्** तर्हि अभिमन्युं सजीवं **प्राप्स्यत्** ।
५. अर्जुनः यदि खाण्डववनं न **प्राज्वालयिष्यत्** तर्हि आग्नेयास्त्रं न **अवाप्स्यत्** ।
६. श्रीकृष्णः रथचक्रं न **उदस्थापयिष्यत्** चेत् अर्जुनस्य प्राणरक्षणं न अभविष्यत् ।
७. भीमः कीचकं न **प्राहरिष्यत्** चेत् द्रौपदी किम् अकरिष्यत् ?
८. श्रीकृष्णः यदि मथुरातः न **पलायिष्यत** तर्हि कालयवनः अपि न **प्राधाविष्यत्** ।

(एतेषु वाक्येषु उपसर्गसहितानां धातूनां लृङ्लकाररूपाणि स्थूलाक्षरैः मुद्रितानि सन्ति ।)

सावधानं पठत जानीत च -

उपसर्गसहितक्रियाः लट्लकारः	उपसर्गक्रिययोः विभागः	सन्धिकार्यम्	लृङ्लकारः	लङ्लकारः
उपविशति	उप+विशति	उप+अवेक्ष्यत्	**उपावेक्ष्यत्**	उपाविशत्
पराजयते	परा+जयते	परा+अजेष्यत	**पराजेष्यत**	पराजयत
आगच्छति	आ+गच्छति	आ+अगमिष्यत्	**आगमिष्यत्**	आगच्छत्
प्रणश्यति	प्र+नश्यति	प्र+अनशिष्यत्	**प्राणशिष्यत्**	प्राणश्यत्
अवक्षिपति	अव+क्षिपति	अव+अक्षेप्स्यत्	**अवाक्षेप्स्यत्**	अवाक्षिपत्

अवलोकते	अव+लोकते	अव+अलोकिष्यत	**अवालोकिष्यत**	अवालोकत
प्रदुष्यति	प्र+दुष्यति	प्र+अदोक्ष्यत्	**प्रादोक्ष्यत्**	प्रादुष्यत्
प्रार्थयते	प्र+अर्थयते	प्र+अर्थयिष्यत	**प्रार्थयिष्यत**	प्रार्थयत
उत्प्लवते	उद्+प्लवते	उद्+अप्लोष्यत	**उदप्लोष्यत**	उदप्लवत
संयाति	सम्+याति	सम्+अयास्यत्	**समयास्यत्**	समयात्
निर्गच्छति	निर्+गच्छति	निर्+अगमिष्यत्	**निरगमिष्यत्**	निरगच्छत्
निरीक्षते	निर्+ईक्षते	निर्+ऐक्षिष्यत	**निरैक्षिष्यत**	निरैक्षत
प्रतियुध्यते	प्रति+युध्यते	प्रति+अयोत्स्यत	**प्रत्ययोत्स्यत**	प्रत्ययुध्यत
अभिभवति	अभि+भवति	अभि+अभविष्यत्	**अभ्यभविष्यत्**	अभ्यभवत्
विहरति	वि+हरति	वि+अहरिष्यत्	**व्यहरिष्यत्**	व्यहरत्
परिपालयति	परि+पालयति	परि+अपालयिष्यत्	**पर्यपालयिष्यत्**	पर्यपालयत्
अनुपश्यति	अनु+पश्यति	अनु+अद्रक्ष्यत्	**अन्वद्रक्ष्यत्**	अन्वपश्यत्
उत्तरिष्यति	उद्+तरति	उद्+अतरिष्यत्	**उदतरिष्यत्**	उदतरत्
निषिद्ध्यति	नि+सिद्ध्यति	नि+असेत्स्यत्	**न्यषेत्स्यत्**	न्यषिध्यत्

अवधेयम्

विशेषः -

स्वीकरोति - स्वी + अकरिष्यत् = स्व्यकरिष्यत्
अङ्गीकरोति - अङ्गी + अकरिष्यत् = अङ्ग्यकरिष्यत्

३. यथोदाहरणं लृङ्लकारस्य रूपाणां प्रयोगेण वाक्यानि लिखत -

यथा - कृष्णः नवनीतस्य चोरणं कृतवान्। नवनीतचोरः इति नाम प्राप्तवान्।
कृष्णः यदि नवनीतस्य चोरणं न <u>अकरिष्यत्</u> तर्हि नवनीतचोरः इति नाम न <u>प्राप्स्यत्</u>।

१. युधिष्ठिरः सम्यक् उत्तीर्णवान्। यक्षः सर्वान् जीवितवान्।

-- ।

२. दुर्योधनः मत्स्यं भेत्तुं न शक्तवान्। द्रौपदीं न परिणीतवान्।

-- ।

३. अश्वत्थामा पाण्डवपुत्रान् हतवान्। द्रौपदी रुदितवती।

--- ।

४. कृपी आग्रहं कृतवती। द्रौणाचार्यः हस्तिनापुरं गतवान्।

--- ।

५. सुभद्रा अर्जुनं कामयते। अर्जुनः सुभद्रां हरति।

--- ।

६. कृष्णः वने व्यचरत्। सः ब्रह्माणं व्यमोहयत्।

--- ।

७. भीमः गदां स्वीकृतवान्। शत्रुसंहारम् अपि कृतवान्।

--- ।

८. कर्णः कुन्त्याः प्रस्तावं न अङ्गीकृतवान्। अर्जुनस्य हस्तेन मृतवान्।

--- ।

९. कृष्णः पाण्डवानां पक्षे भवति। कौरवाः पराजयन्ते।

--- ।

१०. शम्बरासुरः प्रद्युम्नम् अपहृतवान्। प्रद्युम्नः तं संहृतवान्।

--- ।

४. कोष्ठके लिखितानां क्रियापदानां रूपाणि लृङ्लकारे परिवर्त्य पुनः लिखत -

अभिमन्युः व्यूहभेदनार्थं गतवान्। सः तत्र न **अगमिष्यत्** चेत् युधिष्ठिरस्य बन्धनम् (अभवत्) ------------------ । तस्य बन्धनं (अभवत्) -------------- चेत् पाण्डवाः पराजयं (प्राप्नुवन्) ------------------ । पाण्डवाः पराजयं (प्राप्नुवन्) -------------- चेत् भीमार्जुनादीनां प्रतिज्ञाः (विफलन्ति) ------------- । प्रतिज्ञाः (विफलन्ति) --------------- चेत् द्रौपदी तान् न (क्षाम्यति) ------------- । अतः युधिष्ठिरः अभिमन्योः साहाय्यं स्वीकृत्य तं व्यूहभेदनार्थम् आज्ञप्तवान्। युधिष्ठिरः न (आज्ञापयति) ---------------- चेत् सः अतिहर्षेण न (अव्रजत्) ---------------- । सः अतिहर्षेण न (अव्रजत्) ---------------- चेत् व्यूहं भेत्तुं न (अशक्नोत्) ---------------- । व्यूहं भेत्तुं न (अशक्नोत्) ---------------- चेत् दुर्योधनं कथं (बध्नाति) **अभन्त्स्यत्** ? दुर्योधनस्य पुत्रं लक्ष्मणं च कथम् (अमारयत्) -------------- ? अपि च एकः एव सः सर्वान् कथं (पराजयते) ------------ ? अन्यत् सप्त महारथिनः छलेन तं कथम् (मारयन्ति) -------------- ? मिथ्याजयस्य उत्सवं कथम् (आचरन्ति) ---------------- ? अभिमन्योः यशः सर्वत्र कथं प्रसृतम् (अभवत्) -------------- ?

५. वाक्ये प्रयुक्तानां लट्लकारस्य रूपाणां स्थाने लृङ्लकारस्य रूपाणि प्रयुज्य वाक्यानि पुनः लिखत -

यथा - देवव्रतः प्रतिज्ञां करोति। विवाहं न करोति।
यदि देवव्रतः प्रतिज्ञां न अकरिष्यत् तर्हि विवाहम् अकरिष्यत्।

१. शन्तनुः गङ्गां निषिद्ध्यति। देवव्रतः जीवति।
--।

२. भीष्मः काशिराजस्य स्वयंवरं गच्छति। प्रतिज्ञायाः उपहासः भवति।
--।

३. अम्बा भीष्मस्य पुरतः वदति। भीष्मः तां सौभदेशं प्रेषयति।
--।

४. पीयूषः शिलाखण्डं क्षिपति। फलानि पतन्ति।
--।

५. साक्षात् पश्यामि। भीतः भवामि।
--।

६. सः दुर्गं क्रीणाति। समाजकार्याय अर्पयति। (आर्पयिष्यत्)
--।

७. रामः पुस्तकं विक्रीणीते। धनम् अर्जयति। (आर्जयिष्यत्)
--।

८. तडागे जलम् अस्ति। मीनाः तडागं न त्यजन्ति।
--।

९. कृष्णः नृत्यति। राधा मुग्धा भवति।
--।

१०. भवतः मनसि उत्साहः अस्ति। भवान् विजयं प्राप्नोति।
--।

स्वाभ्यासः

१. एतानि क्रियापदानि स्वीकृत्य अष्ट वाक्यानि लिखत -

आगमिष्यत्, अभविष्यन्, प्राचलिष्यत्, प्रादास्यत्, न्यवर्तिष्यत, प्रत्यागमिष्यत्, व्यवास्थापयिष्यत्, व्यक्रेष्यत, अवास्थास्यत, अभविष्यत्

१. -- ।

२. -- ।

३. -- ।

४. -- ।

५. -- ।

६. -- ।

७. -- ।

८. -- ।

एतम् अर्थं त्रिभिः प्रकारैः वक्तुं शक्नुमः ।

यथा - श्रीकृष्णः अर्जुनं गीतां श्रावितवान् । सः युद्धं कृतवान् ।

१. यदि श्रीकृष्णः अर्जुनं गीतां न अश्रावयिष्यत् तर्हि सः युद्धं न अकरिष्यत् ।

२. यदि श्रीकृष्णः अर्जुनं गीतां न श्रावयेत् तर्हि सः युद्धं न कुर्यात् ।

३. यदि श्रीकृष्णः अर्जुनं गीतां न श्रावितवान् स्यात् तर्हि सः युद्धं न कृतवान् स्यात् ।

****

विलपन् नरभक्षी राक्षसः...

शतृप्रत्ययान्तानां प्रयोगः **१७**

एतां कथां सावधानम् पठत -

द्वापरयुगे एकचक्रानाम्न्यां नगर्यां कश्चन ब्राह्मणः सकुटुम्बः **निवसन्** आसीत्। तस्मिन् काले पुत्रसहिता कुन्ती अपि तां नगरीं प्राप्नोत्। सा तस्मिन् ब्राह्मणकुटुम्बे एव वासम् अकरोत्। एकस्मिन् दिने सा गृहे कश्चन रोदनं **कुर्वन्** अस्ति इति रोदनध्वनिम् अशृणोत्। सा अन्तः गत्वा अपश्यत् यत् ब्राह्मणकुटुम्बः **विलपन्** वर्तते। सा 'विलापस्य कारणं किम्' इति ब्राह्मणम् अपृच्छत्। तदा ब्राह्मणः **रुदन्** अवदत् - अत्र यमुनातटे काचिद् गुहा वर्तते। तत्र बकासुरनामकः नरभक्षी राक्षसः **निवसन्** अस्ति। सः नगरात् प्रतिदिनं भोजनेन सह भोजनस्य नेतारम् अपि खादति। अद्य अस्माकं कुटुम्बस्य क्रमः अस्ति इति।

एतद् आकर्ण्य कुन्ती अवदत् - मम पुत्रः भीमः सः नरभक्षिणं राक्षसं मारयितुं समर्थः अस्ति। अतः तस्य नाशाय भोजनरूपेण स्वपुत्रं भीमं प्रेषयामि। तदा भीमः भोजनं स्वीकृत्य गुहां प्रति गतवान्। तत्र गत्वा बकासुरस्य नाम उच्चैः **उच्चारयन्** तस्मै नीतं भोजनं स्वयं **खादन्** अतिष्ठत्। तस्य ध्वनिं **शृण्वन्** कुपितो भूत्वा बकासुरदैत्यः तत्र आगतः। तस्य शरीरम् अतीव विशालम् आसीत्। सः एतावता वेगेन **प्रचलन्** आसीत् यत् मन्ये पृथिव्याः विदारणम् एव करिष्यतीति।

भोजनं कुर्वन्तं भीमं दृष्ट्वा सः इतोऽपि कोपं **प्रदर्शयन्** अवदत् - 'यमलोकम् **इच्छन्** दुर्बुद्धिः भवान् कः ? यत् भोजनं मम कृते आनीतं तत् स्वयं **खादन्** अस्ति' इति। तदा भीमः तस्य वचनं श्रुत्वा **हसन्** पुनः भोक्तुम् आरभत।

अधुना सः नरभक्षी राक्षसः उच्चैः **गर्जन्** हस्तौ **उन्नयन्** च भीमसेनं मारयितुं तं प्रति अधावत्। एतद् दृष्ट्वा अपि भीमः **प्रहसन् अश्नन्** एव आसीत्। तदा भीमसेनस्य पृष्ठतः **तिष्ठन्** राक्षसः उभाभ्यां हस्ताभ्यां पृष्ठभागे अताडयत्। पुनरपि भीमः तम् **अनवलोकयन् खादन्** एव अतिष्ठत्। अधुना तस्मै **ईर्ष्यन् द्रुह्यन्** च राक्षसः एकं वृक्षम् उत्पाट्य भीमस्य उपरि अक्षिपत्। तदा महाबली भीमसेनः शनैः शनैः भोजनं **समापयन्** आचमनं **कुर्वन्**, मुखादिकं च **प्रक्षालयन्** क्षणाभ्यन्तरे युद्धाय सिद्धः अभवत्। राक्षसेन क्षिप्तं वृक्षं भीमः वामहस्तेन गृहीत्वा तेनैव वृक्षेण राक्षसं **ताडयन्** प्राह - 'भोः दुष्टराक्षस ! अद्य तव विनाशः निश्चितः' इति।

एवं भीमेन सह चिरकालं यावत् युद्धं **कुर्वन्** राक्षसः श्रान्तः जातः। तस्य श्रान्तिं **पश्यन्** भीमः तं भूमौ प्रक्षिप्य जानुभ्याम् अताडयत्। अन्ते भीमसेनः बकासुरस्य ग्रीवां **गृह्णन्** तस्य कौपीनं च गृहीत्वा तस्य कटिभागम् अभञ्जयत्। एवं करणेन तस्य मुखात् रक्तः **स्रवन्** आसीत्। क्षणाभ्यन्तरे नरभक्षी बकासुरः **विलपन् चीत्कुर्वन्** च मृत्युम् उपगतः।

➢ **अस्यां कथायां स्थूलाक्षरैः दर्शितानि पदानि शतृप्रत्ययान्तानि सन्ति।**

एतानि वाक्यानि पठित्वा शतृप्रत्ययस्य प्रयोगान् परिशीलयत -

१.	अर्जुनः प्रतिज्ञां स्मरति, बाणप्रहारं करोति।	अर्जुनः प्रतिज्ञां **स्मरन्** बाणप्रहारं करोति।
२.	दुर्योधनः गर्जति, धावति।	दुर्योधनः **गर्जन्** धावति।
३.	वधूः श्वशुरगृहं गच्छति, रोदिति।	वधूः श्वशुरगृहं **गच्छन्ती** रोदिति।
४.	बालकाः भल्लुकं पश्यन्ति, प्रसन्नाः भवन्ति।	बालकाः भल्लुकं **पश्यन्तः** प्रसन्नाः भवन्ति।
५.	गायकः वीणां वादयति, गायति।	गायकः वीणां **वादयन्** गायति।
६.	मयूरौ मेघं पश्यतः, नृत्यतः।	मयूरौ मेघं **पश्यन्तौ** नृत्यतः।
७.	मञ्चे नर्तक्यौ नृत्यतः, गीतं गायतः।	मञ्चे नर्तक्यौ **नृत्यन्त्यौ** गीतं गायतः।
८.	मण्डूकाः जले तरन्ति, रटन्ति।	मण्डूकाः जले **तरन्तः** रटन्ति।
९.	मूर्खः जलं पिबति, हसति।	मूर्खः जलं **पिबन्** हसति।
१०.	श्यामः कवितां पठति, लिखति।	श्यामः कवितां **पठन्** लिखति।
११.	माता पत्रं पठति, रोदिति।	माता पत्रं **पठन्ती** रोदिति।
१२.	कुक्कुराः अपरिचितं पश्यन्ति, बुक्कन्ति।	कुक्कुराः अपरिचितं **पश्यन्तः** बुक्कन्ति।
१३.	छात्राः वाक्यानि शृण्वन्ति, लिखन्ति।	छात्राः वाक्यानि **शृण्वन्तः** लिखन्ति।
१४.	अभिनेतारः अभिनयन्ति, दर्शकान् तोषयन्ति।	अभिनेतारः **अभिनयन्तः** दर्शकान् तोषयन्ति।
१५.	मित्रं धावति, आगच्छति।	मित्रं **धावत्** आगच्छति।

अवधेयम्

उपरि लिखितेषु वाक्येषु **'गच्छन्, स्मरन्, गर्जन्, गच्छन्ती, पश्यन्तः'** इत्यादीनि 'शतृ'प्रत्ययान्तानि रूपाणि सन्ति। वर्तमानकालार्थे परस्मैपदिधातुभ्यः कर्तरि 'शतृ'प्रत्ययः भवति। 'शतृ'प्रत्यये शकारस्य अकारस्य च लोपात् 'अत्' इति अवशिष्यते। शतृयोगात् शत्रन्तं प्रातिपदिकं सिध्यति। शतृप्रत्ययान्ताः शब्दाः विशेषणानि भवन्ति। अतः एतेषां रूपाणि त्रिषु लिङ्गेषु त्रिषु वचनेषु सप्तसु विभक्तिषु च भवन्ति।

यथा -

पठ् + शतृ = **पठत्**
- **पठन्** (पुंलिङ्गम्)
- **पठन्ती** (स्त्रीलिङ्गम्)
- **पठत्** (नपुंसकलिङ्गम्)

शतृप्रत्ययान्तस्य त्रिषु लिङ्गेषु रूपाणि एवं भवन्ति -

पठ् + शतृ = पठत् (पुंलिङ्गरूपाणि)			
विभक्तिः	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्र.वि.	पठन्	पठन्तौ	पठन्तः
द्वि.वि.	पठन्तम्	पठन्तौ	पठतः
तृ.वि.	पठता	पठद्भ्याम्	पठद्भिः
च.वि.	पठते	पठद्भ्याम्	पठद्भ्यः
पं.वि.	पठतः	पठद्भ्याम्	पठद्भ्यः
ष.वि.	पठतः	पठतोः	पठताम्
स.वि.	पठति	पठतोः	पठत्सु

पठ् + शतृ = पठत् (स्त्रीलिङ्गरूपाणि)		
एकवचनम्	**द्विवचनम्**	**बहुवचनम्**
पठन्ती	पठन्त्यौ	पठन्त्यः
पठन्तीम्	पठन्त्यौ	पठन्तीः
पठन्त्या	पठन्तीभ्याम्	पठन्तीभिः
पठन्त्यै	पठन्तीभ्याम्	पठन्तीभ्यः
पठन्त्याः	पठन्तीभ्याम्	पठन्तीभ्यः
पठन्त्याः	पठन्त्योः	पठन्तीनाम्
पठन्त्याम्	पठन्त्योः	पठन्तीषु

पठ् + शतृ = पठत् (नपुंसकलिङ्गरूपाणि)			
विभक्तिः	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्र.वि.	पठत्	पठन्ती	पठन्ति
द्वि.वि.	पठत्	पठन्ती	पठन्ति
तृ.वि.	पठता	पठद्भ्याम्	पठद्भिः
च.वि.	पठते	पठद्भ्याम्	पठद्भ्यः
पं.वि.	पठतः	पठद्भ्याम्	पठद्भ्यः
ष.वि.	पठतः	पठतोः	पठताम्
स.वि.	पठति	पठतोः	पठत्सु

अभ्यासः

१. अधः प्रदत्तायां तालिकायां शत्रन्तानि पुंलिङ्गरूपाणि पूरयत -

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र.वि.	पिबन्	पिबन्तौ	पिबन्तः
द्वि.वि.			
तृ.वि.			पिबद्भिः
च.वि.	पिबते		
पं.वि.			
ष.वि.	पिबतः		पिबताम्
स.वि.		पिबतोः	

२. अधः प्रदत्तायां तालिकायां शत्रन्तानि स्त्रीलिङ्गरूपाणि पूरयत -

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र.वि.	खादन्ती	खादन्त्यौ	खादन्त्यः
द्वि.वि.	खादन्तीम्		खादन्तीः
तृ.वि.			
च.वि.			खादन्तीभ्यः
पं.वि.	खादन्त्याः	खादन्तीभ्याम्	
ष.वि.		खादन्त्योः	
स.वि.	खादन्त्याम्		

३. अधः प्रदत्तायां तालिकायां शत्रन्तानि नपुंसकलिङ्गरूपाणि पूरयत -

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र.वि.	पतत्	पतन्ती	पतन्ति
द्वि.वि.			
तृ.वि.			
च.वि.			

पं.वि.			
ष.वि.			
स.वि.			पतत्सु

४. यथोदाहरणम् अधः लिखितानां क्रियापदानां शत्रन्तरूपाणि त्रिषु लिङ्गेषु लिखत -

यथा -	गच्छति	गच्छन् (पुं.)	गच्छन्ती (स्त्री.)	गच्छत् (नपुं.)
१.	सृजति	--------------	---------------	-------------- ।
२.	विन्दति	--------------	---------------	-------------- ।
३.	पचति	--------------	---------------	-------------- ।
४.	चलति	--------------	---------------	-------------- ।
५.	यजति	--------------	----------------	-------------- ।
६.	इच्छति	--------------	----------------	-------------- ।
७.	भजति	--------------	----------------	-------------- ।
८.	लिखति	--------------	----------------	-------------- ।
९.	प्रकाशयति	--------------	----------------	-------------- ।
१०.	गायति	--------------	----------------	-------------- ।

विशेषक्रियापदानि

लट्लकाररूपाणि	पुंलिङ्गम्	स्त्रीलिङ्गम्	नपुंसकलिङ्गम्
ददाति	ददत्	ददती	ददत्
बिभेति	बिभ्यत्	बिभ्यती	बिभ्यत्
करोति	कुर्वन्	कुर्वती	कुर्वत्
शृणोति	शृण्वन्	शृण्वती	शृण्वत्
आप्नोति	आप्नुवन्	आप्नुवती	आप्नुवत्
चिनोति	चिन्वन्	चिन्वती	चिन्वत्
जानाति	जानन्	जानती	जानत्
क्रीणाति	क्रीणन्	क्रीणती	क्रीणत्
अश्नाति	अश्नन्	अश्नती	अश्नत्

बध्नाति	बध्नन्	बध्नती	बध्नत्
रोदिति	रुदन्	रुदती	रुदत्
शक्नोति	शक्नुवन्	शक्नुवती	शक्नुवत्
अस्ति	सन्	सती	सत्
हन्ति	घ्नन्	घ्नती	घ्नत्
जहाति	जहत्	जहती	जहत्
जागर्ति	जाग्रत्	जाग्रती	जाग्रत्
दधाति	दधत्	दधती	दधत्
शास्ति	शासत्	शासती	शासत्

अधः लिखितेषु वाक्येषु शत्रन्तानां रूपाणां विभिन्नासु विभक्तिषु प्रयोगः कृतः अस्ति । तानि सावधानं पठत अवगच्छत च -

१. क्रीडाङ्गणं **गच्छन्** छात्रः गायति ।

२. क्रीडाङ्गणं **गच्छन्ती** छात्रा गायति ।

३. क्रीडाङ्गणं **गच्छत्** मित्रं गायति ।

४. शिक्षकः **पठन्तं** छात्रं पृच्छति ।

५. शिक्षिका **लिखन्तीः** छात्राः पृच्छति ।

६. नकुलः **चलत्** चक्रं पश्यति ।

७. **धावता** अश्वेन सह धावकः धावति ।

८. **गच्छन्त्या** मात्रा कथा कथ्यते ।

९. महिला **याचते** भिक्षुकाय अन्नं ददाति ।

१०. वरं **ददत्यै** देव्यै नमः।

११. वरं **ददद्भ्यः** देवेभ्यः नमः ।

१२. **चलतः** गजात् जनः अपतत् ।

१३. द्रौपदी शब्दं **कुर्वद्भ्यः** सिंहेभ्यः बिभेति ।

१४. **आगच्छन्त्याः** शिक्षिकायाः छात्रः बिभेति ।

१५. **धावतः** छात्रस्य नाम किम् ?

१६. **नृत्यन्त्योः** बालिकयोः नामनी के ?

१७. पाठशालायां **पठतां** छात्राणां गृहं कुत्र अस्ति ?

१८. **प्रचलत्सु** शिबिरेषु सर्वैः गन्तव्यम् ।

१९. **क्रीडत्सु** बालकेषु कृष्णः चतुरः अस्ति ।

२०. पुत्रः **खादयन्त्यां** मातरि स्निह्यति ।

५. उचितानि शत्रन्तानि रूपाणि उपयुज्य यथोदाहरणं वाक्यानि परिवर्तयत -

यथा - अर्जुनः गीतोपदेशं स्मरति । युद्धं करोति ।

अर्जुनः गीतोपदेशं स्मरन् युद्धं करोति ।

१. युधिष्ठिरः धृतराष्ट्रं प्रणमति । वनं गच्छति ।

-- ।

२. सैनिकाः धावन्ति । शस्त्रप्रहारं कुर्वन्ति ।

-- ।

३. भीष्मः शङ्खं धमति । युद्धारम्भं करोति ।

-- ।

४. अर्जुनः भीष्मं मारयति । रोदिति ।

-- ।

५. नकुलः वृक्षम् आरोहति । जलं पश्यति ।

-- ।

६. शिवः नृत्यति । डमरुं वादयति ।

-- ।

७. श्रीरामः मृगम् अनुधावति । तं मारयति ।

-- ।

८. कुम्भकर्णः मद्यपानं करोति । निद्रां करोति ।

-- ।

९. प्रवाचकः कथां कथयति । रोदिति ।

-- ।

१०. छात्राः वाक्यानि शृण्वन्ति । लिखन्ति ।

-- ।

११. रजकः वस्त्रं क्षालयति । गीतं गायति ।

-- ।

१२. शिक्षकः पाठं पाठयति । प्रश्नं पृच्छति ।

-- ।

१३. पूजकः पुष्पम् अर्पयति । नमस्करोति ।

-- ।

१४. छात्रौ विद्यालयं गच्छतः । गीतं गायतः ।

-- ।

१५. बालाः क्रीडन्ति । कोलाहलं कुर्वन्ति ।

-- ।

६. **कोष्ठके प्रदत्तस्य धातोः उचितेन शत्रन्तरूपेण रिक्तस्थानानि पूरयत -**

यथा - कर्म कुर्वन्तः जनाः सिद्धिं लभन्ते । (कृ)

१. जनाः ------------------------------ मयूरं दृष्ट्वा तुष्यन्ति । (नृत्)

२. अध्यापिका --------------------------- बालिकां बोधयति । (लिख्)

३. दुष्यन्तः ------------------------ हरिणम् अनुसरति स्म । (धाव्)

४. गीतां ---------------------- छात्रेण श्लोकाः कण्ठस्थीकृताः । (पठ्)

५. दूरदर्शने महाभारतं -------------- बालिकया भोजनं विस्मृतम् । (दृश्)

६. वेदपाठं ---------------------------- विप्राय राजा गां ददाति । (कृ)

७. द्वारे ---------------------------- भगिन्यै कन्दुकं ददातु । (क्रीड्)

८. वने ------------------- सिंहेभ्यः वन्यजीवाः भीताः अभवन् । (गर्ज्)

९. मार्गे ------------------- शुनकीभ्यां बालौ भीतौ अभवताम् । (धाव्)

१०. ------------------------ गायकस्य गीतम् आनन्दं जनयति । (गै)

११. युद्धभूमौ युद्धं ------------------- अर्जुनस्य पराक्रमः भयम् उत्पादयति । (कृ)

१२. विद्यालये ------------------- छात्रेषु शिवः पटुः अस्ति । (पठ्)

१३. --------------------------- नदीषु गङ्गा पवित्रतमा । (प्र+वह्)

१४. वृक्षात् ---------------------- पक्वे फले पश्यतु । (पत्)

१५. सदैव मम मित्रं ------------------- एव वदति । (हस्)

७. **अधः लिखितानि वाक्यानि श्रीमद्भगवद्गीतायाः तत्तत्सङ्ख्याकान् श्लोकान् परिशील्य मञ्जूषायां दत्तैः उचितैः शत्रन्तपदैः पूरयत -**

प्रहसन्, भ्रामयन्, युञ्जन्, चिन्तयन्तः, अविनश्यन्तम्, काङ्क्षन्तः, अनिच्छन्, युञ्जन्, व्याहरन्, स्मरन् ।

यथा - विषयान् ध्यायतः पुंसः तेषु सङ्गः उपजायते । (श्रीमद्भग.२.६२)

१. बलात् नियोजितः ------------------- अपि अयं पुरुषः पापं चरति । (श्रीमद्भग.३.३६)

२. सिद्धिं -------------------------------- जनाः देवताः यजन्ते । (श्रीमद्भग.४.१२)

३. नियतमानसः योगी आत्मानं ------------- मत्संस्थाम् अधिगच्छति । (श्रीमद्भग.६.१५)

४. आत्मानं ------------- विगतकल्मषः योगी ब्रह्मसंस्पर्शम् अश्नुते । (श्रीमद्भग.६.२८)

५. अन्तकाले मां ------------- कलेवरं मुक्त्वा पुरुषः मद्भावं याति । (श्रीमद्भग.८.५)

६. ओम् इति एकाक्षरं ब्रह्म ------------- यः देहं त्यजति सः परमां गतिं याति । (श्रीमद्भग.८.१३)

७. हृषीकेशः अर्जुनं -------------------------------- इव उवाच । (श्रीमद्भग.२.१०)

८. सर्वेषु भूतेषु ----------------- परमेश्वरं यः पश्यति सः पश्यति । (श्रीमद्भग.१३.२७)

९. हे अर्जुन ! ईश्वरः सर्वभूतानि यन्त्रारूढानि इव -------------- हृद्देशे तिष्ठति। (श्रीमद्भग.१८.६१)

१०. अनन्याः ये मां ------------ पर्युपासते तेषां योगक्षेमं वहाम्यहम्। (श्रीमद्भग.९.२२)

स्वाभ्यासः

१. अधः लिखितेषु गीताश्लोकेषु प्रयुक्तानि शत्रन्तपदानि आधृत्य यथोदाहरणं वाक्यनिर्माणं कुरुत उच्चैः वदत च -

ओमित्येकाक्षरं ब्रह्म **व्याहरन्मामनुस्मरन्**। (व्याहरन्, अनुस्मरन्)
यः प्रयाति **त्यजन्देहं** स याति परमां गतिम्॥ (त्यजन्) (श्रीमद्भग. ८.१३)

नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित्।
पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन्॥ (श्रीमद्भग. ५.८)
(पश्यन्, शृण्वन्, स्पृशन्, जिघ्रन्, अश्नन्, गच्छन्, स्वपन्, श्वसन्)

प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि। (प्रलपन्, विसृजन्, गृह्णन्, उन्मिषन्, निमिषन्)
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्॥ (श्रीमद्भग. ५.९)

(व्याहरति, अनुस्मरति, त्यजति, पश्यति, शृणोति, स्पृशति, जिघ्रति, अश्नाति, गच्छति, स्वपिति, श्वसिति, प्रलपति, विसृजति, गृह्णाति, उन्मिषति, निमिषति)

यथा - तत्त्ववित् पश्यन् अपि अहं न पश्यामि इति मन्यते।
तत्त्वविदौ पश्यन्तौ अपि आवां न पश्यावः इति मन्येते।
तत्त्वविदः पश्यन्तः अपि वयं न पश्यामः इति मन्यन्ते।

१. तत्त्ववित् ---------------------------- अपि अहं न शृणोमि इति मन्यते।
२. तत्त्ववित् ---------------------------- अपि अहं न अश्नामि इति मन्यते।
३. तत्त्ववित् ---------------------------- अपि अहं न गच्छामि इति मन्यते।
४. तत्त्ववित् ---------------------------- अपि अहं न जिघ्रामि इति मन्यते।
५. तत्त्ववित् ---------------------------- अपि अहं न स्पृशामि इति मन्यते।
६. तत्त्ववित् ---------------------------- अपि अहं न त्यजामि इति मन्यते।
७. तत्त्ववित् ---------------------------- अपि अहं न गृह्णामि इति मन्यते।
८. तत्त्ववित् ---------------------------- अपि अहं न स्वपिमि इति मन्यते।
९. तत्त्ववित् ---------------------------- अपि अहं न प्रलपामि इति मन्यते।
१०. तत्त्ववित् ---------------------------- अपि अहं न व्याहरामि इति मन्यते।

****

शान्त्यै क्रियमाणाः प्रयासाः

शानच्-प्रत्ययान्तानां प्रयोगः

एतां कथां सावधानं पठत -

महाभारतस्य उद्योगपर्वणि दूतरूपेण गतः श्रीकृष्णः पाण्डवानां पित्रार्जितं राज्यं प्रत्यर्पयितुं दुर्योधनं निवेदयति। परं दुराग्रहं **कुर्वाणः** दुर्योधनः तत् नाङ्गीकरोति। अतः श्रीकृष्णः स्वप्रयत्ने सफलः नाभवत्। अज्ञातवासात् प्रत्यागताः पाण्डवाः तु पञ्च ग्रामान् एव **याचमानाः** आसन्। तथापि **स्पर्धमानः** दुर्योधनः - 'सूच्यग्रमिताम् अपि भूमिं पाण्डवेभ्यः न दास्यामि' इति सदर्पम् उक्तवान्। तथा **ब्रुवाणस्य** तस्य दुराग्रहं ज्ञात्वा सर्वे प्रतिनिवृत्ताः।

वस्तुतः पाण्डवाः धर्मनिष्ठाः। अतः ते द्वादशवर्षाणां वनवासम् एकवर्षस्य अज्ञातवासं च अङ्गीकृतवन्तः। तथापि पूर्वनिर्धारितस्य पणस्य अनुगुणं स्वभूमिम् **अलभमानाः** ते युद्धार्थं निश्चयं कृतवन्तः। धर्ममार्गेण सदाचारेण च **वर्तमानानां** तेषाम् उत्तमाचरणस्य महत्त्वं समाजे प्रस्थापयितुं महाभारतयुद्धं प्राचलत्। युद्धात् विरन्तुं विदुरः दुर्योधनं बोधितवान् - "त्वया सह अन्ये सर्वेऽपि राजानः स्वसैन्यसहिताः अपि अर्जुनं जेतुं न शक्नुवन्ति। अतः पाण्डवेभ्यः अर्धं राज्यं दत्त्वा सुखेन स्थास्यति चेत् तव कल्याणं भविष्यति" इति।

दुर्योधनः किमपि न श्रुतवान्। भगवतः बन्धनं कर्तुम् **प्रयतमानाय** तस्मै श्रीकृष्णः राजसभायां स्वकीयं दिव्यं विराड्रूपं दर्शयित्वा ततः न्यवर्तत।

कृष्णस्य प्रयत्नः यदा विफलः अभवत् तदा एव कुरुक्षेत्रे धर्मयुद्धं भविष्यति इति निश्चितम् अभवत्। अर्जुनस्य सारथ्यम् **वहमानेन** श्रीकृष्णेन समग्रस्य धर्मस्य मानवजातेः अपि सारथ्यं कृतम्।

युद्धे जयं प्राप्तुं **प्रयतमानेन** दुर्योधनेन प्रथमं श्रीकृष्णात् तस्य सेना याचिता। तदनन्तरं सः युद्धे सक्रियं भागं न ग्रहीष्यति इति **ज्ञातवता** तेन राज्ञः कृतवर्मणः समीपं गतम्। तत्र च तस्मात् एकाक्षौहिणीं सेनां प्राप्य ततः प्रस्थितम्। श्रीकृष्णस्य सारथ्यं सम्प्राप्य **मोदमानः** अर्जुनः योद्धुं सन्नद्धः अभवत्।

अन्ततो गत्वा धर्मस्य एव विजयः अभवत्, अधर्मस्य च नाशः अभवत् इति वयं जानीमः। अतः कुरुक्षेत्रं सत्यमेव धर्मक्षेत्रम् इति उच्यते। अतः एव धृतराष्ट्रः तत्र किं किं घटितम् इति ज्ञातुं प्रथमश्लोके एवं पृष्टवान् -

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥ (श्रीमद्भग.१.१)

➢ **अस्यां कथायां स्थूलाक्षरैः दर्शितानि पदानि शानच्प्रत्ययान्तानि सन्ति।**

अवधेयम्

- पूर्वतनपाठे वयं **पठन्, गच्छन्** इत्यादीनां शतृप्रत्ययान्तानां सर्वेषु लिङ्गेषु, सर्वासु च विभक्तिषु प्रयोगः कथं भवति इति पठितवन्तः । अस्मिन् पाठे **कुर्वाणः, याचमानः, स्पर्धमानः, ब्रुवाणः** इत्यादीनि रूपाणि प्रयुक्तानि सन्ति । एतानि शानच्-प्रत्ययान्तानि रूपाणि ।
- वर्तमानकालार्थे आत्मनेपदिधातुभ्यः शानच्-प्रत्ययः योज्यते । यथा - **कम्पमानः** अर्जुनः रथे उपविष्टवान् । शानच्-प्रत्ययस्य शकारस्य चकारस्य च लोपात् **'आन'** इति अवशिष्यते ।
- शानच्-प्रत्ययान्तानां प्रयोगः त्रिषु लिङ्गेषु त्रिषु वचनेषु सप्तसु विभक्तिषु च भवति । एतेषां पदानां प्रयोगः विशेषणरूपेण भवति ।
- शानजन्तानां पदानां रूपाणि पुंलिङ्गे **रामशब्दवत्**, स्त्रीलिङ्गे **लताशब्दवत्** नपुंसकलिङ्गे **फलशब्दवत्** च भवन्ति ।

यथा - शीङ् + शानच् (आन) = **शयान** →
- **शयानः** (पुंलिङ्गम्)
- **शयाना** (स्त्रीलिङ्गम्)
- **शयानम्** (नपुंसकलिङ्गम्)

एवमेव **कुर्वाणः, जानानः** इत्यादीनि रूपाणि ज्ञातव्यानि । किन्तु **शोभमानः, कम्पमानः, वन्दमानः** इत्यादिषु शानजन्तरूपेषु **'आन'** इति स्थाने **'मान'** इति रूपं दृश्यते । (मकारसहितं रूपम् - म् + आन) कुत्र मकारसहितं रूपं भवति ?, कुत्र मकाररहितं रूपं भवति ? इति ज्ञातुं धातोः लट्लकारस्य प्रथमपुरुषस्य एकवचनरूपं द्रष्टव्यं भवति । तत्र 'ते' इत्यस्मात् पूर्वं ह्रस्वः अकारः तर्हि शानजन्तरूपे मकारस्य योजनं करणीयम् ।

यथा - वन्दते - **वन्दमानः**, शोभते - **शोभमानः**, कम्पते - **कम्पमानः** इत्यादीनि रूपाणि ।

शेते - **शयानः** (अत्र पूर्वम् एकारः अस्ति । अतः मकारः न योजितः ।)

जानीते - **जानानः** (अत्र पूर्वम् इकारः अस्ति । अतः मकारः न योजितः ।)

मनुते - **मन्वानः** (अत्र पूर्वम् उकारः अस्ति । अतः मकारः न योजितः ।)

वस्तुतः **'मान'**सहितरूपाणि एव अधिकानि । तद्रहितानि तु अत्र विशेषरूपाणि इति निर्दिष्टानि सन्ति ।

कानिचित् विशेषरूपाणि परिशीलयत -

क्रियापदम्	पुंलिङ्गे	स्त्रीलिङ्गे	नपुंसकलिङ्गे
अधीते (अधि + इ)	अधीयानः	अधीयाना	अधीयानम्
शेते (शी)	शयानः	शयाना	शयानम्
विक्रीणीते (वि + क्री)	विक्रीणानः	विक्रीणाना	विक्रीणानम्
कुरुते (कृ)	कुर्वाणः	कुर्वाणा	कुर्वाणम्
जानीते (ज्ञा)	जानानः	जानाना	जानानम्

ब्रूते (ब्रू)	ब्रुवाणः	ब्रुवाणा	ब्रुवाणम्
भुङ्क्ते (भुज्)	भुञ्जानः	भुञ्जाना	भुञ्जानम्
मनुते (मन्)	मन्वानः	मन्वाना	मन्वानम्
आस्ते (आस)	आसीनः	आसीना	आसीनम्
प्रयुङ्क्ते (प्र + युज्)	प्रयुञ्जानः	प्रयुञ्जाना	प्रयुञ्जानम्

अभ्यासः

१. पाठं पठित्वा प्रश्नानाम् उत्तराणि लिखत -

१. दूतरूपेण गतः श्रीकृष्णः दुर्योधनं किं न्यवेदयत् ?

-- ।

२. स्पर्धमानः दुर्योधनः सदर्पम् किम् उक्तवान् ?

-- ।

३. महाभारतयुद्धं किमर्थं प्राचलत् ?

-- ।

४. श्रीकृष्णः राजसभायां किं कृत्वा न्यवर्तत ?

-- ।

५. कुरुक्षेत्रे धर्मयुद्धं भविष्यति इति कदा निश्चितम् अभवत् ?

-- ।

६. दुर्योधनः राज्ञः कृतवर्मणः कियतीं सेनां प्राप्तवान् ?

-- ।

७. अन्ततो गत्वा किम् अभवत् ?

-- ।

८. भगवद्गीतायाः प्रथमश्लोकं लिखत ?

-- ।

२. पाठे लिखितानां शानजन्तपदानाम् आवलीं कृत्वा तेषां विभक्तिं वचनं च यथोदाहरणं लिखत -

शानजन्तरूपम्	विभक्तिः	वचनम्	शानजन्तरूपम्	विभक्तिः	वचनम्
यथा - कुर्वाणः	प्रथमा	एकवचम्			
------------	------------	------------	------------	------------	------------
------------	------------	------------	------------	------------	------------
------------	------------	------------	------------	------------	------------
------------	------------	------------	------------	------------	------------

३. मञ्जूषातः शानच्-प्रत्ययान्तानि पदानि चित्वा लिखत -

धनवान्, हनुमान्, जायमानः, दुष्यन्तः, गोपयमानम्, लिखन्, त्रपमाना, तारकः, ताड्यमानः, क्लिश्यमानः, हसन्, जानन्, खिद्येत, क्षयमाणः, गायति, खिद्यमानः, पवमानः, बाधते बाधमानः, मलिना, आसीना, ज्ञानम्, कुर्वाणः, वदन्, गच्छन्, तन्वाना

१. --------------- ४. --------------- ७. --------------- १०. ---------------
२. --------------- ५. --------------- ८. --------------- ११. ---------------
३. --------------- ६. --------------- ९. --------------- १२. ---------------

४. यथोदाहरणं क्रियापदानां शानजन्तानि पुंलिङ्गरूपाणि लिखत -

यथा - सहते - सह् + शानच् ⟶ सहमानः

१. लभते --------- + ----------- ⟶ -------------------------
२. क्षमते --------- + ----------- ⟶ -------------------------
३. म्रियते --------- + ----------- ⟶ -------------------------
४. शङ्कते --------- + ----------- ⟶ -------------------------
५. आरभते --------- + ----------- ⟶ -------------------------
६. रोचते --------- + ----------- ⟶ -------------------------
७. क्लिश्यते --------- + ----------- ⟶ -------------------------
८. मन्यते --------- + ----------- ⟶ -------------------------
९. संहरते --------- + ----------- ⟶ -------------------------
१०. निवर्तन्ते --------- + ----------- ⟶ -------------------------
११. विधीयते --------- + ----------- ⟶ -------------------------

५. अधः लिखितानां शानजन्तानां पदानां निर्दिष्टविभक्तेः रूपाणि लिखत -

पदम्	विभक्तिः	एकवचनम्	बहुवचनम्
१. दयमानः	प्रथमा		
२. डयमाना	द्वितीया		
३. घटमानम्	प्रथमा		
४. जृम्भमाणम्	प्रथमा		
५. त्वरमाणा	पञ्चमी		
६. वेपमानः	षष्ठी		
७. वर्तमानम्	षष्ठी		

८. जायमाना	षष्ठी		
९. चिन्वाना	प्रथमा		
१०. कुर्वाणः	षष्ठी		
११. ब्रुवाणः	षष्ठी		
१२. जानानम्	द्वितीया		

६. यथोदाहरणं लट्लकारस्य प्रयोगस्य वाक्यानि शानच्प्रत्ययप्रयोगस्य वाक्यरूपेण परिवर्तयत -

यथा - पुण्डरीकः सेवते । सेवमानः पुण्डरीकः अस्ति ।

१. मीरा भजते । ------------------ ----------------------- ------------------- ।
२. शिष्यौ वन्देते । ------------------ ----------------------- ------------------- ।
३. नेता भाषते । ------------------ ----------------------- ------------------- ।
४. शुनकः कम्पते । ------------------ ----------------------- ------------------- ।
५. महिलाः आसते । -------------------- --------------------- ------------------- ।
६. पक्षिणः डयन्ते । ---------------- ------------------------ -------------------- ।
७. बालिका चिनोति । ------------------ ----------------------- ------------------- ।
८. बालकौ युध्येते । ------------------ --------------- -------------------------- ।

७. चित्रं दृष्ट्वा क्रियापदानां साहाय्येन यथोदाहरणं वाक्यनिर्माणं कुरुत -



(वीक्षते - साधयति)

यथा - वीक्षमाणः अर्जुनः लक्ष्यं साधयति ।



(युद्ध्येते - कूर्दते)

(आस्ते - निमीलयति)

(१) -- । (२) -- ।

(भजेते - नृत्यतः)

(वन्दन्ते - प्राप्नुवन्ति)

(३) -- ।

(सेवते - प्रक्षालयति)

(४) -- ।

(प्रार्थयते - निवेदयति)

(५) -- ।

(खिद्यते - उन्नयति)

(६) -- ।

(डयते - धरति)

(७) -- ।

(शेते - पश्यति)

(८) -- ।

(ब्रुवाते - पिबतः)

(९) -- ।

(१०) -- ।

८. कोष्ठके प्रदत्तानां शब्दानाम् उचितेन शानजन्तरूपेण रिक्तस्थानानि पूरयत -

यथा - श्लोकं ब्रुवाणः शिक्षकः छात्रान् पश्यति। (ब्रुवाण)

तदा तं ------------- (निरीक्षमाण) आचार्यं कश्चन बालकः आगत्य किमपि सूचयति। -------------------- (त्वरमाण) आचार्येण तत् स्थानं त्यज्यते। यज्ञस्य -------------------- (वर्धमान) शिखाभिः तत् स्थानं -------------- (शोभमान) आसीत्। ---------------- (कम्पमान) लताः सर्वत्र प्रवृद्धाः आसन्। कञ्चन ------------------------ (वन्दमान) तपस्विनं दृष्ट्वा -------------------- (पद्यमान) आचार्यः क्षणं यावत् तत्रैव स्थितवान्। स्ववृत्तान्तं ----------------------- (कथमान) तस्मै सः किञ्चित् विश्रान्तिं कर्तुं निवेदितवान्। फलाहारं कृत्वा जलसेवनादिकं समाप्य च तपस्वी सर्वेभ्यः आशिषः --------------- (ब्रुवाण) ततः देशाटनार्थं निर्गतवान्।

९. विशेष्यानुसारं शानजन्तानि रूपाणि योजयित्वा यथोदाहरणं वाक्यानि रचयत -

यथा - वृद्धा दुःखं सहते। तस्यै वैद्यः औषधं ददाति।

दुःखं सहमानायै वृद्धायै वैद्यः औषधं ददाति।

१. युवकः त्वरते। सः समयेन कार्यालयं प्राप्नोति।

---।

२. बालकौ उत्तमगुणप्राप्त्यै स्पर्धेते। तौ शिक्षिका परीक्षाफलं वदति।

---।

३. सः शैत्यकारणात् वेपते। पिता तं चिकित्सालयं नयति।

---।

४. वृक्षात् फलं लम्बते। तत् बालकाः त्रोटयन्ति।

---।

५. तडागे कमलं शोभते। अरुणः तस्य छायाचित्रं गृह्णाति।

---।

६. परिचारिका रुग्णं सेवते। तस्यै जनाः धन्यवादान् अर्पयन्ति।

---।

७. जनौ उत्तमशाकं चिन्वाते। तौ तस्य मूल्यं पृच्छतः।

---।

८. संस्कृतज्ञः सुभाषितानि भाषते। बालिकाः अर्थं पृच्छन्ति।

---।

९. विजयीगणः मोदते। जनाः तम् अभिनन्दन्ति।

---।

१०. श्रान्तः शिशुः शेते। माता तं गीतं श्रावयति।

---।

कर्णस्य महती दानदित्सा

सन्नन्ताः **१९**

एतानि गीतावाक्यानि सावधानं पठत -

धर्मक्षेत्रे कुरुक्षेत्रे समवेता **युयुत्सवः**। (श्रीमद्भग. १.१)
दृष्ट्वेमं स्वजनं कृष्ण **युयुत्सुं** समुपस्थितम्। (श्रीमद्भग. १.२८)
कुर्याद्विद्वांस्तथासक्तः **चिकीर्षुर्लोकसङ्ग्रहम्**। (श्रीमद्भग. ३.२५)
आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते। (श्रीमद्भग. ६.३)
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते। (श्रीमद्भग. ६.४४)

एतेषु स्थूलाक्षरैः मुद्रितानि पदानि सन्प्रत्ययान्तानि सन्ति। एतेषां विग्रहवाक्यम् इदं भवति -

युयुत्सवः - योद्धुम् इच्छवः
युयुत्सुम् - योद्धुम् इच्छुः, तम्
चिकीर्षुः - कर्तुम् इच्छुः
आरुरुक्षोः - आरोढुम् इच्छुः, तस्य
जिज्ञासुः - ज्ञातुम् इच्छुः

एतत् सम्भाषणं पठत -

कदाचित् दानविषये कृष्णार्जुनयोः सम्भाषणं प्रचलति स्म। अस्मिन् संसारे कः महादाता इति अर्जुनस्य **जिज्ञासा** आसीत्। सः कृष्णम् अपृच्छत् -

अर्जुनः - हे भगवन्! अस्मिन् संसारे कः महादाता अस्ति इति अहं **जिज्ञासुः** अस्मि। कृपया वदतु!

कृष्णः - हे पार्थ! यदि भवान् **शुश्रूषते** तर्हि निश्चयेन कथयामि यत् कर्णसदृशः दाता कोऽपि अन्यः न स्यात् एव इति। सः दानशूरः। तस्य मनः विशालम्। सः सर्वेभ्यः यथेच्छं **दित्सति**।

अर्जुनः - (उपहासपूर्वकम् अपृच्छत्) अहं **पिपृच्छिषामि** किं सः महादानशीलः ?

कृष्णः - हे सव्यसाचिन्! न केवलं भवान्, अपि तु सर्वे अपि **जिज्ञासन्ते** यत् कथं कर्णः दानवीरः इति।

अर्जुनः - भगवन्! एतत् मम प्रश्नस्य उत्तरं न, अहम् उत्तरं **शुश्रूषुः** अस्मि।

कृष्णः - अहं तदेव **विवक्षामि** अर्जुन! तत्समानः दानशीलः उदारमनस्कः च मया अन्यः न दृष्टः। किम् अधिकचर्चया ? तव **दिदृक्षा** अस्ति चेत् गत्वा प्रत्यक्षं द्रक्ष्यावः।

(एतत् उक्त्वा कृष्णः एकं रजतपर्वतं सुवर्णपर्वतं च असृजत्। ततः सः अर्जुनम् अवदत्)

कृष्णः पार्थ! भवता सायङ्कालाभ्यन्तरे दानेन अनयोः पर्वतस्थयोः सुवर्णरजतयोः समाप्तिः सम्पादनीया।

अर्जुनः - अस्तु।

(अर्जुनः दानम् आरब्धवान्। दानं **स्वीचिकीर्षवः** जनाः पङ्क्तिशः उपस्थिताः। अर्जुनः पर्वतात् उत्कृत्य उत्कृत्य सुवर्णं रजतं च सर्वेभ्यः व्यतरत्। भोजनादिनिमित्तमपि न गतं तेन। दानं **लिप्सवः** तदानीम् अपि पङ्क्तौ आसन्। ते अर्जुनं प्रशंसन्तः सन्तोषेण गतवन्तः। सायङ्कालः सञ्जातः। तावता पर्वतयोः

पादभागस्य वितरणम् अपि न समाप्तम् आसीत्। अर्जुनः लज्जया शिरः अवनमय्य अतिष्ठत्।)

कृष्णः - अस्तु। इदानीं कर्णः समापयितुं शक्नोति अथवा न इति परीक्षां करिष्ये।
(कृष्णः यथापूर्वं सुवर्णरजतयोः पर्वतं निर्माय कर्णम् आहूय) कर्ण ! पर्वतस्थे सुवर्णरजते दानेन वितरणीये। सायङ्काले तु पर्वतयोः अवशेषः कोऽपि न स्यात्। किम् एतत् भवता कर्तुं शक्येत ?

कर्णः - (आत्मविश्वासेन) कुतः न ? एतत् दिनार्धेन एव दास्यामि अहम्।
(ततः पङ्क्तौ स्थितान् उद्दिश्य सः अवदत्)

कर्णः - भवत्सु यः यावद् **स्वीचिकीर्षति** तावत् सुवर्णरजतादिकं नेतुम् अर्हति। (**लिप्सवः** जनाः महता उत्साहेन अहमहमिकया प्रवर्तमानाः सुवर्णरजतपर्वतयोः उत्कर्तनम् आरब्धवन्तः। अतः घण्टात्रयाभ्यन्तरे एव तत्र रजतपर्वतः सुवर्णपर्वतः वा न अवशिष्टः)।

कर्णः - (अल्पमपि गर्वभावम् अवहन् कृष्णसमीपम् आगत्य) हे कृष्ण ! भवदुक्तं कार्यं समाप्तम्।
(प्रणम्य ततः निर्गतवान्)
अर्जुनः स्वस्य योग्यतायाः अपर्याप्तताविषये मनसि एव खेदम् अनुभूतवान्।

एतस्मिन् सम्भाषणे स्थूलाक्षरैः दर्शितानि पदानि सन्नन्तरूपाणि सन्ति। अधः तेषां पदानां विग्रहं पश्यत अवगच्छत च -

सन्नन्तम्	विग्रहः	सन्नन्तम्	विग्रहः	सन्नन्तम्	विग्रहः
जिज्ञासा	ज्ञातुम् इच्छा	**शुश्रूषुः**	श्रोतुम् इच्छुः	**दित्सति**	दातुम् इच्छति
शुश्रूषते	श्रोतुम् इच्छति	**दिदृक्षा**	द्रष्टुम् इच्छा	**जिज्ञासन्ते**	ज्ञातुम् इच्छन्ति
पिपृच्छिषामि	प्रष्टुम् इच्छामि	**जिज्ञासुः**	ज्ञातुम् इच्छुः	**विवक्षामि**	वक्तुम् इच्छामि
स्वीचिकीर्षवः	स्वीकर्तुम् इच्छवः	**लिप्सवः**	लब्धुम् इच्छवः	**स्वीचिकीर्षति**	स्वीकर्तुम् इच्छति

अवधेयम्

- धातोः इच्छार्थे **सन्**-प्रत्ययः भवति। कृ-धातोः **'कर्तुम् इच्छति'** इत्यर्थे सन्प्रत्यये कृते **'चिकीर्षति'** इति रूपं सिद्धं भवति।
- **'कर्तुम् इच्छा'** इत्यर्थे **'चिकीर्षा'** इति, **'कर्तुम् इच्छुः'** इत्यर्थे **'चिकीर्षुः'** इति रूपं भवति।
- **'चिकीर्षति'** इति क्रियापदम्, परन्तु **'चिकीर्षा, चिकीर्षुः'** इति च नामपदं भवति।
- सन्नन्तशब्दानां रूपाणि पुंलिङ्गे गुरुशब्दवत् स्त्रीलिङ्गे धेनुशब्दवत् एवञ्च नपुंसकलिङ्गे मधुशब्दवत् भवन्ति।
- सन्नन्तशब्दानां नपुंसकलिङ्गे प्रयोगः अत्यल्पः दृश्यते।
- सन्नन्तशब्दानां प्रयोगः विशेषणवत् अपि भवति। अतः **'सा कार्यं चिकीर्षुः अस्ति'**। अथवा **'सः कार्यं चिकीर्षुः अस्ति'**। इति एतादृशवाक्येषु कर्तृपदं दृष्ट्वा लिङ्गनिर्णयः करणीयः भवति।

सन्नन्तानां लट्लकारे रूपाणि एवं भवन्ति -

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	चिकीर्षति	चिकीर्षतः	चिकीर्षन्ति
मध्यमपुरुषः	चिकीर्षसि	चिकीर्षथः	चिकीर्षथ
उत्तमपुरुषः	चिकीर्षामि	चिकीर्षावः	चिकीर्षामः

एतानि पदानि सम्यक् परिशीलयत -

धातुः	तुमुन्नन्ताः	इच्छति	इच्छा	इच्छुः
पठ्	पठितुम्	पिपठिषति	पिपठिषा	पिपठिषुः
कृ	कर्तुम्	चिकीर्षति	चिकीर्षा	चिकीर्षुः
मुच्	मोक्तुम्	मुमुक्षति	मुमुक्षा	मुमुक्षुः
वद्	वदितुम्	विवदिषति	विवदिषा	विवदिषुः
वच्	वक्तुम्	विवक्षति	विवक्षा	विवक्षुः
पा	पातुम्	पिपासति	पिपासा	पिपासुः
दा	दातुम्	दित्सति	दित्सा	दित्सुः
जि	जेतुम्	जिगीषति	जिगीषा	जिगीषुः
युध्	योद्धुम्	युयुत्सति	युयुत्सा	युयुत्सुः
लभ्	लब्धुम्	लिप्सति	लिप्सा	लिप्सुः
ज्ञा	ज्ञातुम्	जिज्ञासते	जिज्ञासा	जिज्ञासुः
श्रु	श्रोतुम्	शुश्रूषते	शुश्रूषा	शुश्रूषुः
दृश्	द्रष्टुम्	दिदृक्षते	दिदृक्षा	दिदृक्षुः
वन्द्	वन्दितुम्	विवन्दिषते	विवन्दिषा	विवन्दिषुः
वृध्	वर्धितुम्	विवर्धिषते	विवर्धिषा	विवर्धिषुः
हा	हातुम्	जिहासते	जिहासा	जिहासुः
भुज्	भोक्तुम्	बुभुक्षते	बुभुक्षा	बुभुक्षुः
साध्	साधयितुम्	सिषाधयिषति	सिषाधयिषा	सिषाधयिषुः
तॄ	तरितुम्	तितीर्षति	तितीर्षा	तितीर्षुः

नृत्	नर्तितुम्	निनर्तिषति	निनर्तिषा	निनर्तिषुः
शुच्	शोचितुम्	शुशोचिषति	शुशोचिषा	शुशोचिषुः
आ + रुह्	आरोढुम्	आरुरुक्षति	आरुरुक्षा	आरुरुक्षुः
रक्ष्	रक्षितुम्	रिरक्षिषति	रिरक्षिषा	रिरक्षिषुः
लिख्	लेखितुम्	लिलेखिषति	लिलेखिषा	लिलेखिषुः
चल्	चलितुम्	चिचलिषति	चिचलिषा	चिचलिषुः
तिज्	तितिक्षितुम्	तितिक्षते	तितिक्षा	तितिक्षुः
प्र+आप्	प्राप्तुम्	प्रेप्सति	प्रेप्सा	प्रेप्सुः
नि+ध्यै	निध्यातुम्	निदिध्यासति	निदिध्यासा	निदिध्यासुः
जीव्	जीवितुम्	जिजीविषति	जिजीविषा	जिजीविषुः
हन्	हन्तुम्	जिघांसति	जिघांसा	जिघांसुः
सर्ज	स्रष्टुम्	सिसृक्षति	सिसृक्षा	सिसृक्षुः
उप+दिश	उपदेष्टुम्	उपदिदिक्षति	उपदिदिक्षा	उपदिदिक्षुः
नी	नेतुम्	निनीषति	निनीषा	निनीषुः
गुप्	गोपितुम्	जुगुप्सते	जुगुप्सा	जुगुप्सुः
क्रीड्	क्रीडितुम्	चिक्रीडिषति	चिक्रीडिषा	चिक्रीडिषुः

पुरुषः	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्रथमपुरुषः	जिज्ञासते	जिज्ञासेते	जिज्ञासन्ते
मध्यमपुरुषः	जिज्ञाससे	जिज्ञासेथे	जिज्ञासध्वे
उत्तमपुरुषः	जिज्ञासे	जिज्ञासावहे	जिज्ञासामहे

अभ्यासः

१. पाठं पठित्वा अधः लिखितानां प्रश्नानाम् उत्तराणि लिखत -

१. अर्जुनस्य का जिज्ञासा आसीत् ?

-- ।

२. कर्णस्य के गुणाः कृष्णेन कथिताः ?

-- ।

३. कृष्णः किम् असृजत् ?

--- ।

४. अर्जुनः लज्जया शिरः अवनमय्य किमर्थम् अतिष्ठत् ?

--- ।

५. पङ्क्तौ स्थितान् जनान् उद्दिश्य कर्णः किम् अवदत् ?

--- ।

६. अन्ते अर्जुनः कस्मिन् विषये खेदम् अनुभूतवान् ?

--- ।

२. यथोदाहरणं वाक्यानि परिवर्तयत -

यथा - अर्जुनः कृष्णस्य ऐश्वरं रूपं द्रष्टुम् इच्छति ।

अर्जुनः कृष्णस्य ऐश्वरं रूपं दिदृक्षते ।

१. तथापि त्वं महाबाहो नैव **शोचितुम् इच्छसि** ।

--- ।

२. उत्तमावसरं कोऽपि **हातुं** न **इच्छति** ।

--- ।

३. भवन्तः गीताश्लोकान् **लेखितुम् इच्छन्ति** ।

--- ।

४. यूयं स्वग्रामं **गन्तुम् इच्छथ** ।

--- ।

५. भक्ताः देवं **वक्तुम् इच्छन्ति** ।

--- ।

६. सर्वेऽपि कृतस्य कर्मणः फलं **प्राप्तुम् इच्छन्ति** ।

--- ।

७. नववधूः गृहं **प्रवेष्टुम् इच्छति** ।

--- ।

८. कोऽपि कटुभाषणं **श्रोतुं** न **इच्छति** ।

--- ।

९. श्रीकृष्णः सम्भ्रमितम् अर्जुनं **बोधयितुम् इच्छति** ।

--- ।

१०. भवान् तां कथां किमर्थं **लेखितुम् इच्छति** ?

--- ।

११. माता पुत्रीं सम्भाषणशिबिरं **नेतुम् इच्छति** ।

-- ।

१२. भगवन्, अहम् आद्यं भवन्तं **विज्ञातुम् इच्छामि** । (श्रीमद्भग.११.३१)

-- ।

१३. यः कृष्णार्जुनसंवादम् **अध्येतुम् इच्छति** सः ज्ञानयज्ञेन भगवन्तमेव यक्ष्यति ।

-- ।

१४. देवाः अपि भगवतः विश्वरूपं **द्रष्टुम् इच्छन्ति** ।

-- ।

१५. अर्जुन, त्वम् अभ्यासयोगेन मां **प्राप्तुम् इच्छ** । (श्रीमद्भग.१२.९)

-- ।

१६. यदि त्वं कृत्स्नं जगत् मम देहे **द्रष्टुम् इच्छसि** तर्हि दिव्यं चक्षुः ते ददामि । (श्रीमद्भग.११.७)

-- ।

१७. भगवन्, अहं किरीटिनं गदिनं चक्रहस्तं त्वां **द्रष्टुम् इच्छामि** । (श्रीमद्भग.११.४६)

-- ।

> **मुमुक्षुः, दिदृक्षुः** इत्येतादृशानां प्रयोगे कर्मपदात् द्वितीयाविभक्तिः भवति ।
>
> **यथा -** जलं **पिपासुः** बालः तिष्ठति ।
>
> प्रियं **चिकीर्षवः** जनाः सम्यक् उपदिशन्ति ।
>
> | | | | |
> |---|---|---|---|
> | जलस्य पिपासुः । | (✗) | जलं पिपासुः । | (✓) |
> | संस्कृतस्य जिज्ञासवः । | (✗) | संस्कृतं जिज्ञासवः । | (✓) |

३. अधः लिखितं विग्रहवाक्यम् उचितेन सन्नन्तपदेन सह योजयत -

यथा - लेखितुम् इच्छति = लिलेखिषति

१. **लेखितुम् इच्छति**	उपदिदिक्षा
२. ज्ञातुम् इच्छुः	बिभाषिषुः
३. नर्तितुम् इच्छा	**लिलेखिषति**
४. उपदेष्टुम् इच्छा	निनर्तिषा
५. आप्तुम् इच्छा	जिज्ञासुः
६. भाषितुम् इच्छुः	जिगासति
७. गातुम् इच्छति	ईप्सा
८. निध्यातुम् इच्छा	बुबोधयिषा

९. वर्धितुम् इच्छति	निदिध्यासा
१०. बोधयितुम् इच्छा	विवर्धिषते

४. यथोदाहरणम् अधः लिखितानां सन्नन्तपदानां रूपाणि निर्देशानुसारं लिखत -

	सन्नन्तपदम्	विभक्तिः - वचनम्	रूपम्
यथा -	पिपठिषुः	प्रथमा - बहुवचनम्	पिपठिषवः
	१. सिषाधयिषुः	प्रथमा - बहुवचनम्	----------------------
	२. चिकीर्षा	द्वितीया - एकवचनम्	----------------------
	३. तितीर्षुः	द्वितीया - बहुवचनम्	----------------------
	४. मुमुक्षा	तृतीया - एकवचनम्	----------------------
	५. आरुरुक्षुः	पञ्चमी - बहुवचनम्	----------------------
	६. विवक्षुः	पञ्चमी - एकवचनम्	----------------------
	७. मीमांसा	तृतीया - बहुवचनम्	----------------------
	८. पिपासुः	षष्ठी - एकवचनम्	----------------------
	९. तितिक्षुः	पञ्चमी - बहुवचनम्	----------------------
	१०. दित्सा	सप्तमी - एकवचनम्	----------------------
	११. प्रेप्सुः	सप्तमी - बहुवचनम्	----------------------
	१२. जिगीषुः	प्रथमा - एकवचनम्	----------------------
	१३. निदिध्यासुः	द्वितीया - बहुवचनम्	----------------------
	१४. युयुत्सा	द्वितीया - एकवचनम्	----------------------
	१५. जिजीविषुः	तृतीया - बहुवचनम्	----------------------
	१६. जिज्ञासुः	चतुर्थी - एकवचनम्	----------------------
	१७. दिदृक्षा	षष्ठी - एकवचनम्	----------------------
	१८. शुश्रूषुः	पञ्चमी - एकवचनम्	----------------------
	१९. विवन्दिषा	सप्तमी - एकवचनम्	----------------------
	२०. ईप्सा	सप्तमी - बहुवचनम्	----------------------

५. कोष्ठके दत्तानां धातूनां सन्नन्तरूपाणि रिक्तस्थानेषु लिखत -

१. कुरुक्षेत्रे के समवेताः इति धृतराष्ट्रः ------------------------------ आसीत्। (ज्ञातुम् इच्छुः)

२. सञ्जयः कुरुक्षेत्रे किं घटितम् इति ------------------------------ आसीत्। (वदितुम् इच्छुः)

३. अर्जुनः कृष्णं स्वविषादं -- आसीत्। (वक्तुम् इच्छुः)

४. अर्जुनः उभयोः सेनयोः मध्ये योद्धुकामान् --------------------- आसीत्। (द्रष्टुम् इच्छुः)

५. योगयुक्तात्मा सर्वत्र समानं दर्शनं ------------------------------ भवति। (कर्तुम् इच्छुः)

६. दुर्योधनः पाण्डवान् --- आसीत्। (जेतुम् इच्छुः)
७. अर्जुनः श्रीकृष्णात् दिव्यं ज्ञानं ---------------------------------- आसीत्। (लब्धुम् इच्छुः)
८. अर्जुनः विजयं राज्यं सुखानि च न ------------------------------ आसीत्। (प्राप्तुम् इच्छुः)
९. अर्जुनः स्वजनान् हत्वा ------------------------------------- न आसीत्। (जीवितुम् इच्छुः)

६. **एतानि लट्लकारस्य प्रयोगसहितानि वाक्यानि सन्नन्तप्रयोगसहितवाक्यत्वेन परिवर्तयत -**

प्रत्येकमपि जनस्य मनसि काचित् इच्छा तु भवति एव । यथा कदाचित् कश्चन मधुरं (**खादितुम् इच्छति**) ---------------- । अपरः च पेयं (**पातुम् इच्छति**) -------------- । तथापि मनुष्यस्य इच्छा कदापि न समाप्यते । यदि कस्यचित् समीपे द्विचक्रिका अस्ति तर्हि अतृप्तः सः कारयानं (**क्रेतुम् इच्छति**) । प्रासादे निवसन् धनिकः अपि स्वव्यवसायं (**वर्धयितुम् इच्छति**), विदेशे (**प्रसारयितुं वा इच्छति**) ---------------- एव । निर्धनस्तु प्रतिदिनं भोजनं (**प्राप्तुम् इच्छति**) ------------- । इच्छानुगुणम् एव सर्वे कार्याणि (**कर्तुम् इच्छन्ति**) -------------- । तथापि जीवने सर्वदा तादृशम् आचरणं न योग्यम् । धर्ममार्गेण चरद्भिः अस्माभिः कर्तव्यानि न विस्मरणीयानि । यथा सज्जनाः निरपेक्षतया समाजं सन्मार्गं (**बोधयितुम् इच्छन्ति**) -------------------- । यथा प्रकृतिः अस्मान् दानस्य माहात्म्यं (**सूचयितुम् इच्छति**) ----------------, तथैव अस्मान् परितः विद्यमानं चराचरम् अस्मभ्यं कं सन्देशं (**दातुम् इच्छति**) इति ज्ञात्वा वयम् आचरणं कुर्मः । तेन अस्माकं मनस्सु प्रतिदिनं वर्धमानाः इच्छाः उत्तमदिशि परिवर्तिताः भवेयुः । येन च अस्माकम् अपि आचरणं सज्जनाचरणवत् भवेत् ।

७. **अधः कर्तृपदानि दत्तानि सन्ति । प्रत्येकं जनस्य इच्छानुगुणं सन्नन्तरूपाणि योजयित्वा यथोदहरणं वाक्यानि लिखत -**

छात्रस्य → पठितुम् / ज्ञातुम् / प्रष्टुम् → इच्छा अस्ति ।

शिक्षकस्य → श्रोतुम् / उपदेष्टुम् / पाठयितुम् → इच्छा अस्ति ।

वैद्यस्य → उपकर्तुम् / वक्तुम् / लेखितुम् → इच्छा अस्ति ।

अधिकारिणः → साधयितुम् / दातुम् / गन्तुम् → इच्छा अस्ति ।

साधोः → निध्यातुम् / जेतुम् / मोक्तुम् → इच्छा अस्ति ।

सैनिकस्य → हन्तुम् / योद्धुम् / प्राप्तुम् → इच्छा अस्ति ।

यथा - छात्रस्य <u>पिपठिषा</u> अस्ति ।

१. छात्रस्य ------------------------ अस्ति ।
२. छात्रस्य ------------------------ अस्ति ।
३. शिक्षकस्य --------------------- अस्ति ।
४. शिक्षकस्य ---------------------- अस्ति ।
५. शिक्षकस्य ---------------------- अस्ति ।
६. वैद्यस्य ------------------------ अस्ति ।
७. वैद्यस्य ------------------------ अस्ति ।
८. वैद्यस्य ------------------------ अस्ति ।
९. अधिकारिणः -------------------- अस्ति ।
१०. अधिकारिणः -------------------- अस्ति ।
११. अधिकारिणः -------------------- अस्ति ।
१२. साधोः -------------------------- अस्ति ।
१३. साधोः -------------------------- अस्ति ।
१४. साधोः -------------------------- अस्ति ।
१५. सैनिकस्य ---------------------- अस्ति ।
१६. सैनिकस्य ---------------------- अस्ति ।
१७. सैनिकस्य ---------------------- अस्ति ।

स्वाभ्यासः

१. पाठे आगतानि सन्नन्तपदसहितानि वाक्यानि पुनः लिखत -

यथा - अस्मिन् संसारे कः महादाता अस्ति इति अहं <u>जिज्ञासुः</u> अस्मि ।

१. -- ।
२. -- ।
३. -- ।
४. -- ।
५. -- ।
६. -- ।
७. -- ।
८. -- ।

****

धर्मग्रन्थेषु गीता विशिष्टतमा

तरप्-तमप्-इष्ठन्-ईयसुन्-प्रत्ययाः

२०

एतत् कथानकं सावधानं पठत -

श्रीमद्भगवद्गीतायां ये विषयाः समुपवर्णिताः तेषु कर्मयोगः इति **महत्तमः** विषयः वर्तते । लोकमान्यः तिलकवर्यः तु 'गीतारहस्ये' गीता कर्मपरा एव मन्तव्या इति प्रतिपादितवान् । तदनुगुणम् एव सः सर्वेषाम् अध्यायानां व्याख्यानं कृतवान् । सर्वेषु धर्मग्रन्थेषु गीता **विशिष्टतमा** इति तस्य मतम् ।

भगवद्गीतायाः कर्मसङ्कल्पना नाम का ? इति प्रश्नस्य उत्तरं तत्रैव केषुचित् अध्यायेषु पठितुं शक्नुमः । तृतीयचतुर्थाध्याययोः तृतीयाध्यायः कर्मज्ञानाय **उपयुक्ततरः** । अतः तदाधारेण एव साररूपेण किञ्चित् लिख्यते अत्र ।

अस्मिन् लोके जनानां निष्ठा द्विविधा भवति ज्ञानयोगविषयिणी कर्मयोगविषयिणी च इति । तयोः कतरा **ज्यायसी** इति प्रश्ने सति 'ज्ञानयोगकर्मयोगयोः कर्मयोगः **ज्यायान्** भवति' इति भगवान् कथयति । यतो हि कश्चित् जनः कदापि अकर्मकृत्, नाम किमपि कर्म अकुर्वन् स्थातुं न शक्नोति । प्रतिक्षणं तेन चिन्तनम्, उपवेशनं, चलनं वा किमपि तु करणीयं भवत्येव । अकर्मणः कर्म **ज्यायः** भवतीति कारणेन अस्माभिः सर्वैरपि नियतं कर्म करणीयम् । तेन एव अस्माकं शरीरयात्रा सफला भविष्यति । तदर्थमेव 'कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ।' इत्यादिभिः वचनैः श्रीकृष्णः अर्जुनं कर्म कर्तुं प्रचोदयति ।

जनकादयः परमज्ञानिनः कर्मणैव संसिद्धिं प्राप्तवन्तः इति वयं जानीमः । तथैव भगवता कर्तव्यम्, आप्तव्यम्, अनवाप्तव्यं वा किमपि नास्ति चेदपि सोऽपि सर्वदा कार्यरतः भवत्येव । तस्य वर्त्मना गच्छन्तः वयमपि ततः प्रेरणां प्राप्य तम् अनुसरामः । अतः कर्माकर्मणोः कर्म **गरीयः** भवतीति विज्ञाय अस्माभिः कर्म करणीयम् एव ।

पाठे स्थूलाक्षरैः दर्शितानि पदानि 'तरप्-तमप्'प्रत्ययान्तानि 'ईयसुन्-इष्ठन्'प्रत्ययान्तानि वा सन्ति ।

अवधेयम्

'तरप्-तमप्'प्रत्ययौ अतिशयार्थं दर्शयतः । द्वयोः एकस्मिन् अतिशयं दर्शयितुं **'तरप्'**प्रत्ययस्य प्रयोगः क्रियते । बहूनाम् एकस्मिन् अतिशयं दर्शयितुं **'तमप्'** - प्रत्ययस्य प्रयोगः क्रियते । एतौ प्रत्ययौ प्रातिपदिकस्य अन्ते योज्येते ।

➢ **'तरप्-तमप्'**प्रत्ययान्तशब्दानां रूपाणि पुंलिङ्गे **रामशब्दवत्**, स्त्रीलिङ्गे **मालाशब्दवत्**, नपुंसकलिङ्गे **ज्ञानशब्दवत्** च भवन्ति । सर्वासु विभक्तिषु तेषां प्रयोगः भवति ।

	प्रातिपदिकम्		'तरप्'प्रत्ययान्तम्	'तमप्'प्रत्ययान्तम्
यथा -	**उन्नत**	**(पुं.)**	**उन्नततरः**	**उन्नततमः**
	स्थूल	**(पुं.)**	**स्थूलतरः**	**स्थूलतमः**

दीर्घ	(पुं.)	**दीर्घतरः**	**दीर्घतमः**
प्राचीना	(स्त्री.)	**प्राचीनतरा**	**प्राचीनतमा**
विशाला	(स्त्री.)	**विशालतरा**	**विशालतमा**
विरला	(स्त्री.)	**विरलतरा**	**विरलतमा**
सुन्दर	(नपुं.)	**सुन्दरतरम्**	**सुन्दरतमम्**
कृश	(नपुं.)	**कृशतरम्**	**कृशतमम्**
महत्	(नपुं.)	**महत्तरम्**	**महत्तमम्**
पर	(नपुं.)	**परतरम्**	**परतमम्**

एतानि उदाहरणानि परिशीलयत -

हस्ते पञ्च अङ्गुल्यः भवन्ति। तेषु मध्यमा **दीर्घतमा** कनिष्ठिका च **लघुतमा** भवति। तथापि अङ्गुष्ठः **सहायकतमः** भवति।

➢ **'तरप्-तमप्'**प्रत्ययौ अतिशयार्थं दर्शयतः। अतः तदन्तः शब्दः विशेषणं भवति। तस्मात् सः विशेषण-विशेष्यनियमवशात् विशेष्यस्य लिङ्गं वचनं विभक्तिं च अनुसरति। यथा -

एकवचने प्रयोगः

जनेषु दाता **विरलतमः** भवति।	(पुंलिङ्गम्, एकवचनम्)
संस्कृतभाषा सर्वासु भाषासु **प्राचीनतमा**।	(स्त्रीलिङ्गम्, एकवचनम्)
हिमालयस्य **उन्नततमं** शिखरम्।	(नपुंसकलिङ्गम्, एकवचनम्)

द्विवचने प्रयोगः

वैद्येषु अश्विनीकुमारौ **प्राचीनतमौ**।	(पुंलिङ्गम्, द्विवचनम्)
कालस्य शुक्लकृष्णे गती **शाश्वततमे** मते।	(स्त्रीलिङ्गम्, द्विवचनम्)

माता **गुरुतरा** भूमेः खात् पि**तोच्चतर**स्तथा। (उच्चतरः)
मनः **शीघ्रतरं** वातात् चिन्ता बहुतरी तृणात्॥ (महाभारतम् - यक्षप्रश्नः)

अभ्यासः

१. यथोदाहरणं कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत -

यथा - दशरथस्य पत्नीषु कैकेयी प्रियतमा। (प्रियतरा, प्रियतमा)

१. सर्वेषु अध्यायेषु एकादशाध्याये वर्णितं भगवतः स्वरूपं ------------- अस्ति। (विराट्तरम्/विराट्तमम्)
२. चन्द्रसूर्ययोः सूर्यः ---------------------। (प्रखरतमः/प्रखरतरः)
३. व्यासवाल्मीक्योः वाल्मीकिः -------------------------। (प्राचीनतरः/प्राचीनतमः)
४. वैद्यकीयशास्त्रेषु आयुर्वेदः ------------------------ शास्त्रम्। (पुरातनतमं/पुरातनतरम्)

५. प्राणिषु कच्छपस्य पृष्ठभागः -------------------- भवति। (कठिनतरः/कठिनतमः)
६. उष्ट्रपक्षिणः अण्डम् अण्डेषु -------------------- भवति। (विशालतमं/विशालतरम्)
७. वस्त्रेषु शाटिका -------------------- । (दीर्घतमा/दीर्घतरा)
८. आङ्ग्लमासेषु फरवरीमासः -------------- भवति। (लघुतरः/लघुतमः)
९. योगिषु यः श्रद्धावान् मद्गतेनान्तरात्मना भजते सः ------ भवति। (युक्ततरः/युक्ततमः)
१०. गीतायाः अष्टादशः अध्यायः --------------- वर्तते। (बृहत्तमः/बृहत्तरः)
११. गीतायाः प्रथम-द्वितीयाध्याययोः प्रथमाध्यायः ----------- अस्ति। (लघुतरः/लघुतमः)
१२. कौरवेषु पितामहः भीष्मः ------------- आसीत्। (वृद्धतरः/वृद्धतमः)
१३. भीमार्जुनयोः भीमः ------------- अस्ति। (दृढतरः/दृढतमः)

'मतुप्'प्रत्ययान्तानां योगे 'तरप्-तमप्'प्रत्ययौ

'तरप्-तमप्'प्रत्ययौ बलवत्, गुणवत्, बुद्धिमत् इत्यादीनाम् अन्ते अपि प्रयुज्येते।

	प्रातिपदिकम्	तरप्-प्रत्ययान्तं प्रातिपदिकम्	तमप्-प्रत्ययान्तं प्रातिपदिकम्
यथा -	बलवत्	बलवत्तर	बलवत्तम
	गुणवत्	गुणवत्तर	गुणवत्तम
	रूपवत्	रूपवत्तर	रूपवत्तम
	बुद्धिमत्	बुद्धिमत्तर	बुद्धिमत्तम
	धीमत्	धीमत्तर	धीमत्तम
	शक्तिमत्	शक्तिमत्तर	शक्तिमत्तम

२. तालिकायां प्रातिपदिकानां तरप्-तमप्-प्रत्ययान्तानि रूपाणि निर्दिष्टलिङ्गेषु लिखत -

प्रातिपदिकम्	'तरप्'प्रत्ययान्तम्	'तमप्'प्रत्ययान्तम्
१. वीर्यवत् (पुं.)		
२. प्रतापवत् (नपुं.)		
३. मेधावत् (पुं.)		
४. रूपवान् (पुं)		
५. ध्येयवत् (नपुं.)		
६. धीमत् (पुं.)		
७. श्रद्धावत् (पुं.)		

८. ज्ञानवत् (पुं.)		
९. करुणावत् (पुं.)		
१०. धनुष्मत् (नपुं.)		

एतानि उदाहरणानि परिशीलयत -

१. योद्धृषु रामः **शस्त्रभृत्तमः**। २. सुदामा कृष्णस्य **सुहृत्तमः** आसीत्।
३. मेनकाशकुन्तलयोः शकुन्तला **रूपवत्तरा** आसीत्। ४. विदुषीषु उभयभारती **धीमत्तमा** आसीत्।
५. पाण्डवेषु युधिष्ठिरः **नीतिमत्तमः** आसीत्।

३. यथोदाहरणं कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत -

१. महाभारतपात्रेषु कृष्णस्य चरित्रं ------------------- । (गुणवत्तमम्, गुणवत्तरम्)
२. आचार्येषु आद्यशङ्कराचार्यः ---------------------- । (विद्वत्तमः, विद्वत्तरः)
३. बहूनां जन्मनाम् अन्ते --------------- भगवन्तं प्रपद्यते। (ज्ञानवत्तरः, ज्ञानवत्तमः)
४. सरित्समुद्रयोः समुद्रः -------------------- भवति। (महत्तरः, महत्तमः)
५. श्रीकृष्णः पुरुषेषु उत्तमः इति कारणेन सः ------------- इत्यपि वक्तुं शक्नुमः। (देहभृत्तमः, देहभृत्तरः)
६. हनुमद्भीमयोः हनुमान् ------------------ आसीत्। (शक्तिमत्तरः, शक्तिमत्तमः)
७. फलेषु नारिकेलफलं ------------------ । (रसवत्तमम्, रसवत्तरम्)
८. बहवः भक्ताः भगवन्तं पर्युपासते। तेषु के --------------- ? (योगवित्तराः, योगवित्तमाः)
९. श्रद्धधानाः भक्ताः भगवतः ------------------ भवन्ति। (प्रियतमाः, प्रियतराः)
१०. कृष्णः अर्जुनाय ------------------ शास्त्रम् उपादिशत्। (गुह्यतमम्, गुह्यतरम्)

४. भगवद्गीतायां प्रयुक्तानाम् एतेषां शब्दानां निर्दिष्टानि रूपाणि यथोदाहरणं लिखत -

	प्रातिपदिकम्	एकवचनम्	द्विवचनम्	बहुवचनम्
१.	**पुरुषोत्तम (पुं., प्रथमा) (श्रीमद्भग.१५.१८)**	**पुरुषोत्तमः**	**पुरुषोत्तमौ**	**पुरुषोत्तमाः**
२.	प्रियतर (पुं., द्वितीया) (श्रीमद्भग.१८.६९)			
३.	द्विजोत्तम (पुं., तृतीया) (श्रीमद्भग.१.७)			
४.	रथोत्तम (पुं.,चतुर्थी) (श्रीमद्भग.१.२४)			
५.	कुरुसत्तम (पुं.,पञ्चमी) (श्रीमद्भग.४.३१)			
६.	पापकृत्तम (पुं.,षष्ठी) (श्रीमद्भग.४.३६)			
७.	युक्ततम (पुं.,सप्तमी) (श्रीमद्भग.६.४७)			

८.	अनुत्तम (स्त्री.,तृतीया) (श्रीमद्भग.७.१८)			
९.	गुह्यतम (नपुं. चतुर्थी) (श्रीमद्भग. ९.१)			
१०.	प्रियकृत्तम (पुं.,पञ्चमी) (श्रीमद्भग. १८.६९)			

५. यथोदाहरणं कोष्ठके दत्तानां पदानाम् उचितेन रूपेण रिक्तस्थानानि पूरयत -

यथा - अश्वत्थामार्जुनयोः अर्जुनः --------------------- अस्ति। (धनुर्धरतरः, धनुर्धरतमः)

१. अङ्कनीलेखन्योः लेखनी ---------------------- भवति। (दृढतरा, दृढतमा)

२. जलतुहिनयोः तुहिनं ---------------------------- भवति। (शीतलतमं, शीतलतरम्)

३. अष्टादशपुराणेषु भागवतपुराणं ----------------------- । (प्रसिद्धतरं, प्रसिद्धतमम्)

४. दीपेषु दण्डदीपः ----------------------- । (दीर्घतरः, दीर्घतमः)

५. अस्माकं वैदिकधर्मः ----------------------- अस्ति। (सनातनतरः, सनातनतमः)

६. याचकस्य अपेक्षया दाता ------------------- भवति। (निःस्पृहतरः, निःस्पृहतमः)

७. महासागरेषु प्रशान्तमहासागरः ----------------- वर्तते। (विशालतरः, विशालतमः)

८. द्वीपेषु एशियाद्वीपः ------------------- विद्यते। (बृहत्तरः, बृहत्तमः)

९. दर्शनेषु अद्वैतदर्शनस्य स्थानं ------------------ अस्ति। (विशिष्टतरं, विशिष्टतमम्)

१०. श्रवणम् इति भाषापठनस्य माध्यमेषु ----------------- माध्यमं वर्तते। (सरलतरम्,सरलतमम्)

११. महाभारतस्थासु गीतासु भगवद्गीता----------------- भवति। (प्रशस्ततरा, प्रशस्ततमा)

१२. कर्मसंन्यासकर्मयोगयोः कर्मयोगः----------------- भवति। (विशिष्टतरः, विशिष्टतमः)

१३. सञ्जयः केशवार्जुनयोः ---------------- संवादं श्रुतवान्। (पुण्यतरम्, पुण्यतमम्)

१४. भगवता अर्जुनाय गुह्यात् ------------- शास्त्रम् आख्यातम्। (गुह्यतमम्, गुह्यतरम्)

६. तत्तत्सङ्ख्याकं गीताश्लोकं पठित्वा यथोदाहरणं पङ्क्त्यर्धं मेलयत -

अ	ब	
यथा -१. श्रद्धावान् भजते यो मां	तन्मे क्षेमतरं भवेत्।	(श्रीमद्भग.१.४६)
२. ये चाप्यक्षरमव्यक्तं	गुह्यात् गुह्यतरं मया।	(श्रीमद्भग.१८.६३)
३. श्रद्धया परयोपेतास्ते	अन्यः प्रियतरो भुवि।	(श्रीमद्भग.१८. ६९)
४. इति गुह्यतमं शास्त्रम्	**स मे युक्ततमो मतः।**	**(श्रीमद्भग.६.४७)**
५. भविता न च मे तस्मात्	इदमुक्तं मयानघ।	(श्रीमद्भग.१५.२०)
६. धार्तराष्ट्रा रणे हन्युः	तेषां के योगवित्तमाः।	(श्रीमद्भग.१२.१)
७. श्रेयो भोक्तुं	मे युक्ततमा मताः।	(श्रीमद्भग.१२.२)
८. निन्दन्तस्तव सामर्थ्यं	शृणु मे परमं वचः।	(श्रीमद्भग.१८. ६४)

९. इति ते ज्ञानमाख्यातं भैक्ष्यमपीह लोके। (श्रीमद्भग.२.५)
१०. सर्वगुह्यतमं भूयः ततो दुःखतरं नु किम् ? (श्रीमद्भग.२.३६)

अव्ययानां योगे 'तरप्-तमप्'प्रत्ययौ

पर, क्षिप्र, पृथक्, सत्, उत्, कृत्स्न, शीघ्र, अति, उच्च, नीच इत्यादिभिः अव्ययैः सह अपि **'तरप्-तमप्'**प्रत्यययोः प्रयोगः क्रियते। तस्मात् **परतर, उत्तम** इत्यादीनि रूपाणि निर्मीयन्ते। यथा -
मत्तः **परतरं** नान्यत् किञ्चिदस्ति धनञ्जय। (श्रीमद्भग.७.७) मामेवा**नुत्तमां** गतिम्। (श्रीमद्भग.७.१८)

७. यथोदाहरणम् अव्ययानां 'तरप्-तमप्'प्रत्ययान्तानि रूपाणि निर्देशानुसारं लिखत -

	प्रातिपदिकम्	तरप्-प्रत्ययान्तम्	तमप्-प्रत्ययान्तम्
	यथा - पर (पुं.)	**परतरः**	**परतमः**
१.	क्षिप्र (स्त्री.)		
२.	पृथक् (नपुं.)		
३.	सत् (पुं.)		
४.	उत् (स्त्री.)		
५.	शीघ्र (नपुं.)		
६.	उच्च (स्त्री.)		
७.	नीच (नपुं.)		
८.	अधिक (पुं)		
९.	न्यून (स्त्री.)		
१०.	द्रुत (स्त्री.)		
११.	वर (नपुं)		
१२.	चिर (पुं.)		

८. मञ्जूषास्थेषु अव्ययेषु 'तरप्-तमप्'प्रत्यययोः एकतरं योजयित्वा उचितपदं चित्वा च यथोदाहरणं रिक्तस्थानानि पूरयत -

पर, पृथक्, पुरुष+उत्, शीघ्र, अति, अधिक, सुष्ठु

यथा - **पञ्चषट्संख्ययोः षट्सङ्ख्या <u>परतरा</u> ।**

१. गजहरिणयोः हरिणः ------------------------------ धावति ।

२. पक्षिणां रवेषु मयूरस्य केकारवः -------------------------------- वर्तते ।

३. ------------------------- इति कृष्णस्य अन्यत् संबोधनम् अस्ति ।

४. कविषु आशुकविः -------------------------------- काव्यं रचयति ।

५. पीनसज्वरयोः ज्वरस्य तीव्रता --------------------- भवति ।

६. ग्रीष्मकाले तापमानं ----------------------------- भवति ।

एतां कथां सावधानं पठत -

वार्तापत्रे प्रकाशितं कस्यचित् बालकस्य छायाचित्रं बहूनां मनः आकर्षत् । तस्य नाम गोविन्दः । दशमकक्ष्यायां विशेषप्रावीण्यं प्राप्तवत्सु छात्रेषु सः **अन्यतमः** आसीत् इति प्रथमदिनस्य वार्तया ज्ञातम् । द्वितीयदिनस्य वार्तापत्रे तेषु केषाञ्चन छात्राणां साक्षात्कारः प्रकाशितः आसीत् । तत्र गोविन्दस्य विषये लिखितम् आसीत् यत्, तस्य पिता भारवाहकः अस्ति । रेलस्थानस्य समीपे कस्याञ्चित् **लघुतरायां** वसतौ तयोः वासः अवर्तत इति । चतुर्षु भ्रातृषु **कनिष्ठः** सः **कठिनतमायां** परिस्थितौ अपि सम्यक् पठित्वा नवीनम् आदर्शम् उपस्थापितवान् । पत्रकारेण पृष्टे सति, "अहम् अग्रे पठितुं न शक्नोमि । कारणम् अस्माकं ग्रामे महाविद्यालयः नास्ति । अन्यत्र स्थित्वा पठितुं नास्ति धनम्" इति सः कथितवान् । तत् पठित्वा काचित् **धनवत्तमा** महिला तस्य साहाय्यं कर्तुम् इष्टवती ।

साक्षात्कारस्य अधः लिखिते पत्रसङ्केते सा पत्रं प्रेषितवती । पत्रे प्राप्ते गोपालः तया **ज्येष्ठया** महिलया मेलितुं तस्याः कार्यालयं गतवान् । स्वस्य शिक्षणेच्छां प्रतिपादितवान् च । ततः सा समीपस्थे **उत्तमे** महाविद्यालये तस्य प्रवेशं कारयित्वा तस्मै पुस्तकादिनिमित्तम् अपेक्षितं धनं दत्तवती ।

ईयसुन्-इष्ठन्-प्रत्ययौ

एतानि वाक्यानि परिशीलयत -

१. कस्माच्च ते न नमेरन्महात्मन् **गरीयसे** ब्रह्मणोऽप्यादिकर्त्रे । (श्रीमद्भग.११.३७)

२. यद्यदाचरति **श्रेष्ठः** तत्तदेवेतरो जनः । (श्रीमद्भग.३.२१)

३. **श्रेयान्** स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं **श्रेयः** परधर्मो भयावहः ॥ (श्रीमद्भग.३.३५)

एतेषु वाक्येषु **'ईयसुन्-इष्ठन्'**प्रत्यययोः प्रयोगः कृतः अस्ति ।

'ईयसुन्-इष्ठन्'प्रत्ययौ अपि **'तरप्-तमप्'**प्रत्ययौ इव अतिशयार्थं बोधयतः । द्वयोः एकस्मिन् अतिशयं दर्शयितुम् **'ईयसुन्'** इति तथा च बहूनाम् एकस्मिन् अतिशयं दर्शयितुम् **'इष्ठन्'**प्रत्ययस्य प्रयोगः क्रियते । एतौ प्रत्ययौ प्रातिपदिकस्य अन्ते योज्येते । अतः **'ईयसुन्'**प्रत्ययान्तशब्दानां **'तरप्'** इति प्रत्ययान्तशब्दानां च अर्थः समानः भवति । तथैव **'इष्ठन्'**प्रत्ययान्तशब्दानां **'तमप्'**प्रत्ययान्तशब्दानां च अर्थः समानः भवति ।

प्रातिपदिकम्	'ईयसुन्'प्रत्ययान्तम्	'इष्ठन्'प्रत्ययान्तम्
बलिन्	बलीयस्	बलिष्ठ
गुरु	गरीयस्	गरिष्ठ
वृद्ध	ज्यायस्	ज्येष्ठ
युवन्	यवीयस्	यविष्ठ
युवन्	कनीयस्	कनिष्ठ
उरु	वरीयस्	वरिष्ठ
प्रशस्य	श्रेयस् / ज्यायस्	श्रेष्ठ / ज्येष्ठ
प्रिय	प्रेयस्	प्रेष्ठ

- 'ईयसुन्-इष्ठन्'प्रत्ययौ अतिशयार्थं दर्शयतः। अतः तदन्तं पदं विशेषणं भवति। तस्मात् सः विशेष्यस्य लिङ्गं वचनं विभक्तिं च अनुसरति। अतः सर्वासु विभक्तिषु तेषां प्रयोगः भवति।
- 'ईयसुन्'प्रत्ययान्तशब्दानां रूपाणि पुंलिङ्गे **विद्वस्-शब्दवत्**, स्त्रीलिङ्गे **नदी-शब्दवत्** नपुंसकलिङ्गे च **मनस्-शब्दवत्** भवन्ति।
- 'इष्ठन्'प्रत्ययान्तशब्दानां रूपाणि पुंलिङ्गे **रामशब्दवत्**, स्त्रीलिङ्गे **मालाशब्दवत्** नपुंसकलिङ्गे च **ज्ञानशब्दवत्** भवन्ति।

ईयसुन्-प्रत्ययान्तानां त्रिषु लिङ्गेषु वचनेषु च प्रथमाविभक्त्यन्तानि रूपाणि परिशीलयत -

प्रातिपदिकम्	एकवचनम्	द्विवचनम्	बहुवचनम्	लिङ्गम्
प्रशस्य	श्रेयान्	श्रेयांसौ	श्रेयांसः	पुंलिङ्गे
	श्रेयसी	श्रेयस्यौ	श्रेयस्यः	स्त्रीलिङ्गे
	श्रेयः	श्रेयसी	श्रेयांसि	नपुंसकलिङ्गे

९. तत्तत्सङ्ख्याकं गीताश्लोकं पठित्वा यथोदाहरणं रिक्तस्थानानि पूरयत -

१. त्वमस्य पूज्यश्च गुरुः **गरीयान्**। (श्रीमद्भग.११.४३)

२. --------------- चेत् कर्मणस्ते मता बुद्धिर्जनार्दन। (श्रीमद्भग.३.१)

३. नियतं कुरु कर्म त्वं कर्म --------------- ह्यकर्मणः। (श्रीमद्भग.३.८)

४. --------------- स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्। (श्रीमद्भग.३.३५)

५. यत् --------------- एतयोरेकं तन्मे ब्रूहि सुनिश्चितम्। (श्रीमद्भग.५.१)
६. न च --------------- अनुपश्यामि हत्वा स्वजनमाहवे। (श्रीमद्भग.१.३१)
७. स्वधर्मे निधनं --------------- परधर्मो भयावहः। (श्रीमद्भग.३.३५)

१०. मञ्जूषातः उचितं पदं चित्वा यथोदाहरणं वाक्यानि पूरयत -

बलीयसी, ज्यायः, **गरीयसी**, लघीयः, ज्यायान्, कनीयसीम्, बलीयान्, ज्यायसी

यथा - जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।

१. जयद्रथः कौरवाणां ---------------------- दुश्शलां परिणीतवान्।
२. अकर्मणः अपि कर्म एव ----------------------।
३. बलभद्रकृष्णयोः कः ---------------------- ?
४. बुद्धिकर्मणोः बुद्धिः ----------------------।
५. रामायणमहाभारतयोः रामायणं ----------------------।
६. सुयोधनवृकोदरयोःकः ---------------------- ?
७. --------------------- केवलमीश्वरेच्छा।

अवधेयम्

'तरप्-तमप्'प्रत्ययौ इव **'डतरच्-ड्तमच्'** इति प्रत्ययौ अपि भवतः। तयोः योजनेन **कतर, कतम, अन्यतर, अन्यतम** इति शब्दाः भवन्ति यथा - न चैतद्विद्मः **कतरन्नो** गरीयो यद्वा जयेम यदि वा नो जयेयुः।

- अर्थात् जयपराजययोः **कतरत्** गरीयः इति न जानीमः। (नपुंसकलिङ्गे)
- भवतोः **कतरः** धीमान् इति वदताम्। (पुंलिङ्गे)
- भवतीषु **कतमा** चटुला इति जानामि। (स्त्रीलिङ्गे)

११. यथोदाहरणं 'कतर-कतम'शब्दयो उचितानि रूपाणि प्रयुज्य रिक्तस्थानि पूरयत -

यथा - १. छात्रयोः कतरस्य क्रमाङ्कः द्वादश अस्ति ?
२. बालिकासु ------------------------------ बुद्धिमती ?
३. तयोः राघवः ------------------------------------ ?
४. तत्र स्थितेषु जनेषु नेता --------------------- अस्ति ?
५. पाण्डवेषु अर्जुनः --------------------------------- ?
६. श्रीकृष्णावतारः भगवतः नारायणस्य अवतारेषु ----------------- ?
७. तयोः --------------- अग्रजा इति कथं ज्ञातुं शक्यते ?

स्वाभ्यासः

कथायाम् आगतानां स्थूलाक्षरैः दर्शितानां पदानां प्रातिपदिकम्, वचनम्, प्रत्ययं विभक्तिं च यथोदाहरणं लिखत -

पदम्	प्रातिपदिकम्	वचनम्	प्रत्ययः	विभक्तिः
यथा - अन्यतमः	अन्य	एकवचनम्	तमप्	प्रथमा

****

उत्तराणि

पाठः - १

१. विना २. सदृशः ३. परम् ४. ऋते ५. सह ६. पूर्वम् ७. धिक्।

२. सर्वेषु रिक्तस्थानेषु 'ऋते' इति पदं योजनीयम्।

३. १. कूर्मावतारः वराहावतारात् पूर्वः। वराहावतारः कूर्मावतारात् परः। २. वराहावतारः नृसिंहावतारात् पूर्वः। नृसिंहावतारः वराहावतारात् परः। ३. नृसिंहावतारः वामनावतारात् पूर्वः। वामनावतारः नृसिंहावातारात् परः। ४. वामनावतारः परशुरामावतारात् पूर्वः। परशुरामावतारः वामनावतारात् परः। ५. परशुरामावतारः रामावतारात् पूर्वः। रामावतारः परशुरामावतारात् परः। ६. रामावतारः कृष्णावतारात् पूर्वः। कृष्णावतारः रामावतारात् परः। ७. कृष्णावतारः बुद्धावतारात् पूर्वः। बुद्धावतारः कृष्णावतारात् परः। ८. बुद्धावतारः कल्कि-अवतारात् पूर्वः। कल्कि-अवतारः बुद्धावतारात् परः।

४. १. धिक् अहङ्कारिणम्। २. धिक् मूर्खम्। ३. धिक् नास्तिकम्। ४. धिक् आत्महन्तारम्। ५. धिक् देशद्रोहिणम्।

५. १. हरिश्चन्द्रेण सदृशः सत्यवादी नास्ति। २. अश्वत्थेन सदृशः वृक्षः नास्ति। ३. महाभारतेन सदृशः ग्रन्थः नास्ति। ४. विदुरेण सदृशः नीतिज्ञः नास्ति। ५. भीष्मेण सदृशः दृढप्रतिज्ञः नास्ति। ६. विष्णुना सदृशः देवः नास्ति। ७. दधीचिना सदृशः दाता नास्ति। ८. जपयज्ञेन सदृशः यज्ञः नास्ति। ९. कृष्णेन सदृशः उपदेशकः नास्ति। १०. शुकदेवेन सदृशः वीतरागी नास्ति।

६. १. अलं व्यथया २. अलं द्वेषेण ३. अलं शोकेन ४. अलं मात्सर्येण ५. अलं पुत्रमोहेन ६. अलं लोभेन ७. अलं क्रोधेन ८. अलं परधर्मेण ९. अलं रागेण १०. अलं विमूढभावेन।

पाठः - २

१. १. तकारान्तः २. जकारान्तः ३. सकारान्तः ४. नकारान्तः ५. नकारान्तः ६. नकारान्तः ७. तकारान्तः ८. तकारान्तः ९. हकारान्तः १०. नकारान्तः।

२. २. भिषक् ३. गुणिनः ४. वणिक् ५. महान् ६. समाजसेवी ७. विद्वान् ८. आत्मा ९. आरोग्यकारी १०. श्रीमान् ११. पाप्मा १२. विवस्वान् १३. चक्रधारी १४. आततायी १५. स्वामिनः १६. भक्तियोगी।

३. १. सम्बन्धिनम् सम्बन्धिनौ सम्बन्धिनः। २. वैरिणा वैरिभ्याम् वैरिभिः। ३. श्रद्धावते श्रद्धावद्भ्याम् श्रद्धावद्भ्यः। ४. दोषभाजः दोषभाग्भ्याम् दोषभाग्भ्यः। ५. धर्मसम्मूढचेतसः धर्मसम्मूढचेतसोः धर्मसम्मूढचेतसाम्। ६. धीमति धीमतोः धीमत्सु। ७. महापाप्मन्! महापाप्मानौ! महापाप्मानः!। ८. महता महद्भ्याम् महद्भिः। ९. श्रीमन्तम् श्रीमन्तौ श्रीमतः। १०. महीक्षितः महीक्षितोः महीक्षिताम्। ११. पाप्मा पाप्मानौ पाप्मानः। १२. मन्त्रिणः मन्त्रिभ्याम् मन्त्रिभ्यः। १३. तपस्विनः तपस्विनोः तपस्विनाम्। १४. ज्ञानवति ज्ञानवतोः ज्ञानवत्सु। १५. कलयति कलयतोः कलयत्सु। १६. शिखरिणः शिखरिणोः शिखरिणाम्। १७. ब्रह्मविदि ब्रह्मविदोः ब्रह्मवित्सु। १८. वश्यात्मने वश्यात्मभ्याम् वश्यात्मभ्यः।

४. १. आततायिनः २. सुखिनः ३. पाप्मानम् ४. आत्मानम् ५. नभस्पृशम् ६. महिमानम् ७. किरीटिनम्, गदिनम्, चक्रिणम्।

५. १. ऋत्विग्भ्याम्, ऋत्विग्भ्यः २. ऋत्विजः, ऋत्विग्भ्यः ३. भवता, भवद्भ्याम् ४. भवतोः, भवताम् ५. भवति, भवतोः ६. तत्त्वविदौ, तत्त्वविदः ७. तत्त्वविदे, तत्त्वविद्भ्याम् ८. तत्त्वविदः, तत्त्वविद्भ्यः ९. आत्मानौ, आत्मनः १०. आत्मना, आत्मभ्याम् ११. हे आत्मानौ!, हे आत्मानः! १२. योगिभ्याम्, योगिभिः १३. योगिनोः, योगिनाम् १४. योगिनि, योगिनोः १५. विदुषे, विद्वद्भ्यः १६. विदुषः, विदुषाम् १७. विद्वन्!, विद्वांसः।

६. १. धीमता २. महता ३. महीक्षिता ४. प्रपश्यद्भिः ५. विद्यार्थिने ६. ज्ञानिने ७. ज्ञानवते ८. सम्बन्धिने ९. योगिभ्याम् १०. तत्त्वविद्भ्यः ११. श्रद्धावद्भ्यः १२. विद्वद्भ्यः १३. ज्ञानवतः १४. धीमद्भ्याम् १५. ज्ञानिभ्यः १६. कर्मिभ्यः।

७. १. पाण्डवः महान् धनुर्धरः आसीत्। २. एते मम सुहृदः सन्ति। ३. पुण्यकृत् धनिकः भवति। ४. ते प्रतापवन्तः सन्ति। ५. भवान् योगी

अस्ति। ६. दुष्कृतिनः मूढाः मां न प्रपद्यन्ते। ७. अविवेकी मां व्यक्तं मन्यते। ८. ते समदर्शिनः पण्डिताः वर्तन्ते। ९. ज्ञानी मुक्तये प्रयतते। १०. ते संन्यासिनः योगिनः च सन्ति।

८. १. कः नवद्वारे पुरे सुखम् आस्ते ? २. कः मनवे प्राह ? ३. पण्डिताः कस्मिन् अपि समदर्शिनः भवन्ति ? ४. के सङ्गं त्यक्त्वा कर्म कुर्वन्ति ? ५. केन पूताः भक्ताः ईश्वरभावम् आगच्छन्ति ? ६. जनकादयः केन सिद्धिम् अविन्दन् ? ७. कं शस्त्राणि अपि न छिन्दन्ति ? ८. यः कर्मफलम् अनाश्रितः कार्यं कर्म करोति सः कः भवति ?

९. १. पुमान् २. अविद्वांसः ३. बुद्धिमान् ४. कर्मकृत् ५. ज्ञानिनः ६. तत्त्वदर्शिनः ७. संन्यासी ८. योगी ९. सुकृतिनः १०. अर्थार्थी ११. ज्ञानी १२. भर्ता १३. साक्षी १४. सुहृत् १५. छलयताम् १६. तेजः १७. तेजस्विनाम् १८. सत्त्ववताम्।

१०. १. हे भगवन् ! २. हे अविनाशिन् ! ३. भोः सुहृद् ! ४. हे परमसुहृद् ! ५. हे राजन् ! ६. हे किरीटिन् !।

११. १. वीर्यवान् २. सम्बन्धिनः ३. राजा ४. अपहृतचेतसः ५. अश्वत्थामा ६. विद्वांसौ ७. धीमन्तः ८. सम्राट्। ९. शरीरी १०. भगवान्।

पाठः - ३

१. १. सरितम्, सरितौ, सरितः २. तडिता, तडिद्भ्याम्, तडिद्भिः ३. विपदे, विपद्भ्याम्, विपद्भ्यः ४. स्रजः, स्रग्भ्याम्, स्रग्भ्यः ५. आशिषः, आशिषोः, आशिषाम् ६. आपदि, आपदोः, आपत्सु ७. दिक् !, दिशौ ! दिशः ! ८. गिरा, गीर्भ्याम्, गीर्भिः।

२. २. अद्भ्यः - जलेभ्यः ३. दिक्षु - दिशासु ४. सरित् - नदी ५. परिषदे - सभायै ६. आशिषः - आशीर्वादस्य ७. गिरम् - वाणीम् ८. भाः - प्रकाशः ९. वाचा - वाण्या १०. विपदि - विपत्तौ।

३. १. परिषदः २. आशीः ३. सम्पत् ४. वाचम् ५. सरितः ६. तडितः ७. दिक्षु ८. अप्सरसः ९. अद्भिः १०. वाक् ११. सम्पत्सु/सम्पदि - विपत्सु/विपदि १२. गिरा, १३. भासः।

४. १. आशिषे, आशीर्भ्याम्, आशीर्भ्याम्, आशीर्भ्यः २. सरिता, सरिद्भ्याम्, सरितोः, सरिताम्, सरिति, सरित्सु ३. गिरौ, गिरः, गिरे, गीर्भ्याम्, गिरः, गीर्भ्यः ४. दिशम्, दिशः, दिशा, दिग्भ्याम्, हे दिशौ !, हे दिशः ! ५. भाभ्याम्, भार्भिः, भासः, भासाम्, भासि, भासोः ६. भिषजे, भिषग्भ्यः, भिषजः, भिषजाम्, हे भिषक् !, हे भिषजः ! ७. शरदौ, शरदः, शरदः, शरदाम्, हे शरद् !, हे शरदः ! ८. तडिद्भ्याम्, तडिद्भिः, तडितः, तडिद्भ्यः, तडिति, तडित्सु ९. संसदे, संसद्भ्यः, संसदः, संसदाम्, हे संसद् !, हे संसदः !।

पाठः - ४

१. १. श्रेयस् - प्र./द्वि. - ब.। २. वासस् - तृ. एक.। ३. रजस् - च. - एक.। ४. तमस् - पं./ष. - एक.। ५. सद्मन् - प्र./द्वि. - ब.। ६. वेश्मन् - स. - ब.। ७. धामन् - ष. - ब.। ८. हृद् - स. - एक.। ९. चक्षुस् - प्र./द्वि. - द्वि.। १०. शकृत् - प्र./द्वि. - ब.।

२. १. चक्षुषी २. वचांसि ३. नाम ४. हविषः ५. अहानि ६. मनः ७. चेतांसि ८. वेश्मानि ९. धनुषः १०. वचसी।

३. १. मनः २. कर्म ३. कर्माणि ४. वासांसि ५. यशः।

४. १. तेजसा २. तपसा ३. कर्मभिः ४. तपसा ५. तपसा ६. मनसा ७. तमसः ८. सद्मनः ९. धनुषः १०. वियतः ११. कर्मणः १२. चक्षुर्भ्याम् १३. कर्मणः १४. कर्मणा।

५. स्रोतस्, षष्ठी, बहुवचनम्, स्रोतसि। सामन्, षष्ठी, बहुवचनम्, सामनि। छन्दस्, षष्ठी बहुवचनम्, छन्दसि। मनस्, द्वितीया, एकवचनम्, मनसि। हृद्, सप्तमी, एकवचनम्, हृदि। ब्रह्मन्, प्रथमा, एकवचनम्, ब्रह्मणि। हविस्, प्रथमा, एकवचनम्, हविषि। ब्रह्मन्, तृतीया, एकवचनम्, ब्रह्मणि। विभूतिमत्, प्रथमा, एकवचनम्, विभूतिमति। श्रीमत्, प्रथमा, एकवचनम्, श्रीमति।

६. १. हे यशांसि ! २. धनूंषि! ३. हे हविः ! ४. हे चक्षूंषि ! ५. हे जगती ! ६. हे महन्ति ! ७. हे बृहत् ! ८. हे हृदी ! ९. हे साम ! १०. हे नामनी ! ११. हे कर्म ! १२. हे अह्नी, अहनी !

७. २. कर्म ३. तेजः ४. श्रेयः ५. उत्तमविदाम् ६. यक्षरक्षसाम् ७. यादसाम् ८. छन्दसाम् ९. स्रोतसाम् १०. तपः।

पाठः - ५

१. अखण्डपदानि = अरण्यम्, क्षेत्राणि, मनुष्याणाम्, कार्पण्यम्, शरीरिणः, पुराणानि, शस्त्रेण, सर्वाणि, ब्रह्मणा, मरणम्, पुष्पाणि, ऋषिणा,

हरीणाम्, मृगाणाम्, नारीणाम्, पक्षिणाम्। **सखण्डपदानि** = पाण्डुपुत्राणाम्, धार्तराष्ट्राणाम्, प्रणश्यन्ति, शस्त्रपाणयः, कुलधर्मेण, शीतोष्णम्, ब्रह्मनिर्वाणम्, परित्राणाय, सर्वकर्माणि, प्रणिपातेन, निर्दोषाणाम्, प्रणवः, प्रयाणकाले, षण्मासाः, उत्तरायणम्, दुष्पूरेण।

२. १. म् उ ष् ण् आ त् इ - षकारः २. य् आ त् ऋ ण् आ म् - ऋकारः ३. अ क्ष् ण् आ - षकारः ४. क् अ र् त् ऋ ण् आ म् - ऋकारः ५. न् ऋ ण् आ म् - ऋकारः ६. स् अ ङ् क् ई र् ण् अः - रकारः ७. श् ऋ ण् ओ त् इ - ऋकारः ८. प् उ ष् ण् आ म् इ - षकारः ९. व् इ क् ई र् ण् अः - रकारः १०. प् ऊ र् ण् अ म् - रकारः।

३. १. क् र् इ य् अ म् आ ण् आ न इ मध्यवर्णाः - इ य् अ म् आ। २. ग् ऋ ह् ण् आ त् इ मध्यवर्णः ह्। ३. व् इ श् ए ष् अ ण् अ म् मध्यवर्णः - अ। ४. ग् आ त् र् आ ण् इ मध्यवर्णः - आ। ५. इ क् ष् ऊ ण् आ म् मध्यवर्णः - ऊ। ६. च् अ क् र् ए ण् अ मध्यवर्णः - ए। ७. ध् र् उ व् ए ण् अ मध्यवर्णाः - उ व् ए। ८. उ प् अ क् अ र् अ ण् अ म् मध्यवर्णः - अ। ९. क् आ र् अ ण् आ त् मध्यवर्णः - अ। १०. र् उ द् र् आ न् आ म् नकारात् पूर्वं रकारः र् उ द् र् आ ण् आ म् मध्यवर्णः - आ। ११. न् इ र् व् इ ण् ण् अः मध्यवर्णौ - व् इ।

४. १. षकारः, इ; २. ऋकारः ३. रेफः, ए; ४. ऋकारः ५. षकारः, इ; ६. रेफः, ए; ७. रेफः, ए; ८. षकारः, ए; ९. रेफः, आ; १०. रेफः, अ, म्, आ; ११. रेफः, आ, ह्, ए; १२. रेफः, य्, अ, म्, आ।

५. १. षकारः, टकारः २. षकारः, ठकारः ३. रकारः, टकारः ४. रकारः, दकारः ५. रकारः, तकारः ६. रकारः, धकारः ७. ऋकारः, तकारः ८. ऋकारः, तकारः ९. रकारः, थकारः १०. रकारः, शकारः ११. रकारः, सकारः १२. रकारः, धकारः।

६. १. ✗ २. ✓ ३. ✓ ४. ✗ ५. ✓ ६. ✗ ७. ✓ ८. ✓ ९. ✓ १०. ✗ ११. ✗ १२. ✗ १३. ✗ १४. ✓ १५. ✓ १६. ✗ १७. ✓ १८. ✓ १९. ✗ २०. ✓ २१. ✓ २२. ✗

८. १. बुद्धिनाशात्प्रणश्यति। (२.६२) २. लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः। (५.२५) ३. मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये। (७.६) ४. ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्। (८.१३) ५. प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः। (१०.२८) ६. तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते। (११.४६)

पाठः - ६

१. २.खादयति ३. धावयति ४. भ्रामयति ५. गमयति ६. क्रीडयति ७. ज्वालयति ९. धारयति १०. तारयति ११. स्मारयति १४. तोषयति १५. मोदयति १६. क्रोधयति १७. कोपयति १९.वर्धयति २०. दर्शयति २१. वर्तयति २२. नर्तयति २४. स्थापयति २५. दापयति २६. ज्ञापयति २७. यापयति २८. स्नापयति।

२. २. पीडयति, पीडयति ३. क्षालयति, क्षालयति ४. कथयति, कथयति ५. गणयति, गणयति ६. मार्जयति।

३. २. दह् - दाहयति ३. नश् - नाशयति ४. बुध् - बोधयति ५. धृ - धारयति ६. लिख् - लेखयति ७. नद् - नादयति ८. ज्ञा - ज्ञापयति ९. उप + विश् - उपवेशयति १०. पत् - पातयति ११. तड् - ताडयति १२. मुद् - मोदयति।

४. ग्रह्- ग्राहयति, जन् - जनयेत्, लोक्- अलोकयत्, स्पृह - स्पृहयति, स्मृ- स्मारयतु, चर्- अचारयत्, शुच् - शोचयेत्, हन् - घातयतु, युज्- योजयेत्, पाल्- अपालयत्, भाष्- भाषयतु, वह्- वाहयेत्, भू- भावयति, गण्- गणयतु, कुप् - अकोपयत्, शीङ् - शाययति, मुच् - अमोचयत्।

५. १. विदारितवान् २. मोहितवन्तः ३. संवर्धयितुम् ४. विनाश्य, प्रतिष्ठापितवान् ५. आच्छादयितुम् ६. प्रेषितवान् ७. संशोध्य, स्थापयति ८. कारितवान् ९. ज्ञापयितुम् १०. वर्धितवन्तः।

६. १. बोधयति २. बोधयतु ३. अबोधयत् ४. बोधयेयुः ५. बोधितवती ६. बोध्यते ७. बोधयितुम् ८. बोधनीयः ९. बोधयति १०. बोधयित्वा।

७. १. कारयन् २. भ्रामयन् ३. बोधयन्तः, कथयन्तः ४. कर्शयन्तः ५. भासयते ६. धारयते ७. नाशयामि ८. धारयामि ९. मोक्षयिष्यामि १०. दर्शय ११. निवेशय।

८. १. दुर्योधनः द्रोणाचार्यं पाण्डवानीकं दर्शयति। २. भीष्मः दुर्योधनं हर्षयति। ३. कृष्णः अर्जुनेन कुरून् अवेक्षयति। ४. वर्णसङ्करकारकदोषाः कुलधर्मान् उत्सादयन्ति। ५. कामः शरीरिणं विमोहयति। ६. कर्म नरं संसिद्धिं प्रापयति। ७. स्वधर्माचरणं श्रेयः वर्धयति। ८. रविः लोकं प्रकाशयति। ९. देवः भक्तं कदापि न प्रणाशयति। १०. भगवान् अर्जुनं दिव्यविभूतिं श्रावयति।

पाठः - ७

१. अबोधत्, जानातु, न्यवेत्, दत्त्वा, दृष्ट्वा, यातवान्, तिष्ठतु, अभनक्, स्थितवान्, विकसति, अपगच्छति।

२. १. प्रसारयति २. रथम् ३. शिष्यान् ४. अश्वान् ५. स्रावयति ६. पुत्रान् ७. द्रौपदीम् ८. कर्णम्।

३. १. पाण्डवान् २. कर्मयोगम् ३. प्रजाः ४. भक्तियोगम् ५. धर्ममार्गम् ६. अर्जुनम्।

४. १. पुत्रम् २. छात्रान् ३. युद्धसज्जान् ४. पुत्रम्।

५. १. सस्यम् २. रथम् ३. पाण्डवान् ४. गरुडम् ५. गङ्गया ६. कर्मचक्रम् ७. बुद्धिम् ८. देहिनम् ९. अज्ञानम् १०. अनुजाम्।

६. प्रयोजककर्तारः = २. माता ३. वैद्यः ४. अग्रजः ५. ईश्वरः ६. अनुश्रीः ७. अश्वारोही ८. मर्कटपालकः ९. अर्जुनः १०. अर्थहीनाः प्रश्नाः ११. बालाः १२. शुक्राचार्याः। प्रयोज्यकर्तारः = २. पुत्रम् ३. रुग्णम् ४. अनुजाम् ५. असुरान् ६. दण्डदीपम् ७. धर्मम् ८. मर्कटौ ९. बाणगङ्गाम् १०. माम् ११. आम्रफलानि १२. असुरान्।

७. १. विद्यार्थिनः २. आम्रफलानि ३. गोरक्षनाथेन ४. सेविकया ५. श्रीहरिणा ६. सन्दीपम् ७. रोगिणम् ८. सेविकया ९. पुत्राभ्याम् १०. कर्मकरान् ११. अभिमन्युम् १२. सुप्रियाम् १३. अनुजाम् १४. राघवेण १५. पितामहम्।

८. १. धनिकः माणवकान् भोजनं कारयति। २. चैतन्यः पाचकेन पायसं पाचयति। ३. ऋत्विजः यजमानेन यज्ञं याजयन्ति। ४. श्रीकृष्णः शिशुपालं मारयति। ५. पिता स्नेहलां पितृव्येन मेलयति। ६. गुरुः छात्रान् गीतानि गापयति। ७. दिग्दर्शकः नटैः संवादान् राटयति। ८. माता पुत्र्यौ स्तोत्रं पाठयति। ९. छाया विजयेन मधुरं दापयति। १०. महेशः माधवेन राममूर्तौ चन्दनं लेपयति। ११. पिता पुत्रेण तिलकं धारयति। १२. श्वश्रूः स्नुषया गृहे सुगन्धिजलं प्रोक्षयति। १३. अधिकारी सैनिकैः देशद्रोहिणः अन्वेषयति।

९. १. स्वजनदर्शनम् अर्जुनस्य गात्राणि सादयति। २. मुखं परिशोषयति। ३. शरीरे वेपथुं जनयति। ४. त्वचं परिदाहयति। ५. गाण्डीवं स्रंसयति। ६. रोमहर्षं जनयति। ७. मनः भ्रामयति। ८. रथोपस्थे उपवेशयति।

१०. १. सङ्गः कामं सञ्जनयति। २. कामः क्रोधम् अभिजनयति। ३. क्रोधः सम्मोहम् उत्पादयति। ४. सम्मोहः स्मृतिविभ्रमं जनयति। ५. स्मृतिविभ्रमः बुद्धिं विनाशयति। ६. बुद्धिः ततः प्रणश्यति।

११. १. अश्वपालकः अश्वेन चणकान् खादयति। २. सेनानायकः सैनिकान् सर्वेषु अयनेषु यथाभागम् अवस्थापयति। ३. कृष्णः अर्जुनेन योत्स्यमानान् अवेक्षयति। ४. व्यासः गणेशेन महाभारतम् अलेखयत्। ५. अर्जुनः शिखण्डिनं पुरतः स्थापयति। ६. मात्रास्पर्शाःधीरं पुरुषं न व्यथयन्ति। ७. आपः, मारुतः आत्मानं न क्लेदयन्ति न वा शोषयन्ति। ८. यज्ञः यज्ञात् पर्जन्यम् उद्भावयति। ९. कामः पुरुषं पापं चारयति। १०. धर्मग्लानिः ईश्वरेण आत्मानं सर्जयति। ११. भगवान् दुष्कृतः विनाशयति।

पाठः - ८

१. १. मतः, शाश्वतः २. बहूनि, जन्मानि ३. परा, बुद्धिः ४. नैष्ठिकी, शान्तिः ५. सुखी, नरः ६. परमम्, पदम् ७. निवातस्थः, दीपः। ८. अनाश्रितः, योगी ९. आवृतम्, ज्ञानम् १०. तुमुलः, घोषः।

२. उत्तमः - उत्तमा - उत्तमम्। कृष्णः - कृष्णा - कृष्णम्। अधमः - अधमा - अधमम्। तीव्रः - तीव्रा - तीव्रम्। मन्दः - मन्दा - मन्दम्। परः - परा - परम्। मधुरः - मधुरा - मधुरम्। सुन्दरः - सुन्दरी - सुन्दरम्। क्रूरः - क्रूरा - क्रूरम्। समीचीनः - समीचीना - समीचीनम्। दिव्यः - दिव्या - दिव्यम्। उन्नतः - उन्नता - उन्नतम्। श्रेष्ठः - श्रेष्ठा - श्रेष्ठम्। प्रियः - प्रिया - प्रियम्। प्रसिद्धः - प्रसिद्धा - प्रसिद्धम्।

३. १. भीमकर्मा २. दिव्यौ ३. समदर्शिनः ४. कुरुवृद्धः ५. दुरत्यया ६. दैवी ७. प्रवर्तितम् ८. ध्रुवम् ९. चञ्चलम् १०. बहूनि।

४. धीमता - शिष्येण। वीर्यवान् - काशिराजः। अयनेषु - सर्वेषु। रुधिरप्रदिग्धान् - भोगान्। वासांसि - जीर्णानि। प्रतिष्ठिता - प्रज्ञा। उभयोः - सेनयोः। पुष्पितां - वाचम्। दिव्यौ - शङ्खौ। विपश्चितः - पुरुषस्य।

५. १. सर्वोन्नतः २. पर्वतराजः ३. उत्तरस्याम् ४. उन्नतात् ५. अनेकाः ६. विविधानाम् ७. उन्नतानि ८. हिमाच्छादितानि ९. जितेन्द्रियाणाम् १०. अनेके ११. तपःपूताः १२. अनेके बहुमूल्याः १३. असंख्याः १४. संयमिनाम् १५. परमाम्।

पाठः - ९

१. १. एकः अश्वः अस्ति। २. एकः उष्ट्रः अस्ति। ३. एकः शशकः अस्ति। ४. एका अजा अस्ति। ५. एका गौः अस्ति।
१. एका महिला अस्ति। २. त्रयः पुरुषाः सन्ति। ३. द्वौ शुनकौ स्तः। ४. षट् गृहाणि सन्ति। ५. चत्वारः वृक्षाः सन्ति।
१. एका घटी अस्ति। २. चत्वारि उपधानानि सन्ति। ३. द्वौ आसन्दौ स्तः। ४. एकं वातायनम् अस्ति। ५. एकः तल्पः अस्ति।
१. द्वे सङ्गणके स्तः। २. द्वौ आसन्दौ स्तः। ३. एका ग्रन्थकपाटिका अस्ति। ४. एका दूरवाणी अस्ति। ५. एका उत्पीठिका अस्ति।

२. १. द्वौ हरिणौ स्तः। २. एकः बिडालः अस्ति। ३. अष्ट शृगालाः सन्ति। ४. त्रयः शशकाः सन्ति। ५. षट् शुनकाः सन्ति।

३. १. व्यवसायात्मिका बुद्धिः एका इह कुरु नन्दन। २. यत् श्रेयः एतयोः एकं तत् मे ब्रूहि सुनिश्चितम्। ३. एकं साङ्ख्यं च योगं यः पश्यति स पश्यति। ४. चतुर्भिः प्रकारैः सुकृतिनः जनाः मां भजन्ते। ५. महर्षयः सप्त पूर्वे चत्वारो मनवः.... येषां लोक इमाः प्रजाः। ६. द्वौ भूतसर्गौ लोकेऽस्मिन् स्तः। ७. भूमिरापोऽनलः ..... प्रकृतिः अष्टधा।

४. १. द्वयोः २. त्रीणि ३. चतसृभ्यः ४. पञ्चानाम् ५.षड्भ्यः ६. सप्त ७. अष्टभिः ८. नवसु ९. दशसु।

५. १. एकः मयूरः अस्ति। २. तिस्रः देव्यः सन्ति। ३. सप्तदश पुष्पाणि सन्ति। ४. एकम् आसनम् अस्ति। ५. पञ्च कमलानि सन्ति। ६. द्वे पुस्तके स्तः। ७. द्वौ स्तम्भौ स्तः। ८. एका वीणा अस्ति। ९. एकः शङ्खः अस्ति। १० . एकः हंसः अस्ति।

६. १. सप्त बालकाः धावन्ति। २. चतस्रः महिलाः गीतं गायन्ति। ३. तिस्रः बालिकाः यानपेटिकाः कर्षन्ति। ४. एकः युवकः उपरिष्टात् पतति। ५. पञ्च पक्षिणः डयन्ते। ६. द्वे महिले चलतः। ७. षट् महिलाः नृत्यन्ति। ८. षट् पुष्पाणि विलसन्ति।

७. १. एका २. चतुरः ३. त्रीन् ४. नव ५. एकम् ६. षड् ७. सप्तसु ८. तिस्रः ९. पञ्चभ्यः १०. चतुर्भ्यः।

पाठः - १०

१. पञ्चदशः, पञ्चदशी, पञ्चदशम्। अष्टादशः, अष्टादशी, अष्टादशम्। नवदशः, नवदशी, नवदशम्। द्विसप्ततितमः, द्विसप्ततितमी, द्विसप्ततितमम्। चतुश्चत्वारिंशत्तमः, चतुश्चत्वारिंशत्तमी, चतुश्चत्वारिंशत्तमम्। चतुःपञ्चाशत्तमः, चतुःपञ्चाशत्तमी, चतुःपञ्चाशत्तमम्। सप्तषष्टितमः, सप्तषष्टितमी, सप्तषष्टितमम्। अष्टाशीतितमः, अष्टाशीतितमी, अष्टाशीतितमम्। एकसप्ततितमः, एकसप्ततितमी, एकसप्ततितमम्। अष्टाविंशतितमः, अष्टाविंशतितमी, अष्टाविंशतितमम्। त्रयस्त्रिंशत्तमः, त्रयस्त्रिंशत्तमी, त्रयस्त्रिंशत्तमम्। एकषष्टितमः, एकषष्टितमी, एकषष्टितमम्। षट्सप्ततितमः, षट्सप्ततितमी, षट्सप्ततितमम्। नवत्रिंशत्तमः, नवत्रिंशत्तमी, नवत्रिंशत्तमम्। द्वाविंशतितमः, द्वाविंशतितमी, द्वाविंशतितमम्। पञ्चनवतितमः, पञ्चनवतितमी, पञ्चनवतितमम्। षण्णवतितमः, षण्णवतितमी, षण्णवतितमम्। षष्ठः, षष्ठी, षष्ठम्। चतुर्थः, चतुर्थी, चतुर्थम्। पञ्चमः, पञ्चमी, पञ्चमम्। प्रथमः, प्रथमा, प्रथमम्। सप्तविंशतितमः, सप्तविंशतितमी, सप्तविंशतितमम्। नवषष्टितमः, नवषष्टितमी, नवषष्टितमम्।

२. १. पञ्चदशः अवतारः वामनः। २. द्वादशः अवतारः धन्वन्तरिः। ३. चतुर्दशः अवतारः नृसिंहः। ४. षष्ठः अवतारः दत्तात्रेयः। ५. तृतीयः अवतारः नारदः। ६. नवदशः अवतारः बलरामः। ७. विंशतितमः अवतारः कृष्णः। ८. सप्तदशः अवतारः वेदव्यासः। ९. चतुर्थः अवतारः नरनारायणौ। १०. द्वितीयः अवतारः वराहः। ११. एकादशः अवतारः कच्छपः।

३. १. तृतीयः २. पञ्चमः ३. द्वितीयेन ४. चतुर्थस्य ५. पञ्चविंशतितमः ६. पञ्चाशत्तमः ७. अष्टनवतितमः ८. पञ्चपञ्चाशत्तमाय ९. एकसप्ततितमः १०. शततमः।

४. १. एकत्रिंशत्तमी २. त्रयस्त्रिंशत्तमी ३. अष्टपञ्चाशत्तमी ४. चतुश्चत्वारिंशत्तमी ५. नवचत्वारिंशत्तमी ६. पञ्चचत्वारिंशत्तमी ७. सप्तपञ्चाशत्तमी ८. द्विषष्टितमी ९. त्रिषष्टितमी १०. चतुःषष्टितमी ११. चतुःपञ्चाशत्तमी १२. द्विचत्वारिंशत्तमी १३. त्रयोविंशतितमी १४. नवदशी १५. अष्टात्रिंशत्तमी।

५. २. चतुर्दश्यां तिथौ ३. षष्ठी उत्पीठिका ४. त्रिंशत्तमस्य बालकस्य ५. पञ्चदशेन प्रधानमन्त्रिणा ६. अष्टचत्वारिंशत्तमीं पङ्क्तिम् ७. नवनवतितम्यै बालिकायै ८. द्विचत्वारिंशत्तमे भवने ९. अष्टात्रिंशत्तमं रोगिणम् १०. सप्तम्या सरिता।

६. २. गीतायां साङ्ख्ययोगः द्वितीयः अध्यायः। ३. गीतायां कर्मयोगः तृतीयः अध्यायः। ४. गीतायां ज्ञानकर्मसंन्यासयोगः चतुर्थः अध्यायः। ५. गीतायां कर्मसंन्यासयोगः पञ्चमः अध्यायः। ६. गीतायाम् आत्मसंयमयोगः षष्ठः अध्यायः। ७. गीतायां ज्ञानविज्ञानयोगः सप्तमः अध्यायः। ८. गीतायाम् अक्षरब्रह्मयोगः अष्टमः अध्यायः। ९. गीतायां राजविद्याराजगुह्ययोगः नवमः अध्यायः।

१०. गीतायां विभूतियोगः दशमः अध्यायः । ११. गीतायां विश्वरूपदर्शनयोगः एकादशः अध्यायः । १२. गीतायां भक्तियोगः द्वादशः अध्यायः । १३. गीतायां क्षेत्रक्षेत्रज्ञविभागयोगः त्रयोदशः अध्यायः । १४. गीतायां गुणत्रयविभागयोगः चतुर्दशः अध्यायः । १५. गीतायां पुरुषोत्तमयोगः पञ्चदशः अध्यायः । १६. गीतायां दैवासुरसम्पद्विभागयोगः षोडशः अध्यायः । १७. गीतायां श्रद्धात्रयविभागयोगः सप्तदशः अध्यायः । १८. गीतायां मोक्षसंन्यासयोगः अष्टादशः अध्यायः ।

७. २.अष्टादशाध्यायस्य चतुःपञ्चाशत्तमे श्लोके । ३. अष्टादशाध्यायस्य सप्तपञ्चाशत्तमे श्लोके । ४. अष्टादशाध्यायस्य एकषष्टितमे श्लोके । ५. अष्टादशाध्यायस्य चतुःषष्टितमे श्लोके । ६. अष्टादशाध्यायस्य नवषष्टितमे श्लोके । ७. गीतायाः अष्टादशाध्यायस्य सप्ततितमे श्लोके । ८. अष्टादशाध्यायस्य त्रिसप्ततितमे श्लोके । ९. अष्टादशाध्यायस्य सप्तसप्ततितमे श्लोके । १०. अष्टादशाध्यायस्य अष्टसप्ततितमे श्लोके । ११. अष्टादशाध्यायस्य अष्टसप्ततितमे श्लोके ।

पाठः - ११

१. तस्मिन् समये तत्र तपस्वी भगवान् अगस्त्यः प्रकटितः अभवत् । २. अगस्त्यस्य दर्शनेन इन्द्रः प्रसन्नः अभवत् । ३. नहुषः अधर्मप्रवृत्तिकारणात् धर्मस्य तत्त्वं न अधिगच्छति । ४. ततः नहुषः तैः ऋषिभिः सह विवादं प्रारभत । ५. नहुषस्य पुण्यं क्षीणम् अभवत् ।

२. असौ -अदस् - पुं.प्र.एक. । अहम् - अस्मद् - प्र.एक. । त्वम् - युष्मद् - प्र .एक. । भवतः - भवत् - पुं.ष.एक. । ये - यद् - दका.पुं.प्र.बहु. । कस्मिन् - किम्- स.एक. । तस्मिन् - तद् - नपुं. स.एक. । एतान् - एतद् - दका.पुं.द्वि.बहु. ।

३. १. यस्य २. यः ३. यस्य ४. येन ५. या ६. यस्य ७. येन ८. यस्मात् ९. यः ।

४. १. अस्मिन् २. एतम् ३. एतस्य ४. तम् ५. अस्य ६. सः ७. तस्य ८. तस्मिन् ९. अन्यानि १०. इमम् ।

५. १. अन्ये २. तेषु ३. तस्मात् ४. तौ ५. सा ६. अन्यः ७. एतस्याः ८. सर्वेण ९. ताः १०. तया ।

पाठः - १२

१. १. सभायां का अपृच्छत् ? २. अहं कस्याः प्रश्नानाम् उत्तराणि वक्तुं न समर्थः ? ३. का कुरुवंशिनः महात्मनः प्रणमति ?
४. भवती कस्यां विपत्तौ अपि धर्मम् एव पश्यति ? ५. कस्याः इदम् आचरणम् अनुकूलम् एव अस्ति ?
६. का दुःखिता पाण्डवपत्नी भवतां मुखात् समुचितम् उत्तरं श्रोतुम् इच्छति ? ७. का जिता उत न अस्य निर्णयं तु धर्मराजः एव कर्तुं योग्यः ?

२. १. ताम् २. एषा ३. ताम् ४. एतया ५. ताम् ६. एतया ७. ताम् ८ एतस्याम् ९. तस्याः १०. एषा ।

३. १. अस्याम् २. अनया ३. एतस्याः ४. एतस्याः ५. तस्याः ६. तस्याः ७. एतस्याम्
८. अस्याः ९. एतस्याः १०. भवत्याः ११. ताभ्यः १२. एतस्याः ।

पाठः - १३

२. केनचित्, काभ्याञ्चित्, कैश्चित् । कस्मैचित्, काभ्याञ्चित्, केभ्यश्चित् । कस्माच्चित्, काभ्याञ्चित्, केभ्यश्चित् ।
कस्यचित्, कयोश्चित्, केषाञ्चित् । कस्मिंश्चित्, कयोश्चित्, केषुचित् ।

३. १. कयाचित्, २. केनचित्, ३. कस्यचित्, ४. कञ्चन ५. कानिचन ६. कस्याञ्चित्, ७. काचित् ८. किञ्चित् ।

४. १. काचित्, २. कस्यैचित्, ३. कस्याश्चित्, ४. काश्चन, ५. काञ्चित्, ६. कस्याञ्चित्, ७. काभ्यश्चित्, ८. काश्चन ९. कस्याश्चित् ।

५. १. कदाचित्, २. कुतश्चित् ३. कथञ्चित्, ४. कुत्रचित् ।

६. १. जातु तिष्ठत्यकर्मकृत् ।३.५। २. नाकृतेनेह कश्चन ।३.१८। ३. त्रिषु लोकेषु किञ्चन ।३.२२। ४. नैव किञ्चित् करोति सः ।४.२०। ५. न चैव सुकृतं विभुः ।५.१५। ६. छिन्नाभ्रमिव नश्यति ।६.३८। ७. मां तु वेद न कश्चन ।७.२६।

पाठः - १४

१. १. महर्षिः भृगुः परीक्षणार्थं व्रजेत् । २. एषः कदाचित् नमनं कुर्यात् इति ब्रह्मा अचिन्तयत् । ३. महर्षिः भृगुः स्तुतिस्तोत्रादिकम् अकृत्वा लोकाचारं परित्यज च आसने उपाविशत् । ४. मम पतिः महर्षिं हन्यात् इति पार्वती अचिन्तयत् । ५. कृपया भवान् आसनं स्वीकुर्यात् इति विष्णुः अवदत् ।

२. २. अस्ति ३. अस्ति ४. अस्ति ५. नास्ति ६. नास्ति ७. नास्ति ८. अस्ति ९. अस्ति १०. अस्ति।

३. २. भवेत्, भवेयुः, भवेयम्, भवेम । ३. स्युः, स्याम्, स्याम । ४. अनुस्मरेत्, अनुस्मरेयुः, अनुस्मरेयम्, अनुस्मरेम । ५. जयेत्, जयेयुः, जयेयम्, जयेम । ६. पश्येत्, पश्येयुः, पश्येयम्, पश्येम । ७. भ्रमेत्, भ्रमेयुः, भ्रमेयम्, भ्रमेम । ८. जोषयेत्, जोषयेयुः, जोषयेयम्, जोषयेम । ९. तिष्ठेत्, तिष्ठेयुः, तिष्ठेयम्, तिष्ठेम । १०. आगच्छेत्, आगच्छेयुः, आगच्छेयम्, आगच्छेम । ११. नमेत्, नमेयुः, नमेयम्, नमेम । १२. गच्छेत्, गच्छेयुः, गच्छेयम्, गच्छेम । १३. विचालयेत्, विचालयेयुः, विचालयेयम्, विचालयेम । १४. प्रविशेत्, प्रविशेयुः, प्रविशेयम्, प्रविशेम । १५. त्यजेत्, त्यजेयुः, त्यजेयम्, त्यजेम । १६. पिबेत्, पिबेयुः, पिबेयम्, पिबेम । १७. नयेत्, नयेयुः, नयेयम्, नयेम । १८. तरेत्, तरेयुः, तरेयम्, तरेम । १९. उत्सीदेत्, उत्सीदेयुः, उत्सीदेयम्, उत्सीदेम । २०. वहेत्, वहेयुः, वहेयम्, वहेम । २१. लिखेत्, लिखेयुः, लिखेयम्, लिखेम । २२. अवसादयेत्, अवसादयेयुः, अवसादयेयम्, अवसादयेम ।२३. चिन्तयेत्, चिन्तयेयुः, चिन्तयेयम्, चिन्तयेम । २४. उद्धरेत्, उद्धरेयुः, उद्धरेयम्, उद्धरेम ।

४. २. गृह्णीयात्, गृह्णीयुः, गृह्णीयाम्, गृह्णीयाम । ३. अश्नीयात्, अश्नीयुः, अश्नीयाम्, अश्नीयाम । ४. जानीयात्, जानीयुः, जानीयाम्, जानीयाम । ५. क्रीणीयात्, क्रीणीयुः, क्रीणीयाम्, क्रीणीयाम । ७. आप्नुयात्, आप्नुयुः, आप्नुयाम्, आप्नुयाम । ८. शृणुयात्, शृणुयुः, शृणुयाम्, शृणुयाम । ९. चिनुयात्, चिनुयुः, चिनुयाम्, चिनुयाम । ११. गणयेत्, गणयेयुः, गणयेयम्,गणयेम । १२. लेखयेत्, लेखयेयुः, लेखयेयम्, लेखयेम । १३. पाठयेत्, पाठयेयुः, पाठयेयम्, पाठयेम । १४. कथयेत्, कथयेयुः, कथयेयम्, कथयेम ।

५. १. आगच्छेत् २. अर्हेत् ३. अनुभवेत् ४. प्रविशेत् ५. तिष्ठेत् ६. कुर्यात् ७. उपविशेत् ८. गायेत् ९. प्राप्नुयात् १०. उत्तिष्ठेत् पीडयेत् । ११. नयेयम् १२. दद्युः १३. शक्नुयात् १४. अनुभवेत् १५. जानीयात् १६. गच्छेत् १७. पतेत्

६. १. कदाचित् सः ग्रामं गच्छेत् । २. यदि ते क्रीडेयुः । ३. प्रायः बालकाः इच्छेयुः । ४. यदि सः खादेत् तर्हि त्वम् अपि खादेः । ५. सा श्वः चलचित्रं पश्येत् त्वम् अपि पश्येः । ६. कदाचित् यूयं न भ्रमेत । ७. प्रायः यूयं लेखितुं शक्नुयात । ८. श्वः अहं वदेयम् । ९. कदाचित् अहम् एव पुस्तकं गृह्णीयाम् । १० कदाचित् वयम् अभिनन्देम । ११. प्रायः वयं गत्वा शृणुयाम ।

७. १. आगच्छेयुः, वदेयम् । २. गृह्णीयात् । ३. पश्येत्, भवेत् । ४. कुर्यात् । ५. स्नायुः । ६. कुर्युः । ७. प्रणमेयुः । ८. वदेयुः ९. कुर्युः । १०. पठेयुः । ११. उच्चारयेयुः । १२. उपविशेयुः । १३. अवतरेयुः, स्यात् । १४. आगच्छेयुः । १५. स्वप्युः, भवेत् ।

८. आश्रयेताम्, यायात्, ब्रूयात्, अनुशोचेत्, दहेः, प्रवदेव, आप्नुयातम्, अभिनन्देम, धरेयुः, शृणुयाः, स्याम, गृह्णीयुः, हन्याम्, विजानीयात्, उद्धरेयम्, दद्यात्, सीदेयुः, स्वप्युः, वायुः, धमेत् ।

९. १. आगच्छेताम् २.आगच्छेयुः ३.आगच्छेव ४. आगच्छेयुः ५. आगच्छेताम् ६. आगच्छेम ७. आगच्छेयुः ।

१०. १. स्यात् २. अर्हेत् ३. कुर्यात् ४. तिष्ठेत् ५. पश्येत् ।

११. १. यजेयम् २. कुर्याम् ३. खादेयम् ४. कथयेयम् ५. आचरेयम् ६. आप्नुयुः ७. पालयेयुः ८. कुर्युः ९. रक्षयेयुः ।

पाठः - १५

१. विद्येत - एकवचनम्, जायेत - एकवचनम्, कुर्वीत - एकवचनम्, त्रायेत - एकवचनम्, कामयेत - एकवचनम्, ध्वंसेत - एकवचनम्, कथयेय - एकवचनम्, जानीरन् - बहुवचनम्, लभेमहि - बहुवचनम्, लभेरन् - बहुवचनम्, युद्धेरन् - बहुवचनम् ।

२. २. मुद् - मोदेत - मुदितः भवेत्, ३. कम् - कामयेत - कामनां कुर्यात्, ४. जन् - जायेत - जन्म प्राप्नुयात्, ५. दा - ददीत - दानं कुर्यात्, ६. उद् + विज् - उद्विजेत - उद्वेगं कुर्यात्, ७. लभ - लभेत - लाभं प्राप्नुयात्, ८. त्रा - त्रायेत - त्राणं (रक्षणं) कुर्यात्, ९. निर् + ईक्ष् - निरीक्षेत - निरीक्षणं कुर्यात्, १०. कृ - कुर्वीत - कार्यं कुर्यात्, ११. वन्द - वन्देत - वन्दनं कुर्यात्,१२. प्र + अर्थ - प्रार्थ्येत - प्रार्थनां कुर्यात्, १३. भाष - भाषेत - भाषणं कुर्यात्, १४. चि - चिन्वीत - चयनं कुर्यात्, १५. सृज् - सृज्येत - सर्जनं कुर्यात् ।

३. शोभेत शोभेरन् शोभेय शोभेमहि, द्योतेत द्योतेरन् द्योतेय द्योतेमहि, स्रंसेत स्रंसेरन् स्रंसेय स्रंसेमहि, ध्वंसेत ध्वंसेरन् ध्वंसेय ध्वंसेमहि, दधीत दधीरन् दधीय दधीमहि, डीयेत डीयेरन् डीयेय डीयेमहि, जायेत जायेरन् जायेय जायेमहि ।

४. १. जायेत २. वन्देरन् ३. डयेत ४. चिन्वीरन् ५. विन्देयाताम् ६. लभेवहि ७. जानीमहि ८. विद्येयाताम् ।

५. १. भवान् अभ्यागतानां स्वागतं कुर्वीत । २. लतिके ! त्वं प्रमुखातिथेः परिचयं जानीथाः । ३. युवां द्वे छात्रे शारदास्तवनं कुर्वीयाथाम् । ४. यूयं पञ्च छात्राः भोजनव्यवस्थाम् अवलोकयध्वम् । ५. अहं सर्वेभ्यः पुष्पस्तबकं ददीय । ६. आवां कार्यक्रमस्य समयं नियोजयावहि । ७. फलानि कः क्रीणीत ? ८. सायङ्काले कति दीपाः द्योतेरन् ? ९. जलव्यवस्था अपि वर्तेत । १०. पादरक्षाः आवल्यां विद्येरन् ।

६. १. विद्येत २. जायेत ३. कुर्वीत ४. वर्तेत ५. जायेत ६. वर्तेत ७. त्रायेत ८. कामयेत ९. त्रायेत १०. ध्वंसेत ११. कथयेय १२. ध्वंसेत १३. लभेमहि १४. जानीरन् १५. लभेरन् १६. लभेरन् १७. युद्ध्येरन् १८. विद्येत, जायेत ।

७. १. आसीत २. वर्तेय ३. मन्येत ४. युञ्जीत ।

पाठः - १६

१. १. अवदिष्यत्, अवदिष्यन्, अवदिष्यम्, अवदिष्याम । २. अखादिष्यत्, अखादिष्यन्, अखादिष्यम्, अखादिष्याम । ३. अस्मरिष्यत्, अस्मरिष्यन्, अस्मरिष्यम्, अस्मरिष्याम । ४. ऐषिष्यन्, ऐषिष्यम्, ऐषिष्याम । ५. अनंस्यत्, अनंस्यन्, अनंस्यम्, अनंस्याम । ६. अनेष्यत्, अनेष्यन्, अनेष्यम्, अनेष्याम ।७. अप्रक्ष्यत्, अप्रक्ष्यन्, अप्रक्ष्यम्, अप्रक्ष्याम । ८. अक्षमिष्यत्, अक्षमिष्यन्, अक्षमिष्यम्, अक्षमिष्याम ।

२. १. अवर्तिष्यत, अवर्तिष्यन्त, अवर्तिष्ये, अवर्तिष्यामहि । २. अशोभिष्यत, अशोभिष्यन्त, अशोभिष्ये, अशोभिष्यामहि । ३. अमोदिष्यत, अमोदिष्यन्त,अमोदिष्ये, अमोदिष्यामहि । ४. अभाषिष्यत, अभाषिष्यन्त, अभाषिष्ये, अभाषिष्यामहि । ५. अस्पर्धिष्यत, अस्पर्धिष्यन्त, अस्पर्धिष्ये, अस्पर्धिष्यामहि । ६. अजनिष्यत, अजनिष्यन्त, अजनिष्ये, अजनिष्यामहि । ७. अलप्स्यत, अलप्स्यन्त, अलप्स्ये, अलप्स्यामहि ।

३. १. यदि युधिष्ठिरः सम्यक् न उदतरिष्यत् तर्हि यक्षः सर्वान् न अजीवयिष्यत् । २. यदि दुर्योधनः मत्स्यं भेत्तुम् अशक्ष्यत् तर्हि द्रौपदी पर्यणेष्यत् । ३. यदि अश्वत्थामा पाण्डवपुत्रान् न अहनिष्यत् तर्हि द्रौपदी न अरोदिष्यत् । ४. यदि कृपी आग्रहं न अकरिष्यत् तर्हि द्रौणाचार्यः हस्तिनापुरं न अगमिष्यत् । ५. यदि सुभद्रा अर्जुनं न अकामयिष्यत तर्हि अर्जुनः सुभद्रां न अहरिष्यत् । ६. यदि कृष्णः वने न व्यचरिष्यत् तर्हि सः ब्रह्माणं न व्यमोहयिष्यत् । ७. यदि भीमः गदां न स्व्यकरिष्यत् तर्हि शत्रुसंहारम् अपि न अकरिष्यत् । ८. यदि कर्णः कुन्त्याः प्रस्तावम् अङ्यकरिष्यत् तर्हि अर्जुनस्य हस्तेन न अमरिष्यत् । ९. यदि कृष्णः पाण्डवानां पक्षे न अभविष्यत् तर्हि कौरवाः न पराजेष्यन्त । १०. यदि शम्बरासुरः प्रद्युम्नं न अपाहरिष्यत् तर्हि प्रद्युम्नः तं न समहरिष्यत ।

४. अभविष्यत्, अभविष्यत्, प्राप्स्यन्, प्राप्स्यन्, व्यफलिष्यन्, व्यफलिष्यन्, अक्षमिष्यत्, आज्ञापयिष्यत्, अव्रजिष्यत्, अव्रजिष्यत्, अशक्ष्यत्, अशक्ष्यत्, अमारयिष्यत्, पराजेष्यत, अमारयिष्यन्, आचरिष्यन्, अभविष्यत् ।

५. १. यदि शन्तनुः गङ्गां न न्यषेत्स्यत् तर्हि देवव्रतः न अजीविष्यत् । २. यदि भीष्मः काशिराजस्य स्वयंवरं न अगमिष्यत् तर्हि प्रतिज्ञायाः उपहासः न अभविष्यत् । ३. यदि अम्बा भीष्मस्य पुरतः न अवदिष्यत् तर्हि भीष्मः तां सौभदेशं न अप्रेषयिष्यत् । ४. यदि पीयूषः शिलाखण्डं न अक्षेप्स्यत् तर्हि फलानि न अपतिष्यन् । ५. यदि साक्षात् न अद्रक्ष्यम् तर्हि भीतः न अभविष्यम् । ६. यदि सः दुर्गं न अक्रेष्यत् तर्हि समाजकार्याय न आर्पयिष्यत् । ७. यदि रामः पुस्तकं न व्यक्रेष्यत तर्हि धनं न आर्जयिष्यत् । ८. यदि तडागे जलं न अभविष्यत् तर्हि मीनाः तडागम् अत्यक्षन् । ९. यदि कृष्णः न अनर्तिष्यत् तर्हि राधा मुग्धा न अभविष्यत् । १०. यदि भवतः मनसि विश्वासः न अभविष्यत् तर्हि भवान् विजयं न प्राप्स्यत् ।

पाठः - १७

१. द्वि.वि. - पिबन्तम्, पिबन्तौ, पिबतः । तृ.वि. - पिबता, पिबद्भ्याम् । च.वि. - पिबद्भ्याम्, पिबद्भ्यः । पं.वि. - पिबतः, पिबद्भ्याम्, पिबद्भ्यः । ष.वि. - पिबतोः । स.वि. - पिबति, पिबत्सु ।

२. द्वि.वि. - खादन्त्यौ । तृ.वि. - खादन्त्या, खादन्तीभ्याम्, खादन्तीभिः । च.वि. - खादन्त्यै, खादन्तीभ्याम् । पं.वि. - खादन्तीभ्यः । ष.वि. - खादन्त्याः, खादन्तीनाम् । स.वि. - खादन्त्योः, खादन्तीषु ।

३. द्वि.वि. - पतत्, पतन्ती, पतन्ति । तृ.वि. - पतता, पतद्भ्याम्, पतद्भिः । च.वि. - पतते, पतद्भ्याम्, पतद्भ्यः । पं.वि. - पततः, पतद्भ्याम्, पतद्भ्यः । ष.वि. - पततः, पततोः, पतताम् । स.वि. - पतति, पततोः ।

४. १. सृजन्, सृजन्ती, सृजत् । २. विन्दन्, विन्दन्ती, विन्दत् । ३. पचन्, पचन्ती, पचत् । ४. चलन्, चलन्ती, चलत् । ५. यजन्, यजन्ती, यजत् । ६. इच्छन्, इच्छन्ती, इच्छत् । ७. भजन्, भजन्ती, भजत् । ८. लिखन्, लिखन्ती, लिखत् । ९. प्रकाशयन्, प्रकाशयन्ती, प्रकाशयत् । १०. गायन्, गायन्ती, गायत् ।

५. १. युधिष्ठिरः धृतराष्ट्रं प्रणमन् वनं गच्छति। २. सैनिकाः धावन्तः शस्त्रप्रहारं कुर्वन्ति। ३. भीष्मः शङ्खं धमन् युद्धारम्भं करोति। ४. अर्जुनः भीष्मं मारयन् रोदिति। ५. नकुलः वृक्षम् आरोहन् जलं पश्यति। ६. शिवः नृत्यन् डमरुं वादयति। ७. श्रीरामः मृगम् अनुधावन् तं मारयति। ८. कुम्भकर्णः मद्यपानं कुर्वन् निद्रां करोति। ९. प्रवाचकः कथां कथयन् रोदिति। १०. छात्राः वाक्यानि शृण्वन्तः लिखन्ति। ११. रजकः वस्त्रं क्षालयन् गीतं गायति। १२. शिक्षकः पाठं पाठयन् प्रश्नं पृच्छति। १३. पूजकः पुष्पम् अर्पयन् नमस्करोति। १४. छात्रौ विद्यालयं गच्छन्तौ गीतं गायतः। १५. बालाः क्रीडन्तः कोलाहलं कुर्वन्ति।

६. १. नृत्यन्तम् २. लिखन्तीम् ३. धावन्तम् ४. पठता ५. पश्यन्त्या ६. कुर्वते ७. क्रीडन्त्यै ८. गर्जद्भ्यः ९. धावन्तीभ्याम् १०. गायतः ११. कुर्वतः १२. पठत्सु १३. प्रवहन्तीषु १४. पतती १५. हसत्।

७. १. अनिच्छन् २. काङ्क्षन्तः ३. युञ्जन् ४. युञ्जन् ५. स्मरन् ६. व्याहरन् ७. प्रहसन् ८. अविनश्यन्तम् ९. भ्रामयन् १०. चिन्तयन्तः।

पाठः - १८

१. १. दूतरूपेण गतः श्रीकृष्णः पाण्डवानां पित्रार्जितं राज्यं प्रत्यर्पयितुं दुर्योधनं न्यवेदयत्।
२. स्पर्धमानः दुर्योधनः - 'सूच्यग्रमिताम् अपि भूमिं पाण्डवेभ्यः न दास्यामि' इति सदर्पम् उक्तवान्।
३. धर्ममार्गेण सदाचारेण च वर्तमानानां पाण्डवानाम् उत्तमाचरणस्य महत्वं समाजे प्रस्थापयितुं महाभारतयुद्धं प्राचलत्।
४. श्रीकृष्णः राजसभायां स्वकीयं दिव्यं विराड्रूपं दर्शयित्वा न्यवर्तत।
५. कृष्णस्य प्रयत्नः यदा विफलः अभवत् तदा एव कुरुक्षेत्रे धर्मयुद्धं भविष्यति इति निश्चितम् अभवत्।
६. दुर्योधनः राज्ञः कृतवर्मणः एकाक्षौहिणीं सेनां प्राप्तवान्।
७. अन्ततो गत्वा धर्मस्य एव विजयः अभवत्, अधर्मस्य च नाशः अभवत्।
८. धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः। मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय॥ इति॥

२. १. याचमानाः, प्रथमा, बहुवचनम् २. स्पर्धमानः, प्रथमा, एकवचनम् ३. ब्रुवाणस्य, षष्ठी, एकवचनम् ४. अलभमानाः, प्रथमा, बहुवचनम् ५. वर्तमानानां, षष्ठी, बहुवचनम् ६. प्रयतमानाय, चतुर्थी, एकवचनम् ७. वहमानेन, तृतीया, एकवचनम् ८. प्रयतमानेन, तृतीया, एकवचनम् ९. ज्ञातवता, तृतीया, एकवचनम् १०. मोदमानाः, प्रथमा, बहुवचनम्।

३. १. जायमानः, २. गोपयमानम्, ३. त्रपमाना ४. ताड्यमानः ५. क्लिश्यमानः ६. क्षयमाणः ७. खिद्यमानः ८. पवमानः ९. बाधमानः १०. आसीना ११. कुर्वाणः १२. तन्वाना।

४. १. लभ - लभमानः २. क्षम - क्षममाणः ३. म्रि - म्रियमाणः ४. शङ्क - शङ्कमानः ५. आ + रभ - आरभमाणः ६. रुच् - रोचमानः ७. क्लिश् - क्लिश्यमानः ८. मन् - मन्यमानः ९. संह - संह्रियमाणः १०. नि + वर्त - निवर्तमानः ११. वि + धा - विधीयमानः।

५. १. दयमानः दयमानाः २. डयमानाम् डयमानाः ३. घटमानम् घटमानानि ४. जृम्भमाणम् जृम्भमाणानि ५. त्वरमाणायाः त्वरमाणाभ्यः ६. वेपमानस्य वेपमानानाम् ७. वर्तमानस्य वर्तमानानाम् ८. जायमानस्य जायमानानाम् ९. चिन्वाना चिन्वानाः १०. कुर्वाणस्य कुर्वाणानाम् ११. ब्रुवाणस्य ब्रुवाणानाम् १२. जानानम्, जानानानि।

६. १. भजमाना मीरा अस्ति। २. वन्दमानौ शिष्यौ स्तः। ३. भाषमाणः नेता अस्ति। ४. कम्पमानः शुनकः अस्ति। ५. आसीनाः महिलाः सन्ति। ६. डयमानाः पक्षिणः सन्ति। ७. चिन्वाना बालिका अस्ति। ८. युद्ध्यमानौ बालकौ स्तः।

७. १. युद्ध्यमानौ युवकौ कूर्दते। २. आसीनः योगी नेत्रे निमीलयति। ३. भजमानौ भक्तौ आनन्देन नृत्यतः। ४. वन्दमानाः छात्राः आशीर्वादं प्राप्नुवन्ति। ५. सेवमानः कृष्णः सुदाम्नः पादौ प्रक्षालयति। ६. प्रार्थयमानः अर्जुनः कृष्णं निवेदयति। ७. खिद्यमाना महिला घटम् उन्नयति। ८. डयमानः हनुमान् पर्वतं हस्तेन धरति। ९. शयानः भीष्मः कृष्णं पश्यति। १०. ब्रुवमाणौ जनौ चायं पिबतः।

८. निरीक्षमाणम्, त्वरमाणेन, वर्धमानाभिः, शोभमानम्, कम्पमानाः, वन्दमानम्, पद्यमानः, कथमानाय, ब्रुवाणः।

९. १. त्वरमाणः युवकः समयेन कार्यालयं प्राप्नोति। २. उत्तमगुणप्राप्तये स्पर्धमानौ बालकौ शिक्षिका परीक्षाफलं वदति। ३. शैत्यकारणात् वेपमानं तं पिता चिकित्सालयं नयति। ४. वृक्षात् लम्बमानं फलं बालकाः त्रोटयन्ति। ५. तडागे शोभमानस्य कमलस्य अरुणः छायाचित्रं

गृह्णाति । ६. रुग्णं सेवमानायै परिचारिकायै जनाः धन्यवादान् अर्पयन्ति । ७. उत्तमं शाकं चिन्वानौ जनौ शाकस्य मूल्यं पृच्छतः । ८. सुभाषितानि भाषमाणं संस्कृतज्ञं बालिकाः अर्थं पृच्छन्ति । ९. मोदमानं विजयीगणं जनाः अभिनन्दन्ति । १०. शयानं श्रान्तं शिशुं माता गीतं श्रावयति ।

पाठः - १९

१. १. अस्मिन् संसारे कः महादाता इति अर्जुनस्य जिज्ञासा आसीत् । २. सः दानशूरः, तस्य मनः विशालम्, सः सर्वेभ्यः यथेच्छं दित्सति इत्येताः कर्णस्य गुणाः कृष्णेन कथिताः । ३. कृष्णः एकं रजतपर्वतं सुवर्णपर्वतं च असृजत् । ४.सायङ्कालः सञ्जातः । तावता पर्वतयोः पादभागस्य वितरणम् अपि न समाप्तम् आसीत् । अतः अर्जुनः लज्जया शिरः अवनमय्य अतिष्ठत् । ५. भवत्सु यः यावद् स्वीचिकीर्षति तावत् सुवर्णरजतादिकं नेतुम् अर्हति । यथेच्छं नीयताम् । ६. अर्जुनः स्वस्य योग्यतायाः अपर्याप्तताविषये मनसि एव खेदम् अनुभूतवान् ।

२. १. तथापि त्वं महाबाहो नैव शुशोचिषसि । २. उत्तमावसरं कोऽपि न जिहासति । ३. भवन्तः गीताश्लोकान् लिलेखिषन्ति । ४. यूयं स्वग्रामं जिगमिषथ । ५. भक्ताः देवं विवक्षन्ति । ६. सर्वेऽपि कृतस्य कर्मणः फलं प्रेप्सन्ति । ७. नववधूः गृहं प्रविविक्षति । ८. कोऽपि कटुभाषणं न शुश्रूषते । ९. श्रीकृष्णः सम्भ्रमितम् अर्जुनं बिबोधयिषति । १०. भवान् तां कथां किमर्थं लिलेखिषति ? ११. माता पुत्रीं सम्भाषणशिबिरं निनीषति । १२. भगवन्, अहम् आद्यं भवन्तं विजिज्ञासे । १३. यः कृष्णार्जुनसंवादम् अधिजिगांषते सः ज्ञानयज्ञेन भगवन्तमेव यक्ष्यति । १४. देवाः अपि भगवतः विश्वरूपम् दिदृक्षन्ते । १५. अर्जुन, त्वम् अभ्यासयोगेन मां प्रेप्स १६. यदि त्वं कृत्स्नं जगत् मम देहे दिदृक्षसे तर्हि दिव्यं चक्षुः ते ददामि । १७. भगवन्, अहं किरीटिनं गदिनं चक्रहस्तं त्वां दिदृक्षे ।

३. २. जिज्ञासुः ३. निनर्तिषा ४. उपदिदिक्षा ५. ईप्सा ६. बिभाषिषुः ७. जिगासति ८. निदिध्यासा ९. विवर्धिषते १०. बुबोधिषा ।

४. १. सिषाधयिषवः २. चिकीर्षाम् ३. तितीर्षून् ४. मुमुक्षया ५. आरुरुक्षुभ्यः ६. विवक्षोः ७. मीमांसाभिः ८. पिपासोः ९. तितिक्षुभ्यः १०. दित्सायाम् ११. प्रेप्सुषु १२. जिगीषुः १३. निदिध्यासून् १४. युयुत्साम् १५. जिजीविषुभिः १६. जिज्ञासवे.१७. दिदृक्षायाः १८. शुश्रूषोः १९. विवन्दिषायाम् २०. ईप्सासु ।

५. १. जिज्ञासुः २. विवदिषुः ३. विवक्षुः ४. दिदृक्षुः ५. चिकीर्षुः ६. जिगीषुः ७. लिप्सुः ८. प्रेप्सुः ९. जिजीविषुः ।

६. १. चिखादिषति २. पिपासति ३. चिक्रीषति ४. विवर्धयिषति ५. प्रसिसारयिषति ६. प्रेप्सति ७. चिकीर्षन्ति ८. बुबोधयिषन्ति ९. सुसूचयिषति ।

७. १. जिज्ञासा २. पिपृच्छा ३. शुश्रूषा ४. उपदिदिक्षा ५. पिपाठयिषा ६. उपचिकीर्षा ७. विवक्षा ८. लिलेखिषा ९. सिसाधयिषा १०. दित्सा ११. जिगमिषा १२.निदिध्यासा १३. जिगीषा १४. मुमुक्षा १५. जिघासा १६. युयुत्सा १७. प्रेप्सा ।

पाठः - २०

१. १. विराट्तमम् २. प्रखरतरः ३. प्राचीनतरः ४. पुरातनतमम् ५. कठिनतमः ६. विशालतमम् ७. दीर्घतमा ८. लघुतमः ९. युक्ततमः १०. बृहत्तमः ११. लघुतरः १२. वृद्धतमः १३. दृढतरः ।

२. १. वीर्यवत्तरः, वीर्यवत्तमः २. प्रतापवत्तरम्, प्रतापवत्तमम् ३. मेधावत्तरः, मेधावत्तमः ४. रूपवत्तरः, रूपवत्तमः ५. ध्येयवत्तरम्, ध्येयवत्तमम् ६. धीमत्तरः, धीमत्तमः ७. श्रद्धावत्तरः, श्रद्धावत्तमः ८. ज्ञानवत्तरः, ज्ञानवत्तमः ९. करुणावत्तरः, करुणावत्तमः १०. धनुष्मत्तरम्, धनुष्मत्तमम् ।

३. १. गुणवत्तमम् २. विद्वत्तमः ३. ज्ञानवत्तमः ४. महत्तरः ५. देहभृत्तमः ६. शक्तिमत्तरः ७. रसवत्तमम् ८. योगवित्तमाः ९. प्रियतमाः १०. गुह्यतमम् ।

४. २. प्रियतरम्, प्रियतरौ, प्रियतरान् ३. द्विजोत्तमेन, द्विजोत्तमाभ्याम्, द्विजोत्तमैः ४. रथोत्तमाय, रथोत्तमाभ्याम्, रथोत्तमेभ्यः ५. कुरुसत्तमात्, कुरुसत्तमाभ्याम्, कुरुसत्तमेभ्यः ६. पापकृत्तमस्य, पापकृत्तमयोः, पापकृत्तमानाम् ७. युक्ततमे, युक्ततमयोः, युक्ततमेषु ८. अनुत्तमया, अनुत्तमाभ्याम्, अनुत्तमाभिः ९. गुह्यतमाय, गुह्यतमाभ्याम्, गुह्यतमेभ्यः १०. प्रियकृत्तमात्, प्रियकृत्तमाभ्याम्, प्रियकृत्तमेभ्यः ।

५. दृढतरा २. शीतलतरम् ३. प्रसिद्धतमम् ४. दीर्घतमः ५. सनातनतमः ६. युक्ततमम् ७. निःस्पृहतरः ८. विशालतमः ९. बृहत्तमः १०. विशिष्टतमम् ११. सरलतमम् १२. प्रशस्ततमा १३. विशिष्टतरः १४. पुण्यतमम् १५. गुह्यतमम् ।

६. २. तेषां के योगवित्तमाः। ३. मे युक्ततमा मताः। ४. इदमुक्तं मयानघ। ५. अन्यः प्रियतरो भुवि। ६. तन्मे क्षेमतरं भवेत्। ७. भैक्ष्यमपीह लोके। ८. ततो दुःखतरं नु किम्। ९. गुह्यात् गुह्यतरं मया। १०. शृणु मे परमं वचः।

७. १. क्षिप्रतरा, क्षिप्रतमा २. पृथक्तरम्, पृथक्तमम् ३. सत्तरः, सत्तमः ४. उत्तरा, उत्तमा ५. शीघ्रतरम्, शीघ्रतमम् ६. उच्चतरा, उच्चतमा ७. नीचतरम्, नीचतमम् ८. अधिकतरः, अधिकतमः ९. न्यूनतरा, न्यूनतमा १०. द्रुततरा, द्रुततमा ११. वरतरम्, वरतमम् १२. चिरतरः, चिरतमः।

८. १. पृथक्तमः २. पुरुषोत्तमः ३. शीघ्रतमम् ४. अतितरा ५. अधिकतमम् ६. अधिकतमम् ७. सुष्ठुतमम्।

९. २. ज्यायसी ३. ज्यायः ४. श्रेयान् ५. श्रेयः ६. श्रेयः ७. श्रेयः।

१०. १. कनीयसीम् २. ज्यायः ३. ज्यायान् ४. ज्यायसी ५. लघीयः ६. बलीयान् ७. बलीयसी।

११. १. कतमा २. कतरः ३. कतमः ४. कतमः ५. कतमः ६. कतरा।

****